CC-0. In Public Domain. Digitization by eGangotri

श्रीः ।

सिद्धान्त-चन्द्रिका

विद्वद्वररामाश्रम-विरचिता ।

खेमराज श्रीकृष्णदास,

अध्यक्ष-"श्रीवेङ्कटेश्वर" स्टीम्-प्रेस, बम्बई.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

NOV 2 1948

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

॥ श्रीः ॥

विद्वद्वररामाश्रमविरचिता-

सिद्धान्तचन्द्रिका

खेमराज श्रीकृष्णदास,

अध्यक्ष-"श्रीवेङ्कटेश्वर" स्टीम्-प्रेस,

बम्बई.

संवत् १९९२, शके १८५७.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

मुद्रक और प्रकाशक—

खेमराज श्रीकृष्णदास,

मालिक—"श्रीवेङ्कटेश्वर" स्टीम्-प्रेस, बम्बई.

पुनर्मुद्रणादि सर्वाधिकार "श्रीवेङ्कटेश्वर" यन्त्रालयाध्यक्षाधीन हैं ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

सिद्धान्तचन्द्रिकायाः पूर्वार्द्धस्य
विषयानुक्रमणिका ।

विषयाः	पृष्ठाङ्काः
संज्ञाप्रकरणम्	१
स्वरसन्धिः	२
प्रकृतिभावः	५
व्यञ्जनसन्धिः	६
विसर्गसन्धिः	९
स्वरान्तपुँल्लिङ्गाः	११
स्वरान्तस्त्रीलिङ्गाः	२१
स्वरान्तनपुंसकलिङ्गाः	२५
हलन्तपुँल्लिङ्गाः	२७
हलन्तस्त्रीलिङ्गाः	३६
हलन्तनपुंसकलिङ्गाः	३७
युष्मदस्मत्प्रकरणम्	३९
अव्ययानि	४३
स्त्रीप्रत्ययाः	४५
कारकाणि	५०
समासाः	५७
तद्धिताः	६८
भ्वादयः	८५
अदादयः	११४

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

उत्तरार्द्धस्य विषयानुक्रमणिका ।

विषयाः	पृष्ठाङ्काः
ह्वादयः	१२२
दिवादयः	१२५
स्वादयः	१३१
रुधादयः	१३३
तनादयः	१३५
तुदादयः	१३६
क्र्यादयः	१४०
चुरादयः	१४३
ण्यन्तप्रक्रिया	१४६
सन्नन्तप्रक्रिया	१५०
यङन्तप्रक्रिया	१५३
यङ्लुगन्तप्रक्रिया	१५५
नामधातुप्रक्रिया	१६०
कण्ड्वादयः	१६४
आत्मनेपदप्रक्रिया	१६५
परस्मैपदप्रक्रिया	१६९
भावकर्मप्रक्रिया	"
कर्मकर्तृप्रक्रिया	१७२
लकारार्थप्रक्रिया	१७३
पूर्वकृदन्ताः	१७५
उणादयः	१८९
उत्तरकृदन्ताः	२०५

इति विषयानुक्रमणिका समाप्ता ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

श्रीगणेशाय नमः ।

अथ

सिद्धान्तचन्द्रिका ।

पूर्वार्द्धम् ।

अथ संज्ञाप्रकरणम् ।

नमस्कृत्य महेशानं मतं बुद्ध्वा पतञ्जलेः ।
वाणीप्रणीतसूत्राणां कुर्वे सिद्धान्तचन्द्रिकाम् ॥ १ ॥

अइउऋऌ समानाः ॥ अनेन क्रमेणैते वर्णा ज्ञेयाः । ते च समानसंज्ञाः स्युः । नैतेषु सूत्रेषु संधिरनुसंधेयोऽविवक्षितत्वात् । विवक्षितस्तु संधिर्भवतीति नियमात् ॥ ह्रस्वदीर्घप्लुतभेदाः सवर्णाः ॥ एतेषां ह्रस्वदीर्घप्लुताः सजातीयाः परस्परं सवर्णा भण्यन्ते ॥ ऋऌवर्णौ च ॥ एकमात्रो ह्रस्वः । द्विमात्रो दीर्घः । त्रिमात्रः प्लुतः ॥ एऐओऔ संध्यक्षराणि ॥ उभये स्वराः ॥ अकारादय एकारादयश्च स्वरा उच्यन्ते ॥ अवर्जा नामिनः ॥ अवर्णवर्जाः स्वरा नामिन उच्यन्ते ॥ हयवरल ॥ ञणनङम ॥ झढधघभ ॥ जडदगब ॥ खफछठथ ॥ चटतकप ॥ शषस ॥ आद्यन्ताभ्याम् ॥ आद्यन्तौ वर्णौ मध्यगानामाभ्यां सहितानां संज्ञाः स्युः ॥ अव इल जब झभ चप । एवमन्येऽपि ॥ कार्यायेत् ॥ कार्यं विधातुमुच्चार्यमाणो वर्ण इत्संज्ञो भवति ॥ या

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

या संज्ञा सा सा फलवती ॥ यस्येत्संज्ञा तस्य लोपः ॥ प्रसक्तादर्शनं लोपः ॥ प्रत्ययादर्शनं लुक् ॥ वर्णविरोधो लोपश्च ॥ स्वरानन्तरिता हसाः संयोगः ॥ कुचुटुतुपु वर्गाः ॥ अरेदो नामिनो गुणाः ॥ अर् ए ओ गुणसंज्ञकाः । ते च नामिस्थाने भवन्ति ॥ आरै औ वृद्धिः ॥ आ आर् ऐ औ वृद्धिसंज्ञाः स्युः ॥ अन्त्यस्वरादिष्टिः ॥ अन्त्यो यः स्वरस्तदादिवर्णष्टिसंज्ञको भवति ॥ अन्त्यात्पूर्व उपधा । अन्त्याद्वर्णमात्रात्पूर्वो यो वर्णः स उपधासंज्ञो भवति ॥ ह्रस्वो लघुः ॥ विसर्गानुस्वारसंयोगपरो गुरु दीर्घश्च ॥ मुखनासिकावचनोऽनुनासिकः ॥ विभक्त्यन्तं पदम् ॥ तपरः ॥ स्वसमानकालस्य सवर्णस्य ग्राहकः ॥ विरामोऽवसानम् ॥ वर्णानामभावोऽवसानसंज्ञः स्यात् ॥ इति संज्ञाप्रकरणम् ॥

अथ स्वरसंधिः ।

इयं स्वरे ॥ इवर्णो यत्वमापद्यते स्वरे परे ॥ हसेऽर्हेहसः ॥ स्वरात्परो रेफहकारवर्जितो हसो हसे परे अवसाने च वा द्विर्भवति ॥ झबे जबाः ॥ झसानां झबे परे जबा भवन्ति । वर्ग्यो वर्ग्येण सवर्णः ॥ स्वरहीनं परेण संयोज्यम् ॥ दध्ध्यानय ॥ जपाद्यवला वा द्विर्वाच्याः ॥ दध्यानय ॥

द्वित्वं धस्यैव यस्यैव नोभयोरुभयोरपि ।
दध्यानयादिषु प्राज्ञैर्बोध्यं रूपचतुष्टयम् ॥

रहाद्यपो द्विः ॥ स्वरपूर्वाद्रेफात् हकाराच्च परो यपो वा द्विर्भवति ॥ जलतुम्बिकान्यायेन रेफस्योर्ध्वगमनम् । गौर्य्यत्र ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

नह्य्यस्ति । हर्य्यनुभवः । व्यवस्थितविभाषया शस्यापि द्वित्वम् ॥ पाश्श्र्वम् । "पर्श्वा डण्" । सस्स्यं वष्ष्मेत्यादौ ॥ उ वम् ॥ मद्ध्ध्वत्र । मध्ध्वत्र । मद्ध्वत्र । मध्वत्र ॥ सूत्रेष्वदृष्टं पदं सूत्रान्तरादनुवर्तनीयम् ॥ ऋ रम् ॥ पित्रर्थः ॥ ऌ लम् ॥ ऌ इत् यस्य स, ऌित् ॥ ए अय् ॥ नयनम् ॥ ओ अव् ॥ भवनम् । गोरग्वा । पदान्ते स्वरे ॥ टित्कितावाद्यन्तयोर्वक्तव्यौ ॥ गो अग्रं गोऽग्रम् । गवाग्रम् । पदान्ते किम् । गवि । स्वरे किम् । गोहितम् । इन्द्राक्षयोः परतो गोरङ् नित्यम् ॥ गवेन्द्रः । गवाक्षः ॥ ऐ आय् ॥ नायकः ॥ औ आव् ॥ पावकः ॥ क्वचित्स्वरवद्यकारः ॥ गव्यूतिः स्त्री क्रोशयुगम् । अन्यत्र गोयूतिः ॥ क्षय्यं जय्यं शक्यार्थे ॥ क्षेतुं शक्यं क्षय्यम् । जेतुं शक्यं जय्यं सैन्यम् । अन्यत्र क्षेयं पापम् । जेयं मनः ॥ क्रयार्थे प्रसारितं क्रय्यम् । क्रेयमन्यत् ॥ अक्षादेरूहिन्यादावग्वक्तव्यः ॥ अक्षौहिणी सेना । प्रौढिः । स्वैरम् । स्वैरी । स्वैरिणी ॥ य्वोर्लोपश्चा पदान्ते ॥ पदान्ते स्थितानामयादीनां यकारवकारयोर्लोपश् वा भवति ॥ त आगताः । तयागताः । पट इह । पटविह । हे सखयिति । हे सख इति । तस्मा इदम् । तस्मायिदम् । ता इह । ताविह । लोपशि न संधिः । नलोपशि तु भवति । छन्दसि च श्वादेरिति निर्देशात् । दामोदरः । राजाश्वः ॥ एदोतोऽतः ॥ पदान्ते स्थितादेकारादोकाराच्च परस्याकारस्य लोपश् भवति ॥ तेऽत्र ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

पटोऽत्र ॥ गोर्वा ॥ तेन गो अजिनम् । गवाजिनम् ॥ सवर्णे दीर्घः सह ॥ समानस्य सवर्णे परे सह दीर्घो भवति ॥ दैत्यारिः । श्रद्धात्र । दधीह । भानूदयः । श्रीशः । होतॄकारः ॥

सामान्यशास्त्रतो नूनं विशेषो बलवान्भवेत् ।
परेण पूर्वबाधो वा प्रायशो दृश्यतामिह ॥

हलादेरीषादौ टेर्लोपो वक्तव्यः ॥ हलीषा । लाङ्गलीषा । मनीषा । अद्योम् । शकन्धुः । कर्कन्धुः । कुलटा । पटत् इति पटिति॥ सारङ्गः पशुपक्षिणोः ॥ साराङ्गोऽन्यः ॥ सीमंतः केशवेशे ॥ सीमान्तोऽन्यः ॥ (ओत्वोष्ठयोः समासे वा) ओ औ औ ॥ अवर्णादोकारे औकारे च परे सह औकारो भवति ॥ विम्बोष्ठः । विम्बौष्ठः । स्थूलोतुः । स्थूलौतुः । समासे इति किम् । तवौष्ठः । एदोदादौ धातौ ॥ अवर्णान्तोपसर्गस्य लोपः ॥ प्रेजते । उपोषति ॥ एदोदादौ नामधातौ वा ॥ उपेडकीयति । उपैडकीयति । प्रोघीयति । प्रौघीयति ॥ एत्येधत्योर्न ॥ उपैति । उपैधते ॥ प्रस्यैष्यैषयोर्न ॥ एषः । एष्यः । प्रैषः । प्रैष्यः । प्रस्य किम् । अपेषः ॥ एवेऽनवधारणे ॥ अद्येव । अवधारणे त्वद्यैव ॥ अ इ ए ॥ अवर्णादिवर्णे परे सह ए भवति ॥ ममेदम् ॥ उ ओ ॥ अवर्णादुवर्णे परे सह ओ भवति ॥ गङ्गोदकम् ॥ ऋ अर् ॥ अवर्णादृवर्णे परे सह अर् भवति ॥ हसात्परस्य झसस्य लोपो वा ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

सवर्णे ऋसे ॥ तवर्धिः । तवार्द्धिः । ऌ अल् ॥ अवर्णात् ऌवर्णे परे सह अल् भवति ॥ यवलाद्यपो द्विर्वा । तवल्कारः । तवल्ल्कारः । तवल्ल्कारः । तवल्कारः ॥ ए ऐ ऐ ॥ अवर्णादेकारे ऐकारे च परे सह ऐकारो भवति ॥ तवैषा । देवैश्वर्यम् ॥ प्रवत्सतरकम्बलवसनार्णदशभ्य ऋणे ॥ प्रार्णम् । वत्सतरार्णम् । कम्बलार्णम् । ऋणार्णम् । दशार्णः ॥ ऋदादौ नामधातौ वा ॥ प्रार्षभीयति । प्रर्षभीयति ॥ अवर्णान्तादुपसर्गादृकारदौ धातावार् ॥ उपार्च्छति ॥ अवर्णादृते परे तृतीयासमासे ॥ दुःखार्तः । शीतार्तः । तृतीयासमासे किम् । परमर्तः ॥ ऌदादौ नामधातौ वाऽऽल् ॥ प्राल्कारीयति ॥ प्राल्लकारीयति । प्राल्कारीयति । प्राल्ल्कारीयति ॥ इति स्वरसंधिः ॥

अथ प्रकृतिभावः ।

नामी ॥ अदसोऽमीशब्दः संधिं न प्राप्नोति ॥ अमी आदित्याः । अदसः किम् । अन्यत्र ॥ य्वे द्वित्वे ॥ ईकारान्त-ऊकारान्त एकारान्तश्च शब्दो द्वित्वे वर्तमानः सन्धिं न प्राप्नोति ॥ अग्नी अत्र । पटू अत्र । माले आनय । पचेते इमौ । औ निपातः ॥ स्वरो निपातश्च संधिं न प्राप्नोति ॥ अ अपेहि । इ इन्द्र पश्य । उ उत्तिष्ठ । आ एवं मन्यसे ॥ ओदन्तो निपातश्च ॥ अहो ईशाः । अहो आगताः ॥ ओदन्तो धौ वेतौ ॥ विष्णो इति । विष्णविति ॥ य्वृणामसवर्णे स्वरेऽसमासे पदान्ते वा ह्रस्वः ॥ चक्रि अत्र । चक्र्यत्र । मधु एतत् । मध्वेतत् । कर्तृ इदम् । कर्त्रिदम् । ह्रस्ववि-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

धानसामर्थ्यान्न संधिः । समासे तु हर्य्यर्थः । पदान्ते किम् । गौर्यौ ॥ **पदान्तानां समानानामृति लृति च वा ह्रस्वः** । ब्रह्म ऋषिः । ब्रह्मर्षिः । दण्डि ऋषिः । दण्ड्यृषिः । वधु ऋकारः वध्वृकारः । होतृ ऋकारः । होतृ लृकारः । होतॄकारः । पदान्तानां किम् । आर्च्छत् ॥ **अपादुञो वो वा स्वरे** ॥ किम्वुक्तम् । किमु उक्तम् । **दूरादाह्वाने टेः प्लुतः** ॥ दूरात्संबोधने यद्वाक्यं तस्य टेः प्लुतो वा ॥ प्लुतः संधिं न प्राप्नोति ॥ एहि देवदत्त ३ अत्राधीष्व ॥ **हैहेप्रयोगे हैहयोः प्लुतौ वा** ॥ है अम्ब । हायम्ब । हे ईश । हयीश ॥ **सप्तम्यर्थे ईत् सन्धि न याति** ॥ वातप्रमी आस्ते ययी इदम् । पपी एषः ॥ **इतौ वा उञ्** ॥ उ इति । विति ॥ **अप्लुतवदितौ** ॥ देवदत्तेति ॥ **गुरोरनृतोऽनन्त्यस्यापि वा पर्यायेण प्लुतः** ॥ दे ३ वदत्त । देवद ३ त्त । अपिशब्दादन्त्यस्याप्यगुरोर्वा पर्यायेण प्लुतः ॥ देवदत्त ३ । गुरोः किम् । वकारादकारस्य माभूत् । अनृतः किम् । कृष्ण ३ गौश्चरति ॥ इति प्रकृतिभावः ॥

अथ व्यञ्जनसन्धिः ।

चपा अबे जबाः ॥ पदान्ते वर्तमानाश्चपा जबा भवन्ति अबे परे ॥ षडत्र । वाग्यथा ॥ **ञमे ञमा वा** ॥ पदान्ते वर्तमानश्चपा ञमे परे ञमा वा भवन्ति ॥ षण् मम ॥ षड् मम ॥ वाङ् मधुरा ॥ वाग्मधुरा ॥ **प्रत्यये ञमे जबस्यापि नित्यम्** ॥ तन्मयम् ॥ चिन्मात्रम् ॥ **चपाच्छः शः** ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

पदान्ते वर्तमानाज्झपादुत्तरस्य शकारस्य छो वा भवत्यवे परे ॥ वाक्छूरः । वाक्शूरः । अवे किम् । वाक् श्च्योतति ॥ हो झभाः ॥ चपादुत्तरस्य हकारस्य झभा वा भवन्ति ॥ यद्वर्ग-गश्चपस्तद्वर्गगश्चतुर्थो भवति ॥ तद्धविः । तद् हविः । वाग्घरिः । वाग्हरिः ॥ स्तोः श्चुभिः श्चुः ॥ सकारतवर्गयोः शकारच-वर्गाभ्यां योगे शकारचवर्गौ भवतः ॥ उद्दिश्यमानप्रतिनिर्दिश्यमानयो-र्यथाक्रममिति वाच्यम् ॥ कश्चरति । कश्शूरः । तच्चित्रम् । तच्छा-दयति ॥ न शात् ॥ शकारात्परस्य तवर्गस्य चुत्वं न भवति ॥ प्रश्नः । विश्नः ॥ ष्टुभिः ष्टुः ॥ सकारतवर्गयोः षकारटवर्गाभ्यां योगे षकारटवर्गौ भवतः ॥ कष्षष्ठः । तट्टीकते ॥ न षि ॥ षकारे परे तवर्गस्य ष्टुत्वं न भवति ॥ भवान्षष्ठः ॥ टोरन्त्यात् ॥ पदान्ते वर्तमानाट्टवर्गात्परस्य स्तोः ष्टुर्न भवति ॥ षण्नरः ॥ षड् नरः । षट् सीदन्ति ॥ नवतिनगर्योर्नें ॥ षण्णवतिः । षण्णगर्यः ॥ सुपो न ॥ लिट्सु । टनात्सस्य वा धुट् ॥ लिटत्सु ॥ तोर्लि लः ॥ तवर्गस्य लकारे परे लकारः स्यात् ॥ तल्लुनाति । भवाँल्लिखति । अनुनासिकाननुनासिकत्वेन द्विधा यवलास्तत्र नकारस्यानुनासिको लकारः ॥ उदः स्थास्तम्भोः सलोपः ॥ उत्थानम् । उत्तम्भनम् ॥ नः सक् छते ॥ नान्तस्य पदस्यावपरे छते सगागमो भवति ॥ राजँश्चित्रम् ।, भवाँस्त-नोति । अवपरे किम् । सन्त्सरुः । न प्रशानः ॥ प्रशान्त-नोति ॥ शे चग्वा ॥ नान्तस्य पदस्यावपरे शे वा चगागमो

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

भवति । भवाञ्छूरः । भवाञ्च्छूरः । भवान्च्शूरः । भवान्शूरः ॥ **ङ्णनो ह्रस्वाद्द्विः स्वरे** ॥ ङकारणकारनकारा ह्रस्वादुत्तरा द्विर्भवन्ति स्वरे परे पदान्ते च ॥ प्रत्यङ्ङिदम् । सुगण्णिह । राजन्निह । ह्रस्वात्किम् । प्राङास्ते । पदान्ते किम् । परमदण्डिनौ ॥ **छः** ॥ ह्रस्वात्परश्छकारो द्विर्भवति । **खसे चपा झसानाम्** ॥ तव छत्रम् । तवच्छत्रम् ॥ **दीर्घाच्च** ॥ ह्रीच्छः ॥ **पदान्ताद्दीर्घाद्वा** ॥ लक्ष्मीच्छाया । लक्ष्मीछाया ॥ **आङ्माङ्भ्यां नित्यम्** ॥ आच्छादयति । मा च्छिदत् ॥ **पुंसोऽवपरे खपे संयोगान्तस्य लोपो न** ॥ पुंस्कोकिलः । पुंस्पुत्रः । अवपरे किम् । पुङ्क्षीरम् । खपे किम् । पुन्दासः । **ख्याधातौ वा** ॥ पुँख्यानम् । पुङ्ख्यानम् ॥ **मोऽनुस्वारः** ॥ मकारस्यानुस्वारो भवति हसे पदान्ते च ॥ तं हसति । पटुं वृथा । पदान्ते किम् । गम्यते । हसे किम् । किमत्र ॥ **नश्चापदान्ते झसे** ॥ नस्य मस्य चापदान्ते वर्तमानस्यानुस्वारो भवति झसे हकारे च परे ॥ यशांसि । पुंभ्याम् । स्वनड्वाहि । अपदान्ते किम् । ब्रह्मन् पाहि । झसे किम् । तन्यते ॥ **यमा यपेऽस्य** ॥ अपदान्ते वर्तमानस्यानुस्वारस्य यमा भवंति यपे परे ॥ अस्य यपस्य सवर्णाः ॥ शान्तः । अङ्कितः । अञ्चितः । कुण्ठितः । गुम्फितः ॥ **वा पदान्तस्य** ॥ पदान्ते वर्तमानस्यानुस्वारस्य यमा वा भवन्ति यपे परे ॥ अस्य यपस्य सवर्णाः ॥ त्वङ्करोषि त्वं करोषि । तन्तनोति । तं तनोति ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

सय्यँन्ता । संयंता । सँव्वत्सरः । संवत्सरः । यँल्लोकम् । यंलोकम् ॥ मो राजि समः क्वौ ॥ क्विबन्ते राजतौ परे समो मस्य म एव स्यात् ॥ सम्राट् ॥ यवलमनपरे हकारे मस्य यवलमना वा ॥ किं ह्यः । कियँ ह्यः । किं ह्वलयति । किवँ ह्वलयति । किं ह्लादयति । किलँ ह्लादयति । किं ह्मलयति । किम् ह्मलयति । किंह्नुते । किं ह्नुते ॥ शसे चपस्य द्वितीयो वा ॥ वथ्सरः । वत्सरः । अफ्सरसः । अप्सरसः । न पदान्ते ॥ तत्साधुः ॥ कुक्टुक्वर्जितस्य विभक्तौ न ॥ भवत्सु ॥ टनात्ससस्य वा धुट् ॥ षट्त्सन्तः । षट् सन्तः । सन्त्सः । सन्सः । शसे ङ्णोः कुक्टुकौ वा ॥ प्राङ् षष्ठः । प्राङ्क्षष्ठः । प्राङ्ख्षष्ठः । सुगण्साधुः । सुगण्ठ्साधुः । सुगण्ट्साधुः ॥ पकारे परे नॄन्नकारस्य नॄस वा ॥ स्रोर्विसर्गः ॥ सकाररेफयोर्विसर्गो भवति ॥ अघातो रसे पदान्ते च ॥ कुप्वोः ≍क ≍पौ वा ॥ कवर्गसम्बन्धिनि खसे परे विसर्गस्य ≍क ≍पौ वा भवतः ॥ कपावुच्चारणार्थौ ॥ नॄ≍पाहि । नॄः पाहि । नॄन् पाहि ॥ इति व्यञ्जनसंधिः ॥

अथ विसर्गसंधिः ।

विसर्जनीयस्य सः ॥ खसे परे ॥ कस्तनोति ॥ शसपरे खसे विसर्जनीयस्य विसर्ग एव ॥ कः त्सरुः । घनाघनः क्षोभणः ॥ शसे वा ॥ कश्शूरः । कः शूरः । कष्षण्ढः । कः षण्ढः । कस्साधुः । कः साधुः ॥ खपपरे शसे विसर्गस्य लोपो वा ॥ हरिः स्फुरति । हरिस्फुरति । हरिस्स्फुरति ॥ " कुप्वोः

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

ᳲ क ᳲ पौ वा " ॥ क ᳲ करोति । कः करोति । क ᳲ पचति । कः पचति ॥ वाचस्पत्यादयो निपातात्सिध्यन्ति ॥ वाचस्पतिः । बृहस्पतिः । तस्करः । कौतस्कुतः । कान्कान् । काँस्कान् । कस्कः । भास्करः । पयस्पाशम् । यशस्कल्पम् । यशस्कम् । यशस्काम्यति । सर्पिष्पाशम् । सर्पिष्कल्पम् । सर्पिष्कम् । सर्पिष्काम्यति । नमस्करोति । पुरस्करोति । निष्प्रत्यूहम् । आविष्कृतम् । तिरस्कर्ता । द्विष्करोति । द्विः करोति । त्रिष्करोति । त्रिः करोति । चतुष्करोति । चतुः करोति । चतुष्कपालम् । सर्पिष्करोति । सर्पिः करोति । धनुष्करोति । धनुः करोति । सर्पिष्कुण्डिका । अयस्कारः । अयस्कामः । अयस्कुम्भः । अयस्पात्रम् । अयःसहिता कुशा अयस्कुशा । अयस्कर्णी । अधस्पदम् । शिरस्पदम् । आकृतिगणोऽयम् । अविहितलक्षणः सकारो वाचस्पत्यादिषु द्रष्टव्यः ॥ रोऽरात्रिषु ॥ अह्नो विसर्जनीयस्य पदान्ते रो भवति न तु रात्र्यादिषु ॥ अहर्गणः । अहरहः । अरात्रिषु किम् । अहोरात्रः । अहोरूपम् । अहोरथन्तरम् ॥ अतोऽत्युः ॥ अकारात्परस्य विसर्जनीयस्योकारो भवत्यति परे ॥ कोऽर्थः ॥ हबे ॥ अकारात्परस्य विसर्जनीयस्योकारो भवति हबे परे ॥ देवो याति ॥ मनोरथः ॥ आद्बे लोपश् ॥ अवर्णात्परस्य विसर्जनीयस्य लोपश् भवत्यबे परे ॥ देवा अत्र । वाता वान्ति । देवा इह ॥ स्वरे यत्वं वा ॥ देवायिह ॥ भोसः ॥ भोस्

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

भगोस् अघोस् इत्येतस्य विसर्जनीयस्य लोपश्च भवत्यवे परे ॥ भो हरे । भगो नमस्ते । अघो याहि ॥ **स्वरे यत्वं वा** ॥ भोस्भगोस्अघोस्विसर्गस्य स्वरे यत्वं वा भवति ॥ भोयेहि । भगोयेहि । अघोयगच्छत् ॥ **नामिनो रः** ॥ नामिनः परस्य विसर्जनीयस्य रेफो भवत्यवे परे ॥ अग्निरत्र । पटुर्वक्ता ॥ **उषसो बुधे** ॥ उषसो विसर्जनीयस्य रेफो भवति बुधे परे ॥ उषः बुधः । उषर्बुधः ॥ **रेफप्रकृतिकस्य खपे वा रेफः** ॥ गीर्पतिः । गीःपतिः । गीᳲपतिः ॥ **अहन्** ॥ अहर्पतिः । अहᳲपतिः । अहःपतिः ॥ **रः** ॥ रेफसम्बन्धिनो विसर्जनीयस्य रेफो भवत्यवे परे ॥ प्रातरत्र । अन्तर्गतः ॥ **रि लोपो दीर्घश्च** ॥ रेफस्य रेफे परे लोपो भवति पूर्वस्य च दीर्घः ॥ पुना रमते ॥ हरी राजते । भानू रम्यः । शम्भू राजते ॥ **सैषाद्धसे** ॥ सशव्दादेषशव्दाच्च परस्य विसर्जनीयस्य लोपो भवति हसे परे ॥ स चरति । एष हसति ॥ **सशब्दाद्विसर्गस्य लोपः स्वरे लोपे एव पादपूरणं चेत्** ॥

सैष दाशरथी रामः सैष राजा युधिष्ठिरः ।
सैष कर्णो महात्यागी सैष भीमो महाबलः ॥

इति विसर्गसंधिः ॥

अथ स्वरान्तपुँल्लिङ्गाः ।

अविभक्ति नाम ॥ विभक्तिरहितं धातुवर्जितं चार्थवच्छब्दस्वरूपं नामोच्यते ॥ **तस्मात्** ॥ सि औ जस्, अम्

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

औ शस्, टा भ्याम् भिस्, ङे भ्याम् भ्यस्, ङसि भ्याम् भ्यस्, ङस् ओस् आम्, ङि ओस् सुप् ॥ नाम्नः पराः स्यादयः सप्त विभक्तयो भवन्ति ॥ एकत्वद्वित्वबहुत्वेषु ॥ एकवचनद्विवचनबहुवचनानि ॥ " स्रोर्विसर्गः " देवः ॥ सरूपाणामेकशेष एकविभक्तौ ॥ देवौ । देवाः ॥ अमृशसोरस्य ॥ समानादुत्तरयोरमृशसोरकारस्य लोपो भवति ॥ देवम् । देवौ । शसः शकारः शसीति विशेषणार्थः ॥ सो नः पुंसः ॥ पुँल्लिङ्गात्समानादुत्तरस्य शसः सकारस्य नकारादेशो भवति न त्वम् शसीत्यात्वे ॥ शसि ॥ शसि परे पूर्वस्य दीर्घो भवति ॥ यदादेशस्तद्वद्भवति न तु वर्णमात्रविधौ ॥ देवान् । टकारष्टेनेति विशेषणार्थः ॥ टेन ॥ अकारात्परष्टा इनो भवति ॥ देवेन ॥ अद्भि ॥ अकारस्यात्वं भवति भकारादौ स्यादौ ॥ देवाभ्याम् ॥ भ्यः ॥ अकारात्परस्य भिसो भकारस्य अकारादेशो भवति ॥ देवैः । डकारो डित्कार्यार्थः ॥ ङे अक् ॥ अकारात्परस्य ङे इत्येतस्यागागमो भवति ॥ देवाय । देवाभ्याम् ॥ ऐस्भि बहुत्वे ॥ अकारस्यैत्वं भवति सकारभकारादौ विभक्तौ बहुत्वे सति ॥ देवेभ्यः । ङसिरत् ॥ अकारात्परो ङसिरद्भवति ॥ देवात् । देवाभ्याम् । देवेभ्यः । ङस्य ॥ अकारात्परो ङस्स्यो भवति । देवस्य ॥ ओसि ॥ अकारस्यैत्वं भवति ओसि परे । देवयोः ॥ नुडामः ॥ समानादुत्तरस्यामो नुडागमो भवति पुंसि तु ह्रस्वादेव ॥ नामि ॥ नामि परे

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

पूर्वस्य दीर्घो भवति ॥ देवानाम्। देवे । देवयोः ॥ **किलात्षः सः कृतस्य ॥** कवर्गादिलाच्च प्रत्याहारात्परस्य केनचित्सूत्रेण कृतस्य सकारस्य षकारादेशो भवति । अन्ते स्थितस्य न भवति ॥ देवेषु ॥ **सिर्धिः ॥** आमन्त्रणेऽर्थे सिर्धिसंज्ञको भवति ॥ **समानाद्धेर्लो-पोऽधातोः ॥** ह्रस्वात्समानादेदोतश्चोत्तरस्य धेर्लोपो भवत्यधातोः ॥ आभिमुख्याभिव्यक्तये हेशब्दस्य प्राक् प्रयोगः । हे देव । हे देवौ । हे देवाः ॥ एवं घटपटरामकृष्णमुकुन्दादयः ॥ सर्व विश्व उभ उभय अन्य अन्यतर इतर डतर डतम सम सिम त्वत् त्व भवतु नेम एक पूर्व पर अवर दक्षिण उत्तर अपर अधर स्व अन्तर त्यद् तद् यद् एतद् इदम् अदस् द्वि किम् युष्मद् अस्मद् ॥ एते सर्वादयस्त्रिलिङ्गाः ॥ **जसी ॥** सर्वादेरकारान्तात्परो जस् ईर्भवति ॥ सर्वे ॥ **ष्रुर्नो णोऽनन्ते ॥** षकाररेफऋवर्णेभ्यः परस्य नकारस्यैकपदस्थस्य णकारादेशो भवत्यन्ते स्थितस्य न भवति ॥ सर्वानित्यादौ ॥ **अच्कुप्वन्तरेऽपि ॥** अचप्रत्याहारेण कवर्गेण पवर्गेणानुस्वारेण विसर्गेण ᳵक ᳵपाभ्यां च मध्ये व्यवधानेऽपि भवति नान्येन ॥ सर्वेण॥ **सर्वादेः स्मट् ॥** सर्वादेरकारान्तात्परस्य ङे इत्येतस्य स्मडागमो भवति ॥ सर्वस्मै ॥ **अतः ॥** सर्वादेरकारान्तात्परस्यातः स्मडागमो भवति ॥ सर्वस्मात् ॥ **सुडामः ॥** सर्वादेरवर्णान्तात्परस्यामः सुडागमो भवति ॥ सर्वेषाम् ॥ **ङि स्मिन् ॥** सर्वादेरकारान्तात्परो

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

ङि स्मिन्भवति ॥ सर्वस्मिन् । शेषं देववत् ॥ एवं विश्वादयः ॥ डतरडतमौ प्रत्ययौ ततस्तदन्ताः शब्दा ग्राह्याः ॥ पूर्वादीनां नवानां जसूङसिङीनामीस्मात्स्मिनो वा ॥ पूर्वे । पूर्वाः । पूर्वस्मात् । पूर्वात् । पूर्वस्मिन् । पूर्वे । शेषं सर्ववत् ॥ एवं परादयः ॥

सर्वादिः सर्वकार्यी स्यान्न चेद्गौणोऽथवाऽभिधा ।
पूर्वादिश्च व्यवस्थायां समोऽतुल्येऽन्तरोऽपुरि ॥
परिधाने बहिर्योगे स्वोऽर्थज्ञात्यन्यवाच्यपि ॥

सर्वमतिक्रान्तोऽतिसर्वः तस्मै अतिसर्वाय देहि । प्रियं सर्वं यस्यासौ प्रियसर्वः तस्मै प्रियसर्वाय । सर्वो नाम कश्चित्तस्मै सर्वाय । अतिपूर्वाय । अन्तरायां पुरि । समाय तुल्याय । व्यवस्थायां किम् । दक्षिणा गाथकाः कुशला इत्यर्थः ॥ असंज्ञायां किम् । उत्तराः कुरवः । अन्तरेऽन्तरा वा शाटकाः पारिधानीया इत्यर्थः । अन्तरेऽन्तरा वा चाण्डालस्य गृहाः बाह्या इत्यर्थः । बहिर्योगे किम् । ग्रामयोरन्तरे तापसः मध्य इत्यर्थः । द्वन्द्वे ॥ वर्णादीनां न सर्वकार्यम् ॥ पूर्वपरावराणाम् ॥ वा जसी ॥ वर्णाश्रमेतरे । वर्णाश्रमेतराः । तृतीयासमासे तृतीयासमासार्थवाक्येऽपि च न ॥ मासपूर्वाय । मासेन पूर्वाय ॥ प्रथमचरमतयडयडल्पार्द्धकतिपयनेमानां जसी वा ॥ प्रथमे । प्रथमाः । चरमे । चरमाः । तयडयटौ प्रत्ययौ । ततस्तदन्ताः शब्दा ग्राह्याः । द्वितये । द्वितयाः । द्वये । द्वयाः । शेषं देववत् ॥ नेमे । नेमाः । शेषं सर्ववत् । तीयस्य ङित्सु वा सर्ववद्भू-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

यम् ॥ द्वितीयस्मै । द्वितीयाय । द्वितीयस्मात् । द्वितीयात् । द्विती-यस्मिन् । द्वितीये ॥ एवं तृतीयः । उभशब्दो नित्यं द्विवचनान्तः । उभौ । उभौ । उभाभ्याम् । उभाभ्याम् । उभाभ्याम् । उभयोः । उभयोः । उभयशब्दस्य द्विवचनं नास्तीत्येके । अस्तीत्यन्ये । उभयः । उभये । निर्जरः ॥ **जरायाः स्वरादौ जरस् वा वक्तव्यः** ॥ तदन्तविधिरत्र । षष्ठीनिर्दिष्टस्यादेशस्तदन्तस्य ज्ञेयः । गुरुः शिच्च सर्वस्य ॥ निर्दिश्यमानस्यादेशा भवन्ति ॥ एकदेशविकृतम-नन्यवत् ॥ निर्जरसौ । निर्जरौ । निर्जरसः । निर्जराः । पक्षे हसादौ च देववत् ॥ **संख्याविसायपूर्वस्याह्नस्याहन् वा ङौ** ॥ वेङ्योः ॥ अन्नन्तस्योपधाया लोपो वा भवति ईङीत्येतयोः परयोः ॥ मकारवकारान्तसंयोगादुत्तरस्य न ॥ द्व्यह्नि । द्व्यहनि । द्व्यह्ने ॥ विगतमहो व्यह्नः । व्यह्नि । व्यहनि । व्यह्ने ॥ अह्नः सायः सायाह्नः ॥ सायाह्नि । सायाहनि । सायाह्ने ॥ **पाद्दन्तनासिकामासहृदय-निशाऽसृग्यूषदोषयकृच्छकृदुदकास्यमांसपृतनासानूनाम्** ॥ पद् दत् नस् मास् हृद् निश् असृक् यूषन् दोषन् यकन् शकन् उदन् आसन् मांस् पृत् स्नु एते आदेशा भवन्ति शसादौ वा ॥ पदा । पद्भ्याम् । पद्भिः । दतः । दता । दद्भ्याम् । दद्भिः ॥ मासः । माभ्याम् । मासाभ्याम् ॥ **अल्लोपः स्वरेऽम्वयुक्ताच्छसादौ** ॥ अन्नन्तस्योपधाया लोपो भवति शसादौ स्वरे परे ॥ गकारवकारान्तसंयोगादुत्तरस्य न ॥ यूष्णा । यूष्णः ॥ **नाम्नो नो लोपश् धौ** ॥ नान्तस्य

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

नाम्नो नस्य लोपश्च भवति रसे पदान्ते चाधौ ॥ यूषभ्याम् । यूषभिः । पक्षे पञ्चसु देववत् ॥ पदादयः पृथक् शब्दा इत्येके ॥ सोमपाः । सोपमौ । सोमपाः ॥ सोमपाम् । **आतो धातोर्लोपः ॥** धातुसंबन्धिन आकारस्य लोपो भवति शसादौ स्वरे ॥ सोमपः । सोमपा । सोमपाभ्यामित्यादि ॥ एवं कीलालपाशङ्खध्मामधुपाविश्वपाप्रभृतयः । धातोः किम् । हाहान् । हाहा । हाहै । हाहाः । हाहे । हाहौः ॥ हरिः ॥ **औ यू ॥** इकारान्तादुकारान्ताच्च पर औ यू आपद्यते इ उ भवतः ॥ हरी ॥ **ए ओ जसि ॥** इकारान्तस्योकारान्तस्य च जसि परे एकार ओकारश्च भवति ॥ हरयः ॥ **धौ ॥** इकारान्तस्योकारान्तस्य च धौ परे एकार ओकारश्च भवति ॥ हे हरे हरिम् । हरी । हरीन् ॥ **टा नाऽस्त्रियाम् ॥** इकारान्तादुकारान्ताच्च परष्टा ना भवत्यस्त्रियाम् ॥ हरिणा । हरिभ्याम् । हरिभिः ॥ **ङिति ॥** इकारान्तस्योकारान्तस्य ङिति परे एकार ओकारश्च भवति ॥ हरये । हरिभ्याम् । हरिभ्यः ॥ **ङस्य ॥** एदोद्भ्यामुत्तरस्य ङसिङसोरकारस्य लोपो भवति ॥ हरेः । हर्योः । हरीणाम् ॥ **ङेरौ ङित् ॥** इदुद्भ्यामुत्तरस्य ङेरौ भवति स च ङित् ॥ **ङिति टेः ॥** ङिति परे टेर्लोपो भवति ॥ हरौ । हर्योः । हरिषु ॥ एवमग्निगिरिरविकविमुन्यादयः ॥ उकारान्ता विष्णुवायुभानुगुर्वादयोऽप्येवं ज्ञेयाः ॥ भानुः । भानू । भानवः ॥ **सेर्डाधेः ॥** सखिशब्दात्तदन्ताच्च परस्य सेरधेर्डा भवति ॥ सखा ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

ऐ सख्युः ॥ सखिशब्दस्य तदन्तस्याप्यैकारादेशो भवत्यधिषु पञ्चसु ॥ सखायौ । सखायः । सखायम् । सखायौ । सखीन् ॥ सखिपत्योर्गिङ्क ॥ सखिपतिशब्दयोरिगागमो भवति टाङेङिषु परतः ॥ दीर्घत्वान्ना न भवति ॥ सख्या । सख्ये ॥ ऋ ङे ॥ सखिपतिशब्दयोर्ऋङागमो भवति ङसिङसोर्ङकारे परे ॥ सख्यृ अस इति स्थिते ॥ ऋ तो ङ उः ॥ ऋकारान्तात्परस्य ङसिङसो-रकारस्योकारो भवति स च डित् ॥ सख्युः । ङेरौ डिदित्यौकारे कृते सखिपत्योरीक् । सख्यौ । शोभनः सखा सुसखा । सुसखायौ । सुसखायः । सुसखीन् । सुसखये । सुसखेः । सुसखौ । अतिशयितः सखा अतिसखा । परमः सखा । परमसखा । सखीमतिक्रान्तोऽति-सखिः । इह डैत्वे न । लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहण-मिति न्यायात् ॥ पतिः । पती । पतयः ॥ पतिम् । पती । पतीन् ॥ पत्या । पत्ये । पत्युः । पत्यौ ॥ पतिः समासे हरिवत् ॥ भूप-तये । आगमजमनित्यम् ॥ सखिना । पतिना । द्विशब्दो नित्यं द्विवचनान्तः ॥ त्यदादेष्टेरः स्यादौ ॥ द्वौ २ । द्वाभ्याम् ३ । द्वयोः २ ॥ संज्ञोपसर्जनयोर्नात्वम् ॥ द्विर्नाम कश्चित् । द्विः । द्वी । द्वयः । द्वावतिक्रान्तोऽतिद्विः । प्राधान्ये तु परमद्वौ ॥ त्रिशब्दो नित्यं बहुवचनान्तः । त्रयः । त्रीन् । त्रिभिः । त्रिभ्यः २ ॥ त्रेरयङ् ॥ त्रिशब्दस्यायङादेशो भवति नामि परे ॥ तदन्तविधिरत्र ङिदन्तस्यैव वक्तव्यः ॥ त्रयाणाम् । परमत्रयाणाम् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

त्रिषु ॥ कतिशब्दो नित्यं बहुवचनान्तः ॥ **डतेः** ॥ संख्यावाचिनो डत्यन्ताज्जश्शसोर्लुक् ॥ प्रत्ययलोपे प्रत्ययलक्षणम् ॥ **लुकि न तन्निमित्तम्** ॥ कति २ । कतीनाम् । कतिषु ॥ औडुलोमिः । औडुलोमी । **लोम्नोऽपत्येषु बहुष्वकारः** ॥ उडुलोमाः । औडुलोमिम् । औडुलोमी । उडुलोमान् ॥ वातप्रमीः । वातप्रम्यौ । वातप्रम्यः । वातप्रमीम् । वातप्रम्यौ । वातप्रमीन् । वातप्रम्या ॥ एवं ययीपप्यादयः । क्विबन्तवातप्रमीशब्दस्यामि शसि ङौ च विशेषः । वातप्रम्यम् । वातप्रम्यः । वातप्रम्यि । "य्वौ वा" इति यः । बह्व्यः श्रेयस्यो यस्य स बहुश्रेयसी ॥ **ईदूदन्तस्य** ॥ इयुवृस्थानभिन्नस्य स्त्र्याख्यस्योपसर्जनत्वेऽपि स्त्रीकार्यं वक्तव्यम् ॥ **हसेपः सेर्लोपः** ॥ हसान्तादीबन्ताच्च परस्य सेर्लोपो भवति ॥ बहुश्रेयसी । बहुश्रेयस्यौ ॥ **धौ ह्रस्वः** ॥ इयुवृस्थानवर्जितयोरीदूतोः स्त्रीशब्दस्य च स्त्रियां धौ परे ह्रस्वो भवति ॥ ह्रस्वविधानसामर्थ्याद्धाविति न । हे बहुश्रेयसि । बहुश्रेयसीम् । बहुश्रेयसीन् ॥ **ङितामट्** ॥ स्त्रियामीकारान्तादूकारान्ताच्च स्त्रियां वर्तमानात्परस्य ङेरामादेशो भवति ॥ बहुश्रेयस्याः । बहुश्रेयसीनाम् ॥ **स्त्रियां योः** ॥ इवर्णान्तादुवर्णान्ताच्च स्त्रियां वर्तमानात्परस्य ङेरामादेशो भवति ॥ बहुश्रेयस्याम् । अनीबन्तत्वान्न सिलोपः । अतिलक्ष्मीः ॥ "धौ ह्रस्वः" हे अतिलक्ष्मि । शेषं बहुश्रेयसीवत् ॥ सुश्रीः ॥ **य्वोर्धातोरियुवौ स्वरे** ॥ धातोरिवर्णोवर्णयोरियुवौ भवतः स्यादौ स्वरे

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

परे ॥ सुश्रियः ॥ एवं सुधीयवक्र्यादयः ॥ सेनानीः ॥ य्वौ वा ॥ अनेकस्वरस्य नाम्नो धातोरिवर्णोवर्णयोर्यकारवकारौ भवतः स्यादौ स्वरे परे ॥ धातोरवयवसंयोगः पूर्वो यस्मात्तस्य तु न ॥ सोपपदस्यानेकस्वरस्य चेदुपसर्गकारकपूर्वस्यैव नान्यपूर्वस्य ॥ वर्षाकरदृन्पुनर्पूर्वस्य भूशब्दस्य वत्वम् । अन्यभूशब्दस्य सुधीशब्दस्य च य्वौ न ॥ सेनान्यौ । सेनान्यः ॥ नियः ॥ नीशब्दादुत्तरस्य ङेरामादेशः ॥ सेनान्याम् । एवं सुनीप्रधीग्रामण्यादयः । धातुना संयोगविशेषणात् । उन्न्यौ । उपसर्गकारकपूर्वस्य किम् । परमनियौ । शुद्धधियौ । अनेकस्वरस्य किम् । नियौ ॥ कुमारीमिच्छन् । कुमारीवाचरन् वा कुमारी । "हसेप" इति सिलोपः । कुमार्यौ । कुमार्यः । अमि शसि च कुमार्यम् । कुमार्यः । शेषं बहुश्रेयसीवत् ॥ सखायमिच्छति सखीयति । एकदेशविकृतस्यानन्यत्वात् डैत्वे सखा । सखायौ । सखायः । हे सखीः । सखायम् । सख्यः । सह खेन वर्तते सखस्तमिच्छति सखीः । सख्यौ ॥ सुतमिच्छति सुतीः । सुत्यौ ॥ खीतीभ्यां कृतयादेशाभ्यां ङसिङसोरकारस्य उः ॥ सख्युः । सुत्युः ॥ तकारस्थानजाद्वर्णादपि ॥ लूनमिच्छतीति लूनीः । लून्युः । क्षामं प्रस्तीमं वेच्छतीति क्षामीः । क्षाम्युः । प्रस्तीमीः । प्रस्तीम्युः । शुष्कीः । पक्वीः । कृतयादेशत्वाभावान्नोत्वम् । शुष्कियः । पक्वियः ॥ हूहूः । हूह्वौ । हूह्वः । हे हूहूः । हूहूम् । हूहून् । वातप्रमीवत् ॥ एवं दृम्भूः ॥ अतिचमूः । बहुश्रेयसी-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

वत् ॥ खलपूः । खलप्वौ । खलप्वः । एवमुल्लूसुल्वादयः ॥ स्वयंभूः । स्वयंभुवौ । स्वयंभुवः ॥ एवं लूस्वयंभूकटप्रूदृन्भूकाराभूपरमल्वादयः ॥ वर्षाभूः । वर्षाभ्वौ । वर्षाभ्वः ॥ वर्षाभ्वम् ॥ एवं कारभूपुनर्भूदृन्भूकरभूशब्दाः ॥ सेरा ॥ ऋकारान्तात्परस्य सेरा भवति । स च डित् ॥ पिता ॥ पञ्चसु ॥ ऋकारस्यार् भवति पञ्चसु ॥ पितरौ । पितरः ॥ धेरर् ॥ ऋकारान्तात्परस्य धेरर् भवति स च डित् ॥ हे पितः । पितरम् । पितरौ । पितॄन् ॥ ऋतो ङउः । पितुः ॥ ङौ ॥ ऋकारस्यार् भवति ङौ परे ॥ पितरि ॥ एवं जामातृभ्रात्रादयः ॥ नुर्वा नामि दीर्घः ॥ नृणाम् । नॄणाम् । शेषं पितृवत् ॥ स्तुरार् ॥ सकारतृप्रत्ययसम्बन्धिन ऋकारस्यार् भवति पञ्चसु ॥ कर्ता । कर्तारौ । कर्तारः । हे कर्तः । कर्तारम् । कर्तारौ । कर्तॄन् ॥ उद्गातृनप्तृनेष्टृशतृहोतृपोतृप्रशास्तॄणां च ॥ उद्गाता । नप्ता ॥ क्रोष्टुशब्दस्य पुंसि पञ्चम्यादिषु स्त्रियां च तृवद्रूपम् । क्रोष्टा । क्रोष्टारौ क्रोष्टारः ॥ हे क्रोष्टो । क्रोष्टारम् । क्रोष्टारौ । क्रोष्टून् । टादौ स्वरे ॥ क्रोष्टुशब्दस्य तृवद्वा ॥ क्रोष्ट्रा । क्रोष्टुना । क्रोष्ट्रे । क्रोष्टवे । क्रोष्टुः । क्रोष्टोः । क्रोष्टुः । क्रोष्टोः । क्रोष्ट्रोः । क्रोष्ट्वोः । कृताकृतप्रसंगी यो विधिः स नित्यः ॥ नित्यानित्ययोर्मध्ये नित्यविधिर्बलवान् ॥ क्रोष्टूनाम् । क्रोष्टरि । क्रोष्टौ ॥ सह इना कामेन वर्तते सेः । सयौ । सयः । स्मृता ईर्लक्ष्मीर्येन स स्मृतेः । स्मृतयौ स्मृतयः । रैस्भि ॥ रैशब्दस्योकारादेशो भवति सकारभकारादौ स्यादौ विभक्तौ ॥ सुराः । सुरायौ । सुरायः । सुराभ्याम् । सुरासु ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

ओरौ ॥ ओकारस्यौकारादेशो भवति पञ्चसु ॥ गौः । गावौ । गावः । हे गौः ॥ **आमृशसि ॥** ओकारस्यात्वं भवति अमि शसि च ॥ गाम् । गावौ । गाः । गवा । गोभ्याम् । ङस्य गोः ॥ एवं सुद्यौः ॥ स्मृत उः शंभुर्येन स स्मृतौः । स्मृतावौ । स्मृतावः ॥ ग्लौः । ग्लावौ । ग्लावः ॥ इति स्वरान्ताः पुँल्लिङ्गाः ॥

अथ स्वरान्तस्त्रीलिङ्गाः ।

आपः ॥ आदन्तादावन्तात्परस्य सेर्लोपो भवति ॥ गङ्गा ॥ **औ ॥** आदन्तादावन्तात्परस्य औ ईर्भवति ॥ गङ्गे । गङ्गाः ॥ **धिरीः ॥** आदन्तादावन्तात्परो धिरीर्भवति ॥ हे गङ्गे । गङ्गाम् । गङ्गे । गङ्गाः ॥ **टौसोरे ।** आदन्तस्यावन्तस्य टौसोः परयोरेत्वं भवति ॥ गङ्गया ॥ **ङितां यट् ॥** आदन्तादावन्तात्परेषां ङेङसिङसूङीनां यडागमो भवति ॥ गङ्गायै । गङ्गायाः । गङ्गायाः । गङ्गयोः । गङ्गानाम् ॥ **आम्ङे ॥** आदन्तादावन्तात्परस्य ङेरामादेशो भवति ॥ गङ्गायाम् । गङ्गयोः । गङ्गासु ॥ एवं श्रद्धामेधादुर्गादयः ॥ **अम्बार्थानां द्विस्वराणां धौ ह्रस्वः ॥** हे अम्ब । हे अक्क । हे अल्ल । शेषं गङ्गावत् । द्विस्वराणामिति किम् । हे अम्बाडे । हे अम्बाले । हे अम्बिके । **यटोऽच्च ॥** सर्वादेः परस्य यट् । सुडागमो भवति ॥ पूर्वस्य चापोऽकारः ॥ सर्वस्याः । सर्वस्याः । सर्वयोः । सर्वासाम् । सर्वस्याम् । एवं विश्वादयोऽप्यावन्ताः ॥ जरा । जरसौ । जरे । जरसः । जराः । **दिक्समासे बहुव्रीहौ सर्वादेर्वा सर्वकार्यम् ॥** दक्षिणपूर्वस्यै । दक्षिणपूर्वायै । उत्तरपूर्वस्याः । उत्तरपूर्वायाः । अन्तरस्यै शालायै बाह्यायै इत्यर्थः । अपुरीत्यु-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

क्तेर्नेह । अन्तरायै नगर्यै । द्वितीयस्यै । द्वितीयायै । तृतीयस्यै । तृतीयायै । नासिकायां नस् । नासिका । नासिके । नासिकाः ॥ नासिकाम् । नसः । नासिकाः । नसा । नासिकया । नोभ्याम् । नासिकाभ्याम् । पक्षे पञ्चसु गङ्गावत् । पृतानायाः पृत् । पृतः । पृता । पृद्भ्याम् । निशाया निश् । निशः । निशा ॥ छशष-राजादेः षः ॥ छकारान्तस्य शकारान्तस्य षकारान्तस्य राज्यज्सृज्मृज्भ्रस्ज्व्रश्चभ्राजादेश्च षकारो भवति धातोर्झसे परे नाम्नश्च रसे पदान्ते च ॥ षो डः ॥ निड्भ्याम् । निड्भिः । निट्त्सु । निट्सु । निशासु । केचित्तु धातोरेव षत्वमाहुः ॥ तन्मते तु झबे जबा इति जकारः । निज्भ्याम् । निज्भिः । श्चुत्वम् । निच्षु । निशासु । गोपाः । सोमपावत् ॥ बुद्धिः । बुद्धी । बुद्धयः । हे बुद्धे । बुद्धिम् । बुद्धी । बुद्धीः । बुद्ध्या । इदुद्भ्याम् ॥ स्त्रियां वर्तमानाभ्यामिकारोकाराभ्यां परेषां ङितां वचनानां वाडागमो भवति ॥ बुद्ध्यै । बुद्धये । बुद्ध्याः । बुद्धेः । बुद्ध्याः । बुद्धेः । बुद्धीनाम् ॥ "स्त्रियां योः" बुद्ध्याम् । अडागमाभावे आमोऽप्यभावः । बुद्धौ ॥ एवं मतिभूतिधृतिरुच्यादयः ॥ धेनुरज्जुदनुचञ्च्वादयोऽप्येवम् ॥ त्रिचतुरोः स्त्रियां तिसृचतसृवत् ॥ स्त्रियां वर्तमानयोस्त्रिचतुरशब्दयोस्तिसृ चतसृ । इत्येतावादेशौ भवतो विभक्तौ । ऋकारश्च ऋकारवत् ॥ ततोऽरारुकारा न भवन्ति । "सेरा" "धेरर्" तु भवति । तिस्रः २ । तिसृभिः । तिसृभ्यः । २ ॥ न तिसृचतस्रोर्नामि दीर्घः ॥ तिसृणाम् ॥ स्त्रियामिति

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

त्रिचतुरोर्विशेषान्नेह । प्रियास्त्रयः प्रियाणि त्रीणि वा यस्याः सा प्रियत्रिः बुद्धिवत् । आमि । प्रियत्रयाणाम् । यदा स्त्रियां मुख्यौ लिङ्गान्तरे गौणौ तदैतौ स्तः । प्रियास्तिस्रो यस्य स प्रियतिसा । प्रियतस्रौ । प्रियतिस्रः । हे प्रियतिसः । नाम्शसोरल्लोपः ॥ प्रियतिस्रम् । प्रियोस्तिस्रो यस्य कुलस्य तत् कुलं प्रियत्रि ॥ प्रियतिसृणी । प्रियतिसृणि । "ख्वृणां नपुंसके धौ गुणो वा" । हे प्रियतिसः । हे प्रियतिसृ ॥ टादौ स्वरे ॥ टादाविति पुंवत् ॥ नामिनः स्वरे ॥ प्रियतिसृणा । प्रियतिस्रा । द्वेरत्वे सत्याप् । द्वे । द्वे । द्वाभ्याम् ३ ॥ द्वयोः २ ॥ "ह्रसेपः सेर्लोपः" ॥ नदी । नद्यौ । नद्यः । हे नदि । नदीम् । नद्यौ । नदीः । "ङितामट्" ॥ नद्यै । नद्याः । नदीनाम् । नद्याम् । एवं ब्राह्मणीसखीकुमारीगौर्यादयः ॥ लक्ष्मीः । अनीवन्तत्वान्न सिलोपः । "धौ ह्रस्वः" ॥ हे लक्ष्मि । शेषं नदीवत् ॥ एवमवीतन्त्रीप्रभृतयः ॥ ईबन्तत्वात्सिलोपः । स्त्री ॥ स्त्रीभ्रुवोः ॥ स्त्रीशब्दस्य भ्रूशब्दस्य चेयुवौ भवतः स्यादौ स्वरे परे ॥ स्त्रियौ । स्त्रियः । हे स्त्रि ॥ वामृशसि ॥ अमि शसि च परे स्त्रीशब्दस्य वा इय् भवति ॥ स्त्रियम् । स्त्रीम् । स्त्रियः । स्त्रीः । स्त्रिया । स्त्रीणाम् । स्त्रियमतिक्रान्तोऽतिस्त्रिः । "अन्यार्थे" अतिस्त्रियौ ॥

एनाम्भवौत्वनुड्भिः पूर्वस्थैः पुंसि बाध्यते ।
क्लीबे नुमा च स्त्रीशब्दस्येय् इत्यवधार्यताम् ॥

अतिस्त्रयः । हे अतिस्त्रे । अतिस्त्रियम् । अतिस्त्रिम् । अतिस्त्रियौ ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

अतिस्त्रियः। अतिस्त्रीन्। अतिस्त्रिणा। अतिस्त्रये। अतिस्त्रेः। अतिस्त्रियोः। अतिस्त्रीणाम्। अतिस्त्रौ। अतिस्त्रियोः अतिस्त्रिषु॥

ओस्यौकारे च नित्यं स्यादम्शसोस्तु विभाषया।
इयादेशस्तु नान्यत्र स्त्रियाः पुंस्युपसर्जने॥

क्लीबे तु नुम्। अतिस्त्रि। अतिस्त्रिणी। अतिस्त्रीणि। अतिस्त्रिणा। अतिस्त्रये। अतिस्त्रिणे। अतिस्त्रेः। अतिस्त्रिणः। अतिस्त्रेः। अतिस्त्रिणः। अतिस्त्रियोः। अतिस्त्रिणोः। अतिस्त्रीणाम्। अतिस्त्रौ। अतिस्त्रिणि॥ "इकोऽचि विभक्तौ नपुंसके धौ गुणो वा वक्तव्यः" हे अतिस्त्रे। हे अतिस्त्रि॥ स्त्रियां तु प्रायेण पुंवत्। अतिस्त्रिः। अतिस्त्रियौ। अतिस्त्रियः। शसि अतिस्त्रीः। अतिस्त्रिया॥"इदुद्भ्याम्"॥ अतिस्त्रियै। अतिस्त्रये। अतिस्त्रियाः। अतिस्त्रेः २। अतिस्त्रीणाम्। अतिस्त्रियाम्। अतिस्त्रौ॥ श्रीः। श्रियौ। श्रियः। हे श्रीः (येयुवः) इयुवन्ताद् ङितामड् वा स्त्रीं विना॥ श्रिये श्रियै। श्रियाः। श्रियः। इयुवन्तादामो नुड् वा स्त्रियाः तु नित्यम्। श्रीणाम्, श्रियाम्। श्रियि, श्रियाम्॥ एवं ह्रीधीप्रभृतयः॥ एवं भ्रूप्रभृतयः॥ प्रधीशब्दस्य तु लक्ष्मीशब्दवद्रूपम्। केषांचिन्मते तु पुंवत्। प्रकृष्टा धीरिति विग्रहे तु लक्ष्मीवत्। अमि शसि च प्रध्यम्। प्रध्यः। सुष्ठु धीर्यस्याः सुष्ठु ध्यायति वेति विग्रहे सुधीः। श्रीवत्। केषांचिन्मते पुंवत्। सुष्ठु धीरिति विग्रहे तु श्रीवदेव॥ ग्रामणीः पुंवत्॥ एवं खलप्वादिः॥ ऋन ईप्॥ नकारान्तादृकारान्तादणन्ताच्च स्त्रियामीप्प्रत्ययो भवति॥ क्रोष्ट्री।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

क्रोष्ट्र्यौ ॥ नदीवत् ॥ वधूजम्ब्वादयो नदीवत् ॥ पुनर्भूः ॥ य्वौ वा ॥ पुनर्भ्वौ । हे पुनर्भु ॥ पुनर्भ्वौ ॥ पुनर्भूणाम् । पुनर्भ्वाम् ॥ 'भेक्यां पुनर्नवायां स्त्री वर्षाभूर्दर्दुरे पुमान्' ॥ हे वर्षाभु ॥ स्वयंभूः पुंवत् ॥ नकारान्तसंख्यायाः स्वसृतिसृचतसृननान्दृदुहितृयातृमातृभ्यश्च नेवापौ ॥ माता पितृवत् ॥ स्वसा कर्तृवत् । शासि मातॄः । स्वसॄः ॥ राः पुंवत् ॥ नौग्लौवत् ॥ इति स्वरान्ताः स्त्रीलिङ्गाः ।

अथ स्वरान्तनपुंसकलिंगाः ।

अतोऽम् ॥ अकारान्तान्नपुंसकलिङ्गात्परयोः स्वमोरम् भवत्यधौ ॥ कुलम् ॥ ईमौ ॥ नपुंसकलिङ्गात्पर औरीकारमापद्यते ॥ कुले ॥ जश्शसोः शिः ॥ नपुंसकलिङ्गात्परयोर्जश्शसोः शिर्भवति ॥ नुमयमः ॥ नपुसंकस्य नुमागमो भवति शौ परे ॥ यमप्रत्याहारान्तस्य न । मिदन्त्यात्स्वरात्परः । नोपधायाः ॥ नान्तस्योपधाया दीर्घो भवति शौ पञ्चस्वाधिषु नामि च इति न ॥ कुलानि । हे कुल । शेषं देववत् । एवं मूलफलादयः ॥ श्त्वन्यादेः ॥ अन्यादेः क्लीबात्परयोः स्यमोः श्तुर्भवति ॥ वावसाने ॥ अवसाने वर्तमानानां झसानां जवा भवन्ति चपा वा ॥ अन्यत् । अन्यद् । अन्ये । अन्यानि ॥ अन्यादेर्धेर्लोपो न ॥ हे अन्यत् । अन्यतरत् । इतरत् । कतरत् । कतमत् ॥ एकतरस्य श्तुर्न ॥ एकतरम् । शेषं सर्ववत् ॥ सेरमादेशे सन्निपातपरिभाषया न जरस् । अजरसं । अजरसी । अजरे । अजराणि ॥ न्सम्महतोऽधौ

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

दीर्घः शौ च ॥ न्सन्तस्याप्शब्दस्य महच्छब्दस्य च दीर्घो भवति पञ्चस्वघिषु शौ च ॥ अजरांसि । अमि लुकोऽपवादमम्भावं बाधित्वा परत्वाज्जरस् । ततः सन्निपातपरिभाषया न लुक् । अजरसम् । अजरसी । अजरे । अजरांसि । अजराणि ! शेषं निर्जरवत् । हृदयोदकास्यमांसानां हृद् उदन् आसन् मांस्॥हृन्दि । हृदा । हृद्भ्याम् ॥ उदानि । उद्ना । उदभ्याम् ॥ आसानि ॥ आस्ना । आसभ्याम् ॥ मांसि । मांसा । मान्भ्याम् ॥ **नपुंसकस्य ह्रस्वः ॥** नपुंसकस्य ह्रस्वो भवति ॥ श्रीपं कुलवत् ॥ **नपुंसकात्स्यमोर्लुक् ॥** अस्थि ॥**ऱ्वृणां नपुंसके धौ गुणो वा ॥** हे अस्थे । हे अस्थि ॥ **नामिनः स्वरे ॥** नाम्यन्तस्य नपुंसकस्य नुमागमो भवति स्यादौ स्वरे ॥ अस्थिनी ॥ **अच्चास्थ्नां शसादौ ॥** शसादौ स्वरेऽस्थ्यादीनां नुमागम इकारस्य चाकारः । अल्लोपः स्वरेऽम्वयुक्ताच्छसादौ ॥ अस्थ्ना । अस्थ्ने । अस्थ्नः । अस्थ्नोः । अस्थ्नाम् ॥ वेङ्योः । अस्थ्नि । अस्थनि ॥ एवं दधिसक्थ्यक्षिशब्दास्तदन्तस्यापीष्टः ॥ प्रियास्थ्ना । अतिदध्ना ॥ वारि । वारिणी । वारीणि । आमि नुट् । वारीणाम् ॥ "नपुंसकस्य ह्रस्वः"। ग्रामणि ॥ **टादावुक्तपुंस्कं पुंवद्वा ॥** उक्तपुंस्कं नाम्यन्तं नपुंसकलिङ्गं टादौ स्वरे परे पुंवद्वा भवति ॥ ग्रामण्या ग्रामणिना । ग्रामणीनाम् । ग्रामण्याम् । ग्रामणिनि । ग्रामण्याम् ॥ प्रधि । प्रध्या । प्रधिना ॥ सुधि । सुधिया । सुधिना ॥ मधु । हे मधो । हे मधु । एवमम्ब्वादयः॥सानु । सानुनी । स्नूनि । सानूनि । स्नुना । सानुना ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

स्नुभ्याम् ॥ प्रियक्रोष्टु । प्रियक्रोष्टुनी । प्रियक्रोष्टूनि । प्रियक्रोष्ट्रा । प्रियक्रोष्टुना । प्रियक्रोष्ट्रे । प्रियक्रोष्टवे । प्रियक्रोष्टुने । प्रियक्रोष्टुः । प्रियक्रोष्टोः । प्रियक्रोष्टुनः ॥ सुलु । सुलुनी । सुलूनि । सुल्वा । सुलुना । एवं खलप्वादयः ॥ धातृ । धातृणी । धातॄणि । हे धातः हे धातृ ॥ एवं ज्ञातृकर्त्रादयः ॥ ह्रस्वादेशे सन्ध्यक्षराणामिकारोकारौ ॥ अतिरि । अतिराया । अतिरिणा । अतिराये । अतिरिणे । अतिराभ्याम् ॥ अतिरिणि । अतिरासु ॥ प्रद्यु । प्रद्युना । प्रद्यवा ॥ उपगुना । उपगवा । अतिनु । अतिनुना । अतिनावा ॥ इति स्वरान्तनपुंसकलिङ्गाः ॥

अथ हसान्तपुँल्लिङ्गाः।

अनडुहश्च ॥ पुंसि पञ्चसु शौ चानडुह आमागम ईपि वा ॥ सावनडुहः ॥ अनडुहः सौ नुम् ॥ संयोगान्तस्य लोपः । स्यादौ रसे पदान्ते च ॥ सभिन्नस्य रान्न ॥ अनड्वान् । अनड्वाहौ । अनड्वाहः ॥ धावम् ॥ चतुरनडुहोर्धावमागमो भवति ॥ आम्न ॥ हे अनड्वन् ॥ वसां रसे ॥ वसुस्रंसुध्वंसुभ्रंस्वनडुहां दत्वं भवति रसे पदान्ते च ॥ अनडुद्भ्याम् । अनडुत्सु ॥ दादेर्घः ॥ आद्योच्चारणे दादेर्हकारस्य घत्वं भवति धातोर्झसे नाम्नश्च रसे पदान्ते च ॥ आदिजबानां झभान्तस्य झभाश्च स्ध्वोः ॥ धातोर्झभान्तस्यावयवस्यादौ वर्तमानानां जबानां झभा भवन्ति सकारे ध्वशब्दे नाम्नश्च रसे पदान्ते च ॥ धुक् । धुग् । दुहौ । दुहः ॥ धुग्भ्याम् । धुक्षु ॥ आद्योच्चारणे किम् । दाम लिह्यतीति दामलिट् । दामलिड् । दामलिड्भ्याम् । दामलिट्सु । दामलिट्त्सु । अवयवस्य किम् । गर्दभमाचष्टे गर्दभय-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

तीति गर्धप् । गर्दभौ । गर्धब्भ्याम् । गर्धप्सु ॥ हो ढः ॥ हकारस्य ढत्वं भवति धातोर्झसे परे नाम्नश्च रसे पदान्ते च ॥ लिट् । लिड् । लिहौ । लिहः । लिट्सु । लिट्त्सु ॥ द्रुहादेर्वा ॥ द्रुहमुहस्नुहस्निहां वा घत्वम् । ध्रुक् ध्रुग् । ध्रुट् ध्रुड् । द्रुहौ । द्रुहः । ध्रुग्भ्याम् ध्रुड्भ्याम् । ध्रुक्षु ध्रुट्सु । ध्रुट्त्सु ॥ एवं मुहस्नुहस्निहः । विश्ववाट् । विश्ववाड् ॥ वाहो वौ शसादौ स्वरे ॥ वाहो वकारस्यौ भवति शसादौ स्वरे परे तद्भितयस्वरयोरीपीकारे च ॥ विश्वौहः । विश्वौहा । विश्ववाड्भ्याम् । विश्ववाट्सु । विश्ववाट्त्सु ॥ सहेः साढि ॥ साढिरूपे सति सहेः सस्य षो भवति ॥ तुराषाट् । तुराषाड् । तुरासाहौ । तुरासाहः । तुराषाड्भ्याम् । तुराषाट्सु ॥ इति हान्ताः । दिव औ ॥ दिवो नाम्न औकारादेशो भवति सौ परे ॥ सुद्यौः । सुदिवौ ॥ ऊरसे ॥ दिव उदादेशो भवति रसे पदान्ते च ॥ सुद्युभ्याम् । सुद्युषु ॥ इति वान्ताः ॥ चतुर्शब्दो नित्यं बहुवचनान्तः ॥ चतुराम्शौ च ॥ चतुर्शब्दस्यामागमो भवति पञ्चसु शौ च न त्वीति ॥ चत्वारः । चतुरः । चतुर्भिः ॥ रः संख्यायाः ॥ रेफान्तसंख्यायाः परस्यामो नुडागमो भवति ॥ णत्वं द्वित्वं च ॥ चतुर्ण्णाम् ॥ चतुर्षु ॥ प्रियाश्चत्वारः प्रियाणि वा चत्वारि यस्यासौ प्रियचत्वाः । हे प्रियचत्वः । प्रियचत्वारौ । प्रियचत्वारः । प्रियचतुरः । गौणत्वे नुट् न ॥ स्वार्थावच्छिन्नपरार्थावलम्बनं गौणत्वम् ॥ प्रियचतुराम् ॥ कमलं कमलां वाऽऽचक्षाणः कमल् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

कमलौ । कमलः ॥ फल् । फलौ । फलः । फल्भ्याम् ॥ इति लान्ताः । **मो नो धातोः ॥** मान्तस्य धातोर्मस्य नो भवति झसे पदान्ते च ॥ **वमयोश्च** ॥ प्रशान् । प्रशामौ । प्रशामः । प्रशान्भ्याम् । प्रशान्सु ॥ कः । कौ । के ॥ शेषं सर्ववत् । **इदमोऽयं पुंसि** ॥ इदमः पुंसि सावयम् भवति ॥ अयम् ॥ **दस्य मः** ॥ त्यदादेर्दकारस्य मत्वं भवति स्यादौ ॥ इमौ । इमे । त्यदादेः संबोधनाभावः ॥ इमम् । इमौ । इमान् । **अन टौसोः** ॥ इदमोऽनादेशो भवति टौसोः परयोः ॥ अनेन ॥ **स्भ्यः** ॥ सकारे भकारे च परे इदमोऽकारो भवति कृत्स्नस्य ॥ "अद्भिः" ॥ आभ्याम् ॥ **भिस् भिस्** ॥ इदमदसोर्भिसु भिसेव भवति न भकारस्याकारः ॥ एभिः । अस्मै । अस्मात् । अस्य । अनयोः । एषाम् । अस्मिन् । एषु ॥ **इदमेतदोरन्वादेशे द्वितीयाटौःस्वेनद्वा** ॥ एनम् । एनौ । एनाम् ॥ एनेन । एनयोः । किंचित्कार्यं विधातुमुपात्तस्य कार्यान्तरं विधातुं पुनरुपादानमन्वादेशः। यथाऽनेन व्याकरणमधीतम् एनं छन्दोऽध्यापय ॥ "नोपधायाः" ॥ "नाम्नो नो लोपश् धौ" । राजा । राजानौ । राजानः । हे राजन् ॥ "अल्लोपः स्वरेऽम्वयुक्ताच्छसादौ" ॥ श्चुत्वम् ॥ **जञोर्ज्ञः** ॥ जकारञकारयोर्योगे ज्ञो भवति ॥ राज्ञः । राज्ञा । राजभ्याम् । नलोपाशि न विभक्तिकार्यं पञ्चस्विति ज्ञापकात् । राजभिः ॥ "वेङ्योः" ॥ राज्ञि । राजनि । राज्ञोः । राजसु ॥ एवं वृषादयः ॥ यज्वनः । यज्वना ॥ आत्मनः । आत्मना ॥ प्रतिदिवा । प्रतिदिवानौ

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

अल्लोपे कृते ॥ **र्वोर्विहसे** ॥ धातोरिदुतोर्दीर्घो भवति रेफवकारयोर्हसपरयोः ॥ प्रतिदीव्नः । प्रतिदीव्ना । प्रतिदिवभ्याम् ॥ **श्वादेः** ॥ श्वादेर्व उत्वं प्राप्नोति शसादौ स्वरे ईपीकारे च ॥ शुनः । शुना । श्वभ्याम् ॥ यूनः । यूना । युवभ्याम् ॥ मघवा । मघवानौ । मघवानः । मघोनः । मघोना ॥ **अर्वणस्त्रसावनञः** ॥ नञा रहितस्यार्वन्नन्तस्य तृ इत्यन्तादेशः स्यान्न तु सौ ॥ **उृितो नुम्** ॥ उकारानुबन्धस्य ऋकारानुबन्धस्य च नुमागमो भवति पुंसि पञ्चसु ॥ अर्वन्तौ । अर्वन्तः ॥ अर्वन्तम् । अर्वन्तौ । अर्वतः ॥ अर्वता । अर्वद्भ्याम् । अनञः किम् । अनर्वाणौ । असौ किम् । अर्वा ॥ **इतोऽत्पञ्चसु** ॥ पथिन्मथिन्ऋभुक्षिन्छब्दानामिकारस्याकारादेशो भवति पुंसि पञ्चसु शौ च ॥ **थो न्थ्** ॥ पथिमथोस्थस्य न्थ् स्यात् पुंसि पञ्चसु शौ च ॥ **आ सौ** ॥ पथिमथिऋभुक्षां टेरात्वं भवति सौ ॥ पन्थाः । पन्थानौ । पन्थानः । हे पन्थाः । पन्थानम् ॥ **पथां टः** ॥ पथिमथिऋभुक्षां टेर्लोपो भवति शसादौ स्वरे ईपीकारे च ॥ पथः । पथा । पथिषु ॥ एवं मन्थाः । ऋभुक्षाः । स्त्रियां नान्तत्वादीप् । सुपथी । सुमथी । अनृभुक्षी सेना । क्लीबे शोभनः पन्थाः यस्मिन् वने तत्सुपथि वनम् ॥ **धौ नपुंसकानां नस्य लोपो वा** ॥ हे सुपथिन् । हे सुपथि । सुपथी । सुपन्थानि ॥ **इनां शौ सौ** ॥ इन् हन् पूषन् अर्यमन् इत्येतेषाम् शौ सौ चाधौ परे उपधाया दीर्घो भवति नान्यत्र ॥ दण्डी । हे दण्डिन् । दण्डिनौ । दण्डिनः ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

एवं कलिन्हलिन्यशस्विन्वाग्मिन्प्रभृतयः ॥ वृत्रहा । वृत्रहणौ । वृत्रहणः ॥ हनो घ्ने ॥ हनो हकारस्य घो भवत्यव्यवधाने नकारे ञिति णिति च परे ॥ **घसंयोगे णत्वं न ॥** वृत्रघ्नः । वृत्रघ्ना । वृत्रहभ्याम् ॥ एवं पूषन्नर्यमन् ॥ संख्याशब्दाः पञ्चन्प्रभृतयो बहुवचनान्तास्त्रिषु सरूपाः ॥ **जश्शसोर्लुक् ॥** षकारनकारान्तसंख्यायाः परयोर्जश्शसोर्लुक् ॥ पञ्च । पञ्चभिः । पञ्चभ्यः ॥ **ष्णः ॥** षकारनकारान्तसंख्यायाः परस्यामो नुडागमो भवति ॥ पञ्चानाम् । परमपञ्चानाम् ॥ गौणत्वे न लुग्नुटौ । प्रियपञ्चा । प्रियपञ्चानौ । प्रियपञ्चानः ॥ प्रियपञ्च्ञः । प्रियपञ्च्ञा ॥ एवं सप्तन्नवन्दशन्प्रभृतयः ॥ **अष्टनो डौ ॥** अष्टन्शब्दात्परयोर्जश्शसोर्वा डौ भवति ॥ अष्टौ । अष्ट । अष्टौ ॥ अष्ट ॥ **वासु ॥** अष्टनः सकारभकारादिषु विभक्तिषु वात्वं भवति ॥ अष्टाभिः । अष्टभिः । अष्टाभ्यः । अष्टभ्यः २ । अष्टानाम् ॥ प्रिया अष्टौ यस्यासौ प्रियाष्टा । प्रियाष्टानौ प्रियाष्टानः । प्रियाष्ट्नः । प्रियाष्ट्ना । प्रियष्टाभ्याम् ॥"प्रियाष्ट्नो राजवत्सर्वं हाहावच्चापरं हसे"॥ सुगण् । सुगणौ । सुगणः । सुगणम् । सुगणौ । सुगणः । सुगणट्सु ॥ भुत् । भुद् । बुधौ । बुधः । भुद्भ्याम् । भुत्सु ॥ राक् । राग् । राघौ । राघः । राग्भ्याम् । राक्षु ॥ सुककुप् । सुककुब् । सुककुभौ । सुककुभः । सुककुभम् । सुककुप्सु ॥ **युजेः पञ्चसु नुम् न समासे इति च ॥ दिशाम् ॥** दिश्दृश्स्पृश्दधृष्ऋत्विज्क्रुञ्च्युज्भुज्सृज्अञ्च्उष्णिहादीनां कुत्वं स्यादौ एसे पदान्ते च ॥ "संयोगान्तस्य लोपः" युङ् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

युञ्जौ । युञ्जः । युञ्जम् । युञ्जौ । युजः । युजा । युग्भ्याम् । समासे तु सुयुक् ॥ चोः कुः ॥ चवर्गस्य कवर्गो भवति धातोर्झसे नाम्नश्च रसे पदान्ते च । समाध्यर्थस्य नुम्न । युक् ॥ खन् ॥ खञ्जौ । खन्भ्याम् । खन्सु ॥ "छशषराजादेः षः" ॥ सम्राट् । सम्राड् । सम्राजौ । सम्राजः । देवेट् । देवेड् । देवेजौ । देवेजः ॥ परिमृट् । परिमृड् । परिमृजौ । परिमृजः ॥ विश्वसृट् । विश्वसृड् । विश्वसृजौ ॥ विश्वस्य वसुराटोर्दीर्घः । विश्वावसुः । विश्वाराट् । विश्वाराड् । विश्वराजौ । विश्वाराड्भ्याम् । विश्वाराट्त्सु । विश्वाराट्सु ॥ स्कोराद्योश्च ॥ संयोगाद्योः सकारककारयोर्लोपो भवति धातोर्झसे नाम्नश्च रसे पदान्ते च ॥ भृट् भृड् । भृज्जौ । भृज्जः ॥ वृक्षवृट् । वृक्षवृड् । वृक्षवृश्चौ ॥ विभ्राट् । विभ्राड् । विभ्राजौ । विभ्राड्भ्याम् । विभ्राट्सु । ऋत्विक् । ऋत्विग् । ऋत्विजौ । ऋत्विक्षु ॥ ऊर्क् ऊर्ग् । ऊर्जौ । ऊर्क्षु । स्तः ॥ त्यदादेस्तस्य सत्वं भवति सौ परे ॥ स्यः । त्यौ । त्ये ॥ सः । तौ । ते ॥ परमसः । संज्ञायां गौणत्वे चात्वसत्वे न । त्यत् । त्यद् । त्यदौ ॥ अतित्यत् । अतित्यद् । अतित्यदौ ॥ यः । यौ । ये ॥ एषः । एतौ । एते । अन्वादेशे एनम् । एनौ । एनान् । एनेन । एनयोः ॥ अग्निमत् । अग्निमद् । अग्निमथौ । अग्निमद्भ्याम् । अग्निमत्सु । प्रत्यञ्चतीति क्विपि कृते ॥ नो लोपः ॥ धातोर्हसान्तस्योपधाभूतस्य नकारस्य लोपः क्ङिति परे । पूजार्थाञ्चतेर्न ॥ निरुपपदात् कुञ्चेः क्विपि ॥ कुङ् । कुञ्चौ ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

क्रुङ्भ्याम् । क्रुङ्क्षु । क्रुङ्क्षु । क्रुङ्षु ॥ दिशाम् ॥ **अञ्चेः पुंसि पञ्चसु नुम्** ॥ प्रत्यङ् । प्रत्यञ्चौ । प्रत्यञ्चः । प्रत्यञ्चम् । प्रत्यञ्चौ ॥ **अञ्चेर्दीर्घश्च** ॥ नलोप्यञ्चतेरकारस्य लोपः पूर्वस्य च दीर्घः शसादौ स्वरे परे तद्धितयस्वरयोरीपीकारे च ॥ प्रतीचः । प्रतीचा । प्रत्यग्भ्याम् । प्रत्यक्षु ॥ तिर्यङ् । तिर्यञ्चौ । तिर्यञ्चः ॥ **तिरश्चादयः** ॥ तिरश्चादयो निपात्यन्ते शसादौ स्वरे तद्धितयस्वरयोरीपीकारे च ॥ तिरश्चा । तिर्यग्भ्याम् । तिर्यक्षु ॥ उदीचः । उदग्भ्याम् ॥ उदक्षु ॥ पितरमञ्चतीति पित्रङ् । पित्रञ्चौ ॥ **ऋतो दीर्घो न** ॥ पितृचः । पित्रग्भ्याम् । पित्रग्भिः । पित्रक्षु ॥ सध्र्यङ् । सध्रीचः ॥ सम्यङ् समीचः । प्राङ् । प्राचः । पूजायां तु प्रत्यञ्चः । प्रत्यञ्चा । प्रत्यङ्भ्याम् । प्रत्यङ्क्षु । प्रत्यङ्क्षु । प्रत्यङ्षु ॥ उदञ्चः । उदङ्भ्याम् । तिर्यञ्चः । तिर्यङ्भ्याम् ॥ सम्यञ्चः ॥ सध्र्यञ्चः । प्राञ्चः । प्राञ्चा ॥ सहादेः सादिः ॥ अमुमञ्चतीति अमुमुयङ् । अमुमुईचः । अमुमुयग्भ्याम् ॥ अदमुयङ् ॥ अदद्र्यङ् ॥ पूजायां तु अमुमुयञ्चः ॥ अमुमुयङ्भ्याम् ॥ अदमुयञ्चः ॥ अदद्र्यञ्चः ॥ मरुत् । मरुद्भ्याम् ॥ **न्नितो नुम्** ॥ न्सम्महतोऽधौ दीर्घः शौ च ॥ महान् । महान्तौ । महान्तः । हे महन् ॥ **द्विरुक्तानां जक्षादीनां च शतुर्नुम् न शौ वा** ॥ ददत् ॥ एवं जक्षत् । जाग्रत् । दरिद्रत् । चकासत् । शासत् ॥ **अत्वसोः सौ** ॥ अत्वन्तस्य धातुभिन्नासन्तस्य चोपधाया

२

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

दीर्घो भवति सावधौ ॥ भवान् । भवन्तौ । भवन्तः । हे भवन् ॥ चन्द्रमाः । चन्द्रमसौ ॥ अधात्वसन्तस्य किम् । चीवराणि वस्तेऽसौ चीवरवः । शत्रन्तस्य तु अत्वन्तत्वाभावान्न दीर्घः । भवन् । भवन्तौ ॥ पचन् ॥ दीव्यन् ॥ धीमान् । हे धीमन् । धीमन्तौ ॥ मघवान् । मघवन्तौ । मघवद्भ्याम् ॥ गुप् । गुब् । गुपौ । गुपः । गुब्भ्याम् । तादृक् । तादृशौ । तादृशः । तादृक्षु ॥ एवं यादृगादयः ॥ नशेः ॥ को वा पदान्ते स्यादौ झसे च । नक् । नग् । नट् । नड् । नशौ । नशः । नग्भ्याम् । नड्भ्याम् । नक्षु । नट्सु ॥ विट् । विड् । विशौ । विशः ॥ स्पृक् । स्पृग् । स्पृशौ । स्पृशः ॥ घृतस्पृक् ॥ उदकपूर्वस्य न कुत्वम् । उदकस्पृट् । उदकस्पृड् । उदकस्पृशौ ॥ दधृक् । दधृग् । दधृषौ ॥ दधृक्षु ॥ रत्नमुट् । रत्नमुड् । रत्नमुषौ । रत्नमुड्भ्याम् ॥ षष्ठ्दो नित्यं बहुवचनान्तस्त्रिषु सरूपः ॥ जश्शसोर्लुक् ॥ षट् । षड् ॥ डू णः ॥ डकारस्य णो भवति नामि परे ॥ षण्णाम् । षट्सु । षट्त्सु ॥ परमषट् । परमषड् । परमषण्णाम् ॥ गौणत्वे तु प्रियषट् । प्रियषषः । प्रियषषा ॥ दोषां रः ॥ दोषादीनां रो भवति रसे पदान्ते च ॥ दोः । दोषौ । शसादौ वा दोषन् । दोष्णः । दोर्भ्याम् । दोषभ्याम् ॥ विसर्गनुमूस्थानिकानुस्वारव्यवधानेऽपि ॥ क्विलात्परस्य सस्य षः ॥ दोःषु । दोष्षु । दोषसु ॥ "य्वोर्वं हसे" ॥ पिपठीः । पिपठिषौ । पिपठीर्भ्याम् । पिपठीःषु ॥ विविट् । विविड् । विविक्षौ । विविक्षः ॥ तट् । तड् । तक्षौ ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

तक्षः ॥ गोरट् । गोरड् । गोरक्षौ । गोरक्षः ॥ तक्षिरक्ष्योः संयोगान्त-लोप इत्येके । तक् । तग् ॥ गोरक् । गोरग् ॥ २ ॥ **कलोपे कुत्वम् सिद्धम्** ॥ पिपक् । पिपग् । पिपक्षौ । पिपक्षः । पिपक्षु ॥ एवं विवक् ॥ दिधक् ॥ सुपीः । सुपिसौ । सुपीष्षु ॥ एवं तुसूः ॥ विद्वान् । विद्वांसौ । विद्वांसः । हे विद्वन् ॥ **वसोर्व उः** ॥ वसोर्वकारस्य उत्वं भवति शसादौ स्वरे तद्धितयस्वरमतुब्वीपीकारे च ॥ विदुषः । विद्वद्भ्याम् । विद्वत्सु ॥ सेदिवान् । वस्योत्वे इडभावः । सेदुषः । सेदिवद्भ्याम् ॥ ऊषिवान् ॥ ऊषुषः । ऊषिवद्भ्याम् ॥ शुश्रुवान् । श्रुधातोः शुश्रुवुषः । शुश्रुवद्भ्याम् ॥ महच्छब्दसाहचर्यादधातोर्न्स् गृह्यते । नेह—सुहिन् । सुहिन्सौ । सुहिन्भ्याम् । सुहिन्सु ॥ ध्वत् । ध्वंसौ । "तसां रसे" ॥ ध्वद्भ्याम् ॥ एवं स्रत् ॥ **पुंसोऽसुङ्** ॥ पुंसोऽसुङादेशः पुंसि पञ्चसु शौ च ॥ पुमान् । पुमांसौ । पुमांसः । हे पुमन् । पुंसः । पुंभ्याम् । पुंसु ॥ वेधाः । वेधसौ । हे वेधः । वेधोभ्याम् ॥ **उशनसाम्** ॥ उशनस्पुरुदंशसनेहसां सेरधेर्डा ॥ उशनाः । उशनसौ । उशनसः ॥ **उशनसां धौ नान्तता अदन्तता वा वाच्या** ॥ हे उशनन् । हे उशन । हे उशनः । उशनोभ्याम् । उशनस्सु ॥ **सौ सः** ॥ अदसो दस्य सः सौ ॥ सेरौ ॥ अदसः सेरौ भवति ॥ असौ । दस्य मः ॥ **मादू** ॥ असदो मात्परस्य उश्च ऊश्च भवति ॥ अमू । जसि ॥ **एरी बहुत्वे** ॥ अदस एकारस्येर्भवति बहुत्वे सति ॥ अमी । अमुम् । अमू । अमून् । अमुना ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

अमूभ्याम् । अमीभिः । अमुष्मै । अमुष्मात् । अमुष्य । अमुयोः । अमीषाम् । अमुष्मिन् । अमुयोः । अमीषु ॥ इति हसान्ताः पुँल्लिङ्गाः ॥

अथ हसान्तस्त्रीलिंगाः ।

नहो धः ॥ नहो हस्य धो भवति धातोर्झसे परे नाम्नश्च रसे पदान्ते च ॥ उपानत् । उपानद् । उपानद्भ्याम् । उपानत्सु ॥ उष्णिक् । उष्णिग् । उष्णिहौ । उष्णिहः । उष्णिग्भ्याम् । उष्णिक्षु ॥ द्यौः । दिवौ । द्युभ्याम् । द्युषु । गीः । गिरौ । गीर्भ्याम् । गीर्षु ॥ एवं पुर्धुरादयः ॥ चतस्रः । प्रियचत्वाः । प्रियचत्वारौ । प्रियचत्वारः । हे प्रियचत्वः ॥ **इयं स्त्रियाम्** ॥ इदमः स्त्रियामियं सौ । इयम् । इमे । इमाः । अनया । आभ्याम् । आभिः । अस्यै । अस्याः । अनयोः । आसाम् । अस्याम् । आसु ॥ अन्वादेशे एनाम् । एने । एनाः । एनया । एनयोः । स्रक् । स्रग् । स्रजौ । स्रग्भ्याम् । स्रक्षु ॥ समित् । समिद् । समिधौ । समिधः । समिद्भ्याम् । समित्सु ॥ स्या । त्ये । त्याः ॥ एवं तद् यद् । एतद् किम् ॥ वाक् । वाग् । वाचौ । वाग्भ्याम् । वाक्षु ॥ ककुप् । ककुब् । ककुभौ । ककुब्भ्याम् । ककुप्सु । त्वक् । त्वग् । त्वचौ । त्वचः। त्वचम् । त्वग्भ्याम् । ऋक् । ऋग् । ऋचौ । ऋचः । ऋचम् । ऋग्भ्याम् । ऋक्षु ॥ अप्शब्दो नित्यं बहुवचनान्तः ॥ आपः । अपः ॥ **भिदपाम्** ॥ अप्शब्दस्य दत्वं भवति भकारादौ विभक्तौ ॥ अद्भिः । अद्भ्यः । अपाम् । अप्सु ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

दिक् । दिग् । दिशौ । दिशः । दिग्भ्याम् । दिक्षु । त्विट् । त्विड् । त्विषौ । त्विषः । दृक् ॥ दृग् । दृशौ । दृशः ॥ सह जुषत इति सजूः । सजुषौ । सजुषः । सजूर्भ्याम् । सजूःषु ॥ आशीः । आशिषौ । आशीर्भ्याम् । आशीःषु ॥ असौ । अमू । अमूः । अमूम् । अमू । अमूः । अमुया । अमूभ्याम् । अमूभिः । अमुष्यै । अमुष्याः । अमूषाम् । अमुष्याम् । अमूषु ॥ इति हसान्तस्त्रीलिङ्गाः ॥

अथ हसान्तनपुंसकलिङ्गाः ।

स्वनडुत् । स्वनडुद् । स्वनडुही । स्वनड्वांहि । पुनस्तद्वत् । शेषं पुंवत् । वाः । वारी । वारि । वार्भ्याम् । वार्षु ॥ " ऊ रसे " विमलद्यु । विमलदिवी । विमलदिवि ॥ किम् । के । कानि ॥ इदम् । इमे । इमानि ॥ " अन्वादेशे " एनत् । एने । एनानि ॥ ब्रह्म । ब्रह्मणी । ब्रह्माणि । हे ब्रह्मन् । हे ब्रह्म ॥ अह्नः ॥ अहन्शब्दस्य सो भवति रसे पदान्ते च ॥ अहः । अह्नी । अहनी । अहानि । अह्ना । अहोभ्याम् ॥ कर्म । कर्मणी । कर्माणि ॥ एवं चर्मन्वर्मन्धन्वनादयः ॥ दण्डि । दण्डिनी । दण्डीनि ॥ स्रग्वि । स्रग्विणी । स्रग्वीणि ॥ वाग्मि । वाग्मिनी । वाग्मीनि ॥ बहुवृत्रहा । बहुवृत्रघ्नी । बहुवृत्रहणी । बहुवृत्रहाणि । बहुपूषा । बहुपूष्णी । बहुपूषणी । बहुपूषाणि । बह्वर्यम । बह्वर्यम्णी । बह्वर्यमणी । बह्वर्यमाणि ॥ असृक् । असृजी । असृञ्जि ॥ शसादौ वाऽसन् । असानि । अस्ना । असभ्याम् ॥ ऊर्क् । ऊर्जी । ऊन्र्जि ॥ बहूर्जो नुम्प्रतिषेधः अन्त्यात्पूर्वो वा नुम् ॥ बहूर्जि । बहूर्ञ्जि ॥ त्यत् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

त्ये । त्यानि ॥ तत् । ते । तानि ॥ यत् । ये यानि ॥ एतत् । एते । एतानि ॥ अन्वादेशे । एनत् । एने । एनानि ॥ बेभित् । बेभिदी । बेभिदि । सयङ्न्तस्य शौ नुम्न ॥ चेच्छित् । चेच्छिदी । चेच्छिदि ।

गवाक्छब्दस्य रूपाणि क्लीबेऽर्चागतिभेदतः ।
असंध्यगागमाल्लोपैर्नवाधिकशतं मतम् ॥
स्यम्सुप्सु नव षड् भादौ षट्के स्युस्त्रीणि जश्शसोः ।
चत्वारि शेषे दशके रूपाणीति विभावय ॥

गवाक्, गवाग्, गोअक्, गोअग्, गोऽक् गोऽग्, गवाङ्, गोअङ्, गोऽङ्, गोची, गवाञ्ची, गोअञ्ची, गोऽञ्ची । गवाञ्चि, गोअञ्चि, गोऽञ्चि । गवाक्षु, गोअक्षु, गोऽक्षु, गवाङ्क्षु, गोअङ्क्षु, गोऽङ्क्षु, गवाङ्ख्षु, गोअङ्ख्षु । गोङ्खु । तिर्यक्, तिरश्ची, तिर्यञ्चि ॥ तिर्यङ्, तिर्यञ्ची, तिर्यञ्चि ॥ यकृत्, यकृती, यकृन्ति । यकानि । यक्ना, यकृता । यकभ्याम्, यकृद्भ्याम् ॥ एवं शकृत् ॥ ददत्, ददती, ददति ददंति ॥ एवं जाग्रदादयः ॥ तुदत् ॥ वादीपोः शतुः ॥ अवर्णान्तात्परस्य शतुर्वा नुमीकारे ईपि च ॥ तुदती, तुदंती । तुदंति । भात्, । भाती, भान्ती, भान्ति ॥ अप्ययोरान्नित्यन् ॥ अप्प्रत्ययप्रत्ययसम्बन्धिनोऽवर्णात्परस्य शतुर्नुम् नित्यमीकारे ईपि च ॥ पचत्, पचन्ती, पचन्ति ॥ दीव्यत्, दीव्यन्ती, दीव्यन्ति ॥ स्वप्, स्वब् । स्वपी ॥"न्सम्महत्" इति दीर्घः ॥ स्वाम्पि । दीर्घो नेत्येके । स्वपि । स्वपा ॥"भिदपाम्" स्वद्भ्याम्, स्वद्भिः, जगत्, जगती, जगन्ति ॥ महत्, महती,

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

महान्ति ॥ धनुः, धनुषी ॥ **न्षपूर्वस्य शौ दीर्घः** ॥ धनूंषि ॥ हविः, हविषी, हवींषि ॥ पयः पयसी, पयांसि ॥ तेजः, तेजसी, तेजांसि ॥ वचः, वचसी, वचांसि ॥ पिपठीः, पिपठिषी । "सयङन्तस्य शौ नुम्न" । पिपठिषि ॥ सुपुम्, सुपुंसी, सुपुमांसि ॥ अदः, अमू, अमूनि ॥ शेषं पुंवत् ॥ इति हसान्तनपुंसकलिङ्गाः ॥

अथ युष्मदस्मत्प्रकरणम् ।

त्वमहं सिना ॥ सिना सहितयोर्युष्मदस्मदोस्त्वमहमित्येतावादेशौ भवतः । यथासंख्येन ॥ त्वम् ॥ अहम् ॥ **युवावौ द्विवचने** ॥ द्व्यर्थवाचिनोर्युष्मदस्मदोर्युवावादेशौ भवतो विभक्तौ ॥ **आमौ** ॥ युष्मदस्मद्भ्यां पर औराम् भवति ॥ युवाम् । आवाम् ॥ **यूयं वयं जसा** ॥ जसा सहितयोर्युष्मदस्मदोर्यूयं वयं भवतः ॥ यूयम् । वयम् ॥ **त्वन्मदेकत्वे** ॥ युष्मदस्मदोस्त्वन्मदौ भवत एकत्वे गम्यमाने ॥ **आम्सुभौ** ॥ युष्मदस्मदोष्टेरात्वं भवति अमि सकारे भिसि च परे ॥ त्वाम् । माम् । युवाम् । आवाम् । त्यदाद्यत्वे शसीति दीर्घः ॥ **शसो नो वक्तव्यः** ॥ युष्मान् । अस्मान् । त्वन्मदादेशे कृते ॥ **ए टाङ्योः** ॥ युष्मदस्मदोष्टेरेत्वं भवति टाङ्योः । त्वया । मया । युवाभ्याम् । आवाभ्याम् । युष्माभिः । अस्माभिः ॥ **तुभ्यं मह्यं ङया** ॥ ङेसहितयोर्युष्मदस्मदोस्तुभ्यं मह्यमेतौ भवतः ॥ तुभ्यम् ॥ मह्यम् ॥ **भ्यसश्भ्यम्** ॥ युष्मदस्मद्भ्यां परो भ्यस् श्भ्यं भवति ॥ शकारो भकारादित्वव्यावृत्त्यर्थः ॥ तेनात्वैत्वे न भवतः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

युष्मभ्यम् । अस्मभ्यम् ॥ ङसिभ्यसोः श्तुः ॥ ङसिसाहचर्यात्पञ्च-म्यां भ्यस् गृह्यते ॥ त्वत् । मत् । युवाभ्याम् । आवाभ्याम् । युष्मत् । अस्मत् ॥ तव मम ङसा ॥ ङसा सहितयोर्युष्मदस्मदो-स्तवममौ भवतः ॥ तव । मम ॥ युवयोः ॥ आवयोः ॥ सुडामः ॥ सामाकम् ॥ युष्मदस्मद्भ्यां परः साम् आकं भवति ॥ युष्माकम् ॥ अस्माकम् । त्वयि । मयि । युवयोः । आवयोः । युष्मासु । अस्मासु ॥

समस्यमाने द्व्येकत्ववाचिनी युष्मदस्मदी ।
समासार्थोऽन्यसंख्यश्चेद्युवावौ त्वन्मदावपि ॥
सिजस्ङेङस्सु परत आदेशाः स्युः सदैव ते ।
त्वाहौ यूयवयौ तुभ्यमह्यौ तवममावपि ॥
एते परत्वाद्बाधन्ते युवावौ विषये स्वके ।
त्वन्मदावपि बाधन्ते पूर्ववद्विषये स्वतः ॥
द्व्येकसंख्यः समासार्थो बह्वर्थे युष्मदस्मदी ।
तयोरद्व्येकतार्थत्वाद्युवावौ त्वन्मदौ न च ॥

त्वां मां वाऽतिक्रान्त इति विग्रहे अतित्वम् । अत्यहम् । गौणत्वे युष्मदस्मदोस्त्यदाद्यत्वं भवति । अतित्वाम् । अतिमाम् । अतियूयम् । अतिवयम् । अतित्वाम् । अतिमाम् । त्वन्मदेकत्वे ॥ "अम्भौ" ॥ अतित्वाम् । अतिमाम् । अतित्वान् । अतिमान् । अतित्वया । अतिमया । अतित्वाभ्याम् । अतिमाभ्याम् । अतित्वाभिः । अति-माभिः । अतितुभ्यम् । अतिमह्यम् । अतित्वाभ्याम् । अतिमाभ्याम् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

अतित्वभ्यम् । अतिमभ्यम् । अतित्वत् । अतिमत् । अतितव । अतिमम । अतित्वयोः । अतिमयोः । अतित्वाकम् । अतिमाकम् । अतित्वयि । अतिमयि । अतित्वासु । अतिमासु ॥ युवामावां वाऽतिक्रान्त इति विग्रहे सिजस्ङेङस्सु प्राग्वत् । अन्यत्र युवावौ । अतित्वम् । अत्यहम् । अतियुवाम् । अत्यावाम् । अतियूयम् । अतिवयम् । अतियुवाम् । अत्यावाम् । अतियुवान् । अत्यावान् । अतियुवया । अत्यावया । अतितुभ्यम् । अतिमह्यम् । अतियुवाभ्याम् । अत्यावाभ्याम् । अतियुवभ्यम् । अत्यावभ्यम् । अतियुवत् । अत्यावत् । अतियुवाभ्याम् । अत्यावाभ्याम् । अतियुवत् । अत्यावत् । अतितव । अतिमम । अतियुवयोः । अत्यावयोः । अतियुवाकम् । अत्यावाकम् । अतियुवयि । अत्यावयि । अतियुवासु । अत्यावासु ॥ युष्मानस्मान्वाऽतिक्रान्त इति विग्रहे सिजस्ङेङस्सु प्राग्वत् । अतित्वम् । अत्यहम् । अतियुष्माम् । अत्यस्माम् ॥ अतियूयम् । अतिवयम् । अतियुष्माम् । अत्यस्माम् ॥ अतियुष्माम् । अत्यस्माम् । अतियुष्मान् । अत्यस्मान् । अतियुष्मया । अत्यस्मया । अतियुष्माभ्याम् । अत्यस्माभ्याम् । अतियुष्माभिः । अत्यस्माभिः । अतितुभ्यम् । अतिमह्यम् । अतियुष्मत् । अत्यस्मत् । अतियुष्माभ्याम् । अत्यस्माभ्याम् । अतियुष्मत् । अत्यस्मत् । अतितव । अतिमम । अतियुष्माकम् । अत्यस्माकम् । अतियुष्मयि । अत्यस्मयि । अतियुष्मासु । अत्यस्मासु ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

युष्मदस्मदोः षष्ठीचतुर्थीद्वितीयाभिस्ते मे वां नौ वस्नसौ ॥ युष्मदस्मदोः षष्ठीचतुर्थीद्वितीयासहितयोर्यथासंख्येनामी आदेशा भवन्ति ॥ तत्रैकवचनेन सह ते मे द्विवचनेन वां नौ बहुवचनेन वस्नसौ ॥ **त्वामामा ॥** अमा सहितयोर्युष्मदस्मदोस्त्वामा एतौ भवतः॥

श्रीशस्त्वावतु मापीह दत्तात्ते मेऽपि शर्म सः ॥
स्वामी ते मेऽपि स हरिः पातु वामपि नौ विभुः ॥ १ ॥
सुखं वां नौ ददात्वीशः पतिर्वामपि नौ हरिः ।
सोऽव्याद्वो नः शिवं वो नो दद्यात्सेव्योऽत्र वः स नः ॥२॥

एकवाक्ये युष्मदस्मदादेशा वक्तव्याः ॥ एकाख्यातं वाक्यम् ॥ तेनेह न । ओदनं पच तव भविष्यति । इह तु स्यादेव । शालीनामोदनं ते दास्यामि ॥ **एते अनन्वादेशे वा ॥** धाता ते तव भक्तोऽस्ति । अन्वादेशे नित्यम् । तस्मै ते नमः ॥ **नादौ ॥** वाक्यादौ पादादौ च वर्तमानयोर्युष्मदस्मदोर्नैते ॥ त्वां पातु । वेदैरशेषैः संवेद्योऽस्मान् कृष्णः सर्वदावतु ॥ **विशेष्यपूर्वं संबोधनेतरपूर्वं संबोधनं च हित्वान्यस्मात्संबोधनात्परयोर्नैते ॥** देवास्मान् पाहि नृहरे विष्णोऽस्मान् रक्ष सर्वदा ॥ **विशेष्यपूर्वात्तु ॥** हरे कृपालो नः पाहि सर्वदा रक्ष देव नः ॥ **चादिभिश्च ॥** च वा ह अह एव एभिर्योगे नैते ॥ आवयोर्युवयोश्चेशो हरिर्मामेव रक्षतु ॥ **अचाक्षुषज्ञानार्थधातुभिर्योगे च न ॥** चेतसा त्वां समीक्षते । भक्तस्तव रूपं ध्यायति ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

चाक्षुषज्ञाने तु भक्तस्त्वा पश्यति चक्षुषा ॥ विद्यमानपूर्वात्प्रथमान्तात्परयोरन्वादेशेऽप्येते वा ॥ भक्तस्त्वमप्यहं तेन हरिस्त्वां त्रायते स माम् । त्वामेति वा ॥ इति युष्मदस्मत्प्रकरणम् ॥

अथाव्ययानि ।

चादिर्निपातः ॥ च । वा । ह । अह । एव । एवम् । नूनम् । पृथक् । शश्वत् । युगपत् । भूयस् । नह । हन्त । विना । नाना । स्वस्ति । अस्ति । दोषा । नक्तम् । मृषा । मिथ्या । मिथस् । अथ । अथो । अहो । ह्यस् । श्वस् । उच्चैस् । शनैस् । ऋधक् । ऋते । आरात् । दिवा । रात्रौ । सायम् । चिरम् । मनाक् । जोषम् । ईषत् । तूष्णीम् । बहिस् । अवस् । समया । निकषा । अद्धा । इद्धा । वत् । उपधा । सामि । सना । सनत् । सनात् । तिरस् । अन्तरा । अन्तरेण । सहसा । अलम् । वषट् । क्षमा । विहायसा । मुधा । पुरा । मिथो । प्रायस् । मुहुस् । सार्द्धम् । साकम् । नमस् । हिरुक् । धिक् । मा । माङ् । अम् । आम् । नेत् । चेत् । उञ् । यत् । सत्यम् । जातु । कम् । शम् । ज्योक् । रहसि । अभीक्ष्णम् । अनेहा । आ । आत् । न्वै । है । रै । किम् । यत् । तत् । इति । एव । हम् । हो । स्वर् । अन्तर् । प्रातर् । पुनर् । सनुतर् । यावत् । तावत् । स्वाहा । स्वधा । तथाहि । खलु । किल । सुष्ठु । दुष्ठु । आदह । **उपसर्गस्वरविभक्तिप्रतिरूपकाश्च** ॥ अवदत्तम् । अहंयुः । हेतौ । स्वयम् । उत् । नञ् । स्वधा । स । अहम् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

अस्मि । वै । शंवट् । दिष्ट्या । अ । आ । इ । ई । उ । ऊ । ऋ । ॠ । ऌ । ॡ । ए । ऐ । ओ । औ । पशु । शु । कम् । यथा । कथाच । पाट् । प्याट् । अङ्ग । हे । है । भोः । अयि । अद्य । विषु । रे । अरे । एकपदे । द्राक् । मङ्क्षु । युत् । आतः । श्रौषट् वौषट् । इत्यादि ॥ तत्रादिर्विभक्त्यर्थे निपात्यते । तस्मिन्निति तत्र । अस्मिन्निति अत्र । यस्मिन्निति यत्र । कस्मिन्निति कुत्र । क्व । कुह । तेन प्रकारेण तथा । सर्वथा । कथम् । इत्थम् । अस्मादिति इतः । एत-स्मादित्यतः । ततः । यतः । सर्वतः । कुतः । बहुतः ॥ सार्वविभक्ति-कस्तसित्येके । आदितः । मध्यतः । अन्ततः । पूर्वस्मि-न्निति पुरः । पुरस्तात् । अधः । अधस्तात् । उपरि । उपरिष्टात् । परस्मि-न्निति परेण । दाक्षिणेन । दक्षिणा । दक्षिणतः । उत्तरतः । दक्षि-णस्यां दिशि दूरे दक्षिणा । दक्षिणाहि । राजाधीनं राजसात् । सर्वं भस्म भस्मसात् । उरी ऊरी उररी विस्ताराङ्गीकारयोः । सद्यादिः काले । समानेऽह्नि सद्यः । अद्य । अधुना । इदानीम् । तस्मिन् काले तदा । यदा । कदा । सर्वदा । एकदा । अन्यदा । सपदि । सांप्रतम् । झटिति । तूर्णम् । आशु । शीघ्रम् । पूर्वेद्युः । परेद्युः । परेद्यवि । ऐषमः । परुत् । परारि । अन्येद्युः । अन्यतरेद्युः । उभयेद्युः । तर्हि । यर्हि । कर्हि । एतर्हि ॥ प्रादिरुपसर्गः ॥ प्र । परा । अप । सम् । अनु । अव । निस् । निर् । दुस् । दुर् । अभि । वि । अधि । अति । सु । उद् । नि । प्रति । अपि । परि ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

उप । आङ् । श्रत् । अन्तर् । आविर् । प्राग्धातोः ॥ उपसर्गा धातोः प्राक् प्रयोक्तव्याः ॥ तदव्ययम् ॥ चादि अव्ययसंज्ञं भवति न तु शब्दनिर्देशे ॥ क्त्वाद्यन्तं च ॥ क्त्वा क्यप् तुम् णम् धा च्वि शस् वत् कृत्वस् सु आम् इत्याद्यन्तमव्ययसंज्ञं भवति ॥ अव्ययाद्विभक्तेर्लुक् ॥

सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु ।
वचनेषु च सर्वेषु यन्न व्येति तदव्ययम् ॥
वष्टि भागुरिरल्लोपमवाप्योरुपसर्गयोः ।
आपं चैव हसान्तानां यथा वाचा निशा दिशा ॥
वगाहः । पिधानम् ॥ इत्यव्ययानि ॥

अथ स्त्रीप्रत्ययाः ।

आबतः स्त्रियाम् ॥ अकारान्तान्नाम्नः स्त्रियां वर्तमानादाप् प्रत्ययो भवति ॥ सर्वा । माया । अजादेश्च ॥ अजा । एडका । अश्वा । चटका । मूषिका । बाला । वत्सा । होडा । मन्दा । विलाता । संफला । भस्त्रफला । अजिनफला । शणफला । पिण्डफला । सत्पुष्पा । प्राक्पुष्पा । प्रत्यक्पुष्पा । काण्डपुष्पा । प्रान्तपुष्पा । एकपुष्पा । शूद्रा । क्रुञ्चा । उष्णिहा । देवविशा । ज्येष्ठा । कनिष्ठा । मध्यमेति पुंयोगेऽपि । त्रिफला । अमूला । कोकिला जातावपि । इत्यादि ॥ पादो वा ईप् ॥ द्विपदी । द्विपाद ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

आवृचि ॥ ऋचिं वाच्यायां सत्यां पादन्तादाप् स्यात् ॥ द्विपदा ऋक् ॥ **क्राप्यतः** ॥ क्रापि परे पूर्वस्याकारस्येकारो भवति ॥ कारिका। पाचिका। पाठिका। अतः किम्। नौका। तत्परः किम्। राका ॥ **क्षिपकादीनां न** ॥ क्षिपका। ध्रुवका। कन्यका। चटका। यका। सका। उपत्यका। अधित्यका ॥ **तारका ज्योतिषि** ॥ अन्यत्र तारिका ॥ **वर्णका तान्तवे** ॥ वर्णिकाऽन्या ॥ **वर्तका शकुनौ प्राचाम्** ॥ उदीचां तु वर्तिका ॥ **अष्टका श्राद्धे** ॥ अष्टिकाऽन्या ॥ **क्वचिद्वा** ॥ सूतका। सूतिका। पुत्रका। पुत्रिका। वृन्दारका। वृन्दारिका। आर्यका। आर्यिका। चटकका। चटकिका। निर्भस्त्रका। निर्भस्त्रिका। एषका। एषिका। अजका। अजिका। ज्ञका। ज्ञिका। द्वके। द्विके। निःस्वका। निस्त्रिका। **ह्रस्वो वा** ॥ क्रापि परे तरादौ च पूर्वस्य ह्रस्वो वा ॥ गङ्गाका। गङ्गका। गङ्गिका ॥ नदिका। नदीका। श्रेयसितरा। श्रेयसीतरा। वाग्रहणादेव संध्यक्षराणां न। गोका। नौका ॥ "नृण ईप्" ॥ दण्डिनी। दन्तिनी। मघोनी। शुनी। पौंस्नी। स्त्रैणी। चौरी। हर्त्री। कर्त्री ॥ **यस्य लोपः** ॥ इवर्णावर्णयोर्लोपो भवति तद्धितस्य स्वरे यकारे ईपि च ॥ औपगवी। ऐन्द्री। ईप्यल्लोपः। राज्ञी। द्विदाम्नी ॥ **ष्ट्वृित्तः** ॥ षकारटकारोकारऋकारानुबन्धात् स्त्रियामीप् प्रत्ययो भवति ॥ ष–वराकी। ट–कुरुचरी। ऊरुद्वयसी। ऊरुदघ्नी। ऊरुमात्री। इत्वरी। उ–गोमती। विदुषी ॥ ऋ–पचन्ती ॥ दीव्यन्ती। तुदती। तुदन्ती। प्राची। प्राञ्ची। प्रतीची। प्रत्यञ्ची।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

उदीची। उदञ्ची। तिरश्ची। तिर्यञ्ची। स्तनंधयी॥ **मन्नन्तान्नेप्॥** सीमा, सीमानौ। दामा, दामानौ॥ **अन्नताद्बहुव्रीहेर्न॥** बहुयज्वा, बहुयज्वानौ॥ **डाब् वा॥** मन्नन्तान्नाम्नोऽन्नन्ताद्बहुव्रीहेश्च डाब् वा स्यात्॥ सीमा, सीमे, सीमाः। दामा, दामे, दामाः। बहुयज्वा, बहुयज्वे॥ **उपधालोपिनो बहुव्रीहेर्वेप्॥** बहुराज्ञी, बहुराजा॥ **नदादेः॥** स्त्रियामीप्॥ नदी। गौरी। सरसी। सखी। अशिश्वी। अनड्वाही। अनडुही। इत्यादि॥ **अनन्त्यवयोवाचिनोऽदन्तात्स्त्रियामीप्॥** कुमारी। किशोरी। वधूटी। चिरण्टी। तरुणी। तलुनी। अदन्तात्किम्। शिशुः॥ **ऊधोऽन्तस्य बहुव्रीहेर्नङ् स्त्रियाम्॥** कुण्डोघ्नी। द्व्यूध्नी। अत्यूध्नी॥ **संख्यादेर्दाम्न ईप्॥** संख्यादेर्बहुव्रीहेर्दामान्तादीप् स्यात्॥ डाबीपोर्विकल्पेन प्राप्तयोर्वचनम्॥ द्विदाम्नी॥ **वयोवाचिनो हायनस्येप्॥** संख्यादेर्बहुव्रीहेर्वयोवाचिहायनान्तादीप् स्यात्॥ आपि प्राप्ते वचनम्॥ **त्रिचतुर्भ्यां हायनस्य णत्वम्॥** त्रिहायणी। चतुर्हायणी॥ **इन्द्रादेरानीप्॥** स्त्रियां पुंयोगे॥ इन्द्राणी। वरुणानी। भवानी। शर्वाणी। रुद्राणी। मृडानी। **आचार्यादणत्वम्॥** आचार्यानी॥ **हिमारण्ययोर्महत्त्वे॥** महद्धिमं हिमानी। महदरण्यमरण्यानी॥ **यवाद्दोषे॥** दुष्टो यवो यवानी॥ **यवनाल्लिप्याम्॥** यवनानां लिपिर्यवनानी॥ **मातुलोपाध्यायाभ्यां वा॥** मातुलानी॥ मातुली। उपाध्यायानी। उपाध्यायी॥ **अर्यक्षत्रियोपाध्यायेभ्यो वा स्वार्थे॥** अर्याणी।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

अर्या । क्षत्रियाणी । क्षत्रिया । उपाध्यायानी । उपाध्याया ॥ **पुंयोगे च** ॥ **अदन्तात्स्त्रियामीप्** ॥ शूद्री । गणकी ॥ **पालकान्तान्न** ॥ गोपालिका । अश्वपालिका ॥ **सूर्याद्देवतायां चाप्** ॥ सूर्यस्य स्त्री देवता सूर्या । अन्या सूरी ॥ **ज्ञातेरयोपधात्** ॥ जातिवाचिनोऽयकारोपधादकारान्तात्स्त्रियामीप् प्रत्ययो भवति । महिषी । हंसी । योपधात्तु । क्षत्रिया । वैश्या ॥ **क्वचिन्न** ॥ वलाका ॥ **गवयहयमुकयमनुष्यमत्स्यानामनिषेधः** ॥ गवयी । हयी । मुकयी ॥ **हसात्तद्धितयस्योपि लोपः** ॥ मानुषी ॥ **मत्स्यस्य यलोपः** ॥ मत्सी ॥ **सूर्यागस्त्ययोरीये ईपि च** ॥ सूरी । अगस्ती ॥ **तिष्यपुष्ययोर्नक्षत्राणि यलोपः** ॥ तैषी । पौषी ॥ **जानपदादिभ्योऽर्थविशेषे ईप्** ॥ जानपदी वृत्तिश्चेत् । अन्या जानपदा । कुण्डी अमत्रं चेत् । कुण्डाऽन्या । गोणी आवपनं चेत् । गोणाऽन्या । स्थली अकृत्रिमा चेत् । स्थलाऽन्या । भाजी श्राणा चेत् । भाजाऽन्या । नागी स्थूला चेत् । नागाऽन्या । काली वर्णश्चेत् । कालाऽन्या । नीली ओषधिप्राणिनोः । नीलाऽन्या । संज्ञायां वा । नीली, नीला । कुशी अयोविकारे । कुशाऽन्या । कामुकी मैथुनेच्छा चेत् । कामुकाऽन्या । कबरी केशविन्यासे । कबराऽन्या । **शोणाद्वा** ॥ शोणी । शोणा ॥ **बहुव्रीहेर्जातिपूर्वात् क्तान्तात्** ॥ ऊरुभिन्नी । **जातान्तान्न** ॥ दन्तजाता ॥ **अस्वाङ्गपूर्वपदाद्वा** । सुरापीती । सुरापीता ॥ **पाणिगृहीती भार्यायाम्** ॥ अन्या पाणिगृहीता ॥ **क्रीतान्तात्करणादेः** ॥ वस्त्रक्रीती । क्वचिन्न । धन-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

क्रीता ॥ **क्तान्तादल्पत्वे** ॥ अभ्रलिप्ती द्यौः । अल्पत्वे किम् । चन्दनलिप्ताऽन्या मूर्तिः ॥ **स्वाङ्गाद्वा** ॥ स्वाङ्गवाचिनोऽदन्तादसंयोगोपधादुपसर्जनाद्वा स्त्रियामीप् ॥ सुमुखी, सुमुखा । सुकेशी, सुकेशा । संयोगोपधात्तु सुगुल्फा ॥ **नासिकोदरौष्ठजङ्घादन्तकर्णशृङ्गाद्वा** ॥ तुङ्गनासिकी । तुङ्गनासिका । मन्दोदरी । मन्दोदरा । बिम्बोष्ठी । बिम्बोष्ठा । एवं सुजङ्घी । सुदन्ती । सुकर्णी । सुशृङ्गी ॥ **अङ्गगात्रकण्ठपुच्छाच्च** ॥ स्वङ्गी । सुगात्री । सुकण्ठी । सुपुच्छी । पक्षे स्वङ्गा इत्यादि ॥ **कबरमणिविषशरेभ्यः परात्पुच्छान्नित्यम्** ॥ कबरपुच्छी । मणिपुच्छी । विषपुच्छी । शरपुच्छी ॥ **उपमानात्पक्षपुच्छाभ्याम्** ॥ श्येनपक्षी । श्येनपुच्छी ॥ **न क्रोडादिबहुस्वरात्** ॥ कल्याणक्रोडा । सुजघना ॥ **सहनञ्विद्यमानपूर्वान्न** ॥ सकेशा । अकेशा । विद्यमाननासिका ॥ **नखमुखात्संज्ञायाम्** ॥ शूर्पणखा । गौरमुखा । संज्ञायां किम् । ताम्रमुखी कन्या ॥ **वोर्गुणात्** ॥ उदन्ताद् गुणवाचिनो वा स्त्रियामीप् स्यात् । पट्वी, पटुः । बह्वी, बहुः ॥ **खरुसंयोगोपधान्न** ॥ खरुः । पाण्डुः ॥ **कृदिकारादक्त्यर्थात्** ॥ रात्री, रात्रिः । शकटी, शकटिः । अक्त्यर्थात् किम् । भूतिः । अजननिः ॥ **पद्धत्यादिभ्यो वा** ॥ पद्धती, पद्धतिः ॥ **ऐ च मन्वादेः** ॥ मनुपूतक्रतुवृषाकप्यग्निकुसितकुसिदानामै आदेश ईप् च स्त्रियां पुंयोगे ॥ पूतक्रतायी । कुसितायी । कुसिदायी । वृषाकपायी । अग्नायी ॥ **मनोरै**

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

औ वा ॥ मनावी । मनायी । मनुः ॥ पत्न्यादयो निपात्याः ॥ पत्नी । सपत्नी । एकपत्नी । वीरपत्नी ॥ क्वचिद्वा ॥ दृढपत्नी, दृढपतिः । वृषलपत्नी, वृषलपतिः । एता, एनी । हरिता, हरिणी । रोहिता, रोहिणी । श्वेता, श्वेनी । असिता, असिक्नी । पलिता, पलिक्नी । इत्यादि ॥ इतो मनुष्यजातेरीप् ॥ दाक्षी । अवन्ती । कुन्ती ॥ उत ऊः ॥ उदन्तादयोपधान्मनुष्यजातिवाचिनः स्त्रियामूः प्रत्ययः ॥ रूकुः । अयोपधात्किम् । अध्वर्युः स्त्री ॥ पङ्गोश्च ॥ पङ्गूः ॥ श्वशुरस्योकाराकारलोप ऊश्च ॥ श्वश्रूः ॥ ऊरूत्तरपदादौपम्ये ॥ उपमानवाचिपूर्वपदादूरूत्तरपदादूः ॥ करभोरूः ॥ संहितशफलक्षणवामसहितसहादेरनौपम्येऽपि ॥ संहितोरूः ॥ शफोरूः । लक्षणोरूः । वामोरूः । सहितोरूः । सहोरूः ॥ नृनरयोर्वृद्धिश्च ॥ नारी ॥ यूनस्तिः ॥ युवन्छब्दात् स्त्रियां तिः ॥ युवतिः ॥ इति स्त्रीप्रत्ययाः ॥

अथ कारकाणि ।

लिंगार्थे प्रथमा ॥ नामार्थमात्रे लिङ्गमात्राधिक्ये च प्रथमा विभक्तिः ॥ नियतोपस्थितिको नामार्थः । उच्चैः । नीचैः । कृष्णः । श्रीः । ज्ञानम् । द्रोणः । खारी । आढकम् । एकः । द्वौ । बहवः । अलिङ्गा नियतलिङ्गाश्च नामार्थमात्र इत्यस्योदाहरणम् । अनियतलिङ्गास्तु लिङ्गमात्राधिक्य इत्यस्य । तटः, तटी, तटम् ॥ आमन्त्रणे च ॥ अभिमुखीकरणे प्रथमा ॥ हे देव । हे देवौ । हे देवाः ॥ भोस्भगोस्अघोस् भवद्भगवद्-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

घवतां वा निपात्या धौ ॥ भो हरे । भगो नमस्ते । अघो याहि । इति प्रथमा ॥ शेषाः कार्ये कर्तृसाधनयोर्दानपात्रे विश्लेषावधौ सम्बन्ध आधारभावयोः ॥ द्वितीयाद्या विभक्तय एष्वर्थेषु भवंति ॥ कार्ये कर्मकारके द्वितीया ॥

कटं करोति कारूको रूपं पश्यति चाक्षुषः ।
राज्यं प्राप्नोति धर्मिष्ठः सोमं सुनोति सोमपाः ॥

कर्तरि करणे च तृतीया ॥

भिन्नः शरेण रामेण रावणो लोकरावणः ।
कराग्रेण विदीर्णोऽपि वानरैर्युद्ध्यते पुनः ॥

दानपात्रे चतुर्थी ॥ वेदविदे गां ददाति ॥ क्रियया यमाप्नोति तत्रापि चतुर्थी ॥ पत्ये शेते ॥ विश्लेषावधौ पञ्चमी ॥ विश्लेषो विभागस्तस्यावधौ पञ्चमी ॥ हिमवतोऽवतरति गङ्गा । धावतोऽश्वाद्-पतत् ॥ सम्बन्धे षष्ठी ॥ राज्ञः पुरुषः ॥ आधारे सप्तमी ॥ औपश्लेषिकः सामीपिकोऽभिव्यापको वैषयिको नैमित्तिक औपचारि-कश्चेति षोढा सः ॥

कटे शेते कुमारोऽसौ वटे गावः सुशेरते ॥
तिलेषु विद्यते तैलं हृदि ब्रह्मामृतं परम् ॥
युद्धे संनह्यते धीरोऽङ्गुल्यग्रे करिणां शतम् ॥

क्रियालक्षणं भावस्तत्रापि सप्तमी ॥ वर्षति देवे चौर आयातः ॥ विनासहनमस्तेनिर्द्धारणस्वाम्यादिभिश्च ॥ एतै-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

योगे द्वितीयाद्या विभक्तयः ॥ विनादियोगे द्वितीया ॥ विना पापं सर्वं फलति । अन्तरेणाक्षिणी किं जीवितेनं । अन्तरा त्वां मां हरिः । जपमनु प्रावर्षत् । अनु हरिं सुराः । भक्तो हरिमभि । उपहरिं सुराः । नदीमन्ववसिता सेना । अति देवान् कृष्णः । अभितो ग्रामम् । सर्वतो नगरम् । धिग् जाल्मम् । उपर्युपरि पर्वतम् । अध्यधि लोकम् । अध्यधि सुखम् । अधोऽधो ग्रामम् । उभयतः कृष्णम् ॥ एवं परितः समयानिकषाहाप्रतिपरियोगेऽपि ॥ **कालाध्वनोर्नैरन्तर्ये** ॥ मासमधीते । क्रोशं पर्वतः । मासं गुडधानाः । मासं कल्याणी । क्रोशं कुटिला नदी । नैरन्तर्ये किम् । मासस्य द्विरधीते । क्रोशस्यैकदेशे पर्वतः ॥ **अधिपूर्वाणां शीङ्स्थासामाधारः कर्म** ॥ **अभिनिपूर्वस्य विशः** ॥ **उपान्वध्याङ्पूर्वस्य वसः** ॥ अधिशेते, अधितिष्ठति, अध्यास्ते वा वैकुण्ठं हरिः । अभिनिविशते सन्मार्गम् । उपवसति, अनुवसति, अधिवसति, आवसति वा वैकुण्ठं हरिः ॥ **नाभुक्त्यर्थस्य** ॥ वने उपविशति । इत्यादि ॥ **सहादियोगे तृतीया** ॥ सह शिष्येणागतो गुरुः ॥ एवं साकंसार्द्धसमंयोगेऽपि ॥ **येनाङ्गविकारः** ॥ येनाङ्गेन विकृतेनाङ्गिनो विकारो लक्ष्यते ततस्तृतीया ॥ अक्ष्णा काणः । अङ्गविकारः किम् । अक्षि काणमस्य ॥ **केचित्प्रकारं प्राप्तस्य लक्षणे** ॥ जटाभिस्तापसः ॥ **प्रकृत्यादिभ्यश्च** ॥ प्रकृत्या चारुः । प्रायेण याज्ञिकः । गोत्रेण गार्ग्यः । समेनैति । विषमेणैति । द्विद्रोणेन धान्यं क्रीणाति । सुखेन, दुःखेन

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

याति ॥ **दिवः करणम्** ॥ कर्मसंज्ञं वा स्यात् ॥ अक्षैरक्षान्वा दीव्यति ॥ **तुल्यार्थयोगे** ॥ कृष्णेन तुल्यः । रामेण सदृशः ॥ **फलप्राप्तौ कालाध्वनोरत्यन्तसंयोगे तृतीया** ॥ अह्ना,क्रोशेन वाऽनुवाकोऽधीतः । फलप्राप्तौ किम् । मासमधीतो नायातः ॥ **अशिष्टव्यवहारे दाणः प्रयोगे चतुर्थ्यर्थे तृतीया** ॥ दास्या संयच्छते कामुकः । धर्मे तु भार्यायै संयच्छति ॥ **नमआदियोगे चतुर्थी** ॥ नमो नारायणाय ॥ एवं स्वस्तिस्वाहास्वधालंवषड्योगे च ॥ **उपपदविभक्तेः कारकविभक्तिर्बलीयसीति** ॥ नमस्करोति देवान् । प्रभ्वादियोगे षष्ठ्यपि । भोजनाय भोजनस्य वा प्रभुः समर्थः शक्तः । कृष्णाय, कृष्णस्य वा भद्रं, भद्रं, कुशलं, सुखमायुष्यमर्थः प्रयोजनं वा भूयात् ॥ **रुच्यर्थधातुयोगे प्रीयमाणे** ॥ हरये रोचते भक्तिः ॥ **श्लाघह्नुङ्स्थाशपां प्रयोगे बोधयितुमिष्टे** ॥ गोपी कृष्णाय श्लाघते । ह्नुते, तिष्ठते, शपते वा ॥ **धारेरुत्तमर्णे** ॥ भक्ताय धारयति मोक्षं हरिः ॥ **स्पृहयतेरीप्सिते** ॥ पुष्पेभ्यः स्पृहयति ॥ **क्रुधद्रुहेर्ष्यासूयार्थानाम्** ॥ यं प्रति कोपार्थादयस्तत्र चतुर्थी ॥ हरये क्रुध्यति, द्रुह्यति, ईर्ष्यति, असूयति । इत्यादि ॥ **ऋतेआदियोगे पञ्चमी** ॥ ऋते ज्ञानान्न मुक्तिः । अन्यो गृहाद्विहारः । आराद्वनात् । इतरो ग्रामात् ॥ भिन्नः कृष्णात् । पूर्वो ग्रामात् ॥ प्राग्ग्रामात् । दक्षिणा ग्रामात् ॥ **विनापृथङ्नाना वा** ॥ विना कृष्णात् ॥ **विद्यास्वीकारे पञ्चमी** ॥ उपाध्यायादधीते ॥ **जनिकर्तुः प्रकृतिः** ॥ जायमानस्य कार्यस्योपादानमपादानसंज्ञं स्यात् ॥ ब्रह्मणः प्रजाः प्रजायन्ते ॥ **यतश्चाध्वका-**

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

लयोर्निर्माणं तत्र पञ्चमी । **पञ्चमीयुक्तादध्वनः प्रथमासप्तम्यौ कालात्सप्तमी** ॥ वनाद् ग्रामो योजनं योजने वा । कार्तिक्या आग्रहायणी मासे ॥ **वर्जनेऽपपरिभ्यां पञ्चमी** ॥ अप हरेः संसारः । परि हरेः संसारः । आ मुक्तेः संसारः ॥ **प्रतिः प्रतिनिधिप्रतिदानयोः** ॥ यतः प्रतिनिधिः प्रतिदानं तत्र प्रतियोगे पञ्चमी ॥ प्रद्युम्नः कृष्णात्प्रति । तिलेभ्यः प्रतियच्छति माषान् ॥ **हेतौ तृतीयापञ्चम्यौ** ॥ जाड्याज्जाड्येन वा बद्धः । स्तोकात्स्तोकेन वा मुक्तः ॥ **दूरान्तिकयोर्योगे षष्ठ्यपि** ॥ ग्रामस्य दूरादन्तिकाद्वा । इत्यादि ॥ **निर्द्धारणे षष्ठीसप्तम्यौ** ॥ क्रियागुणजातिसंज्ञाभिः समुदायात्पृथक्करणं निर्धारणं यतस्ततः षष्ठीसप्तम्यौ ॥ क्रियापराणां, क्रियापरेषु वा भगवदाराधकः श्रेष्ठः । गवां, गोषु वा कृष्णा संपन्नक्षीरा । नृणां नृषु वा ब्राह्मणः श्रेष्ठः । छात्राणां छात्रेषु वा मैत्रः पटुः ॥ **स्वाम्यादियोगे षष्ठीसप्तम्यौ** ॥ गवां गोषु वा स्वामी, अधिपतिः, ईश्वरः, दायादः, प्रसूतः, प्रतिभूर्वा । **अनादराधिक्ये क्रियालक्षणे षष्ठीसप्तम्यौ** ॥ रुदति रुदतो वा प्राव्राजीत् ॥ **आयुक्तकुशलाभ्यां योगे षष्ठीसप्तम्यौ तात्पर्ये** ॥ आयुक्तः, कुशलो वा हरिपूजनस्य, हरिपूजने वा ॥ **साधुनिपुणाभ्यां पूजायां सप्तमी** ॥ मातरि साधुर्निपुणो वा ॥ **प्रसितोत्सुकाभ्यां योगे तृतीयासप्तम्यौ** ॥ प्रसित उत्सुको वा हरिणा हरौ वा ॥ **साध्वसाधुप्रयोगे सप्तमी** ॥ साधुः कृष्णो मातर्यसाधुर्मातुले ॥ **निमित्तात्कर्मयोगे सप्तमी** ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

चर्मणि द्वीपिनं हन्ति दन्तयोर्हन्ति कुञ्जरम् ।
केशेषु चमरीं हन्ति सीम्नि पुष्कलको हतः ॥

क्तस्येन्विषयस्य कर्मणि ॥ अधीती व्याकरणे ॥ तादर्थ्ये चतुर्थी ॥

संयमाय श्रुतं धत्ते नरो धर्माय संयमम् ।
धर्मं मोक्षाय मेधावी धनं दानाय भुक्तये ॥

तुमोऽप्रयुक्तस्य कर्मणि ॥ फलेभ्यो याति ॥ ल्यब्लोपे कर्मण्याधारे च पञ्चमी ॥ हर्म्यात्प्रेक्षते । आसनात्प्रेक्षते ॥ कर्तृकार्ययोरक्तादौ कृति षष्ठी ॥ कर्तरि कार्ये च षष्ठी क्तादिवर्जिते कृति प्रयुज्यमाने ॥ कृष्णस्य कृतिः । जगतः कर्ता कृष्णः ॥ गुणकर्मणि वा ॥ नेताश्वस्य ग्रामं ग्रामस्य वा उभयप्राप्तौ कृति कर्तरि षष्ठी न ॥ आश्चर्यो गवां दोहोऽगोपेन । स्त्रीप्रत्यययोरकाकारयोर्योगे नोक्तम् ॥ भेदिका, बिभित्सा वा रुद्रस्य जगतः ॥ शेषे कृति वा ॥ शब्दानामनुशासनमाचार्येणाचार्यस्य वा ॥ वर्तमानाधारार्थक्तस्य योगे षष्ठी ॥ राज्ञां मतः, बुद्धः, पूजितो वा । इदमेषां शयितम् । क्तादौ तु कुर्वन्, कुर्वाणः, चक्रवान्, चक्राणः, चक्रिर्वा सुखं हरिः । दिदृक्षुः अलंकरिष्णुर्वा । दैत्यान् घातुको हरिः । जगत्स्रष्टा । सुखं कर्तुम् । विष्णुना हता दैत्याः । दैत्यान् हतवान् हरिः । ईषत्करः प्रपञ्चो हरिणा । सोमं पवमानः । आत्मानं मण्डयमानः । वेदमधीयन् । कर्ता लोकान् ॥ द्विषः

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

शतुर्वा ॥ मुरस्य मुरं वा द्विषन् ॥ भविष्यत्यकस्य भविष्यदाधमर्ण्यार्थस्येनश्च योगे षष्ठी न ॥ सतः पालकोऽवतरति । व्रजं गामी । शतं दायी ॥ कृत्यानां कर्तरि वा षष्ठी ॥ मया, मम वा सेव्यो हरिः ॥ उभयप्राप्तौ कृत्ये षष्ठी न ॥ नेतव्या व्रजं गावः कृष्णेन ॥ दूरनिकटार्थयोगे षष्ठीपञ्चम्यौ ॥ दूरं निकटं वा ग्रामस्य ग्रामाद्वा ॥ दूरनिकटार्थेभ्यो नामार्थमात्रेभ्यो द्वितीया तृतीया पंचमी सप्तमी ॥ ग्रामस्य, ग्रामाद्वा दूरं, दूरेण, दूरात्, दूरे, निकटं वा ॥ द्यूतार्थस्य क्रयविक्रयरूपव्यवहारार्थस्य च दिवः कर्मणि षष्ठी ॥ शतस्य दीव्यति ॥ वोपसर्गस्य ॥ शतस्य शतं वा प्रतिदीव्यति ॥ षष्ठी हेतुप्रयोगे ॥ अन्नस्य हेतोर्वसति ॥ सर्वादेर्हेतुप्रयोगे हेतौ द्योत्ये च तृतीयाषष्ठ्यौ ॥ केन हेतुना वसति । कस्य हेतोः ॥ निमित्तपर्यायप्रयोगे सर्वविभक्तयोऽसर्वादेस्तृतीयादयः ॥ को हेतुः । किं प्रयोजनम् । कं हेतुम् । केन हेतुना । ज्ञानेन निमित्तेन हरिः सेव्यः । ज्ञानाय निमित्ताय ॥ अन्योक्ते प्रथमा ॥ आख्यातकृत्समासताद्धितनिपातोक्ते कारके संबन्धे च प्रथमा स्यात् ॥ घटः क्रियते । हरिः करोति । कृष्णः कंसं हतवान् । कृष्णेन कंसो हतः । पचनोऽग्निः । दानीयो विप्रः । उपाध्यायः । पचनी स्थाली । प्राप्तानंदः । ऊढरथः । उपहृतपशुः । उद्धृतौदना । पीताम्बरः । वीरपुरुषः । कौङ्कुमम् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

माथुरः । धनवान् । दृषद्वती ॥ 'विषवृक्षोऽपि संवर्ध्य स्वयं छेत्तुमसांप्रतम् ।' इति । क्रमादमुं नारद इत्यबोधि सः ॥ इति कारकाणि ॥

अथ समासाः ।

समासश्चान्वये नाम्नाम् ॥ नाम्नामन्वये सति समासो भवति ॥ चकारात्कृत्तद्धितधातुसंज्ञाप्रयोजकप्रत्यया अपि ॥ **पूर्वेऽव्ययेऽव्ययीभावः** ॥ अव्यये पूर्वपदे सति योऽन्वयः सोऽव्ययीभावसंज्ञकः समासो भवति ॥ **समासप्रत्यययोः** ॥ समासे वर्तमानाया विभक्तेः प्रत्यये परे च लुग्भवति ॥ नामत्वात्स्यादिः ॥ **स नपुंसकम्** ॥ अव्ययीभावो नपुंसकलिङ्गो भवति ॥ नपुंसकस्येति ह्रस्वः ॥ **अव्ययीभावात्** ॥ विभक्तेर्लुक् । अधिस्त्रि ॥ **अतोमनतः** ॥ अदन्तादव्ययीभावाद्विभक्तेर्लुक् । अतं वर्जयित्वाऽमादेशः ॥ कुम्भस्य समीपमुपकुम्भम् । **वा टाङ्च्योः** ॥ अदन्तादव्ययीभावाट्टाङ्च्योरम्वा ॥ उपकुम्भम् । उपकुम्भेन वा कृतम् । उपकुम्भम्, उपकुम्भे वा निधेहि । अनतः किम् । उपकुम्भात् । मद्राणां समृद्धिः सुमद्रम् । यवनानां व्यृद्धिर्दुर्यवनम् । मक्षिकाणामभावो निर्मक्षिकम् । हिमस्यात्ययोऽतिहिमम् । निद्रा संप्रति न युज्यते इत्यतिनिद्रम् । हरिशब्दस्य प्रकाश इतिहरि । विष्णोः पश्चादनुविष्णु । रूपस्य योग्यमनुरूपम् । अर्थमर्थं प्रति प्रत्यर्थम् । शक्तिमनतिक्रम्य करोति यथाशक्ति । हरेः सादृश्यं सहरि । सहादेः सादिरिति सहस्य सः । ज्येष्ठस्यानुपूर्व्येणेत्यनुज्येष्ठम् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

चक्रेण युगपत्सचक्रम् । सदृशः सख्या ससखि । क्षत्राणां संपत्तिः सक्षत्रम् । तृणमप्यपरित्यज्य सतृणमत्ति । अग्निग्रन्थपर्यन्तमधीते साग्नि ॥ **यथाऽसादृश्ये** ॥ यथाशब्दः सादृश्ये न समस्यते ॥ यथा हरिस्तथा हरः ॥ **अवधारणार्थे यावति च** ॥ अवधारणार्थे यावच्छब्दे प्रयुज्यमाने योऽव्ययः सोऽव्ययीभावसंज्ञकः समासो भवति । यावन्तः श्लोकास्तावन्तोऽच्युतप्रणामा यावच्छ्लोकम् ॥ **क्वचिदनव्यय-पूर्वपदोऽप्यव्ययीभावः** ॥ उन्मत्ता गङ्गा यस्मिन् देशे इत्युन्मत्तग-ङ्गम् । शाकस्य लेशः शाकप्रति । अक्षेण विपरीतं वृत्तमक्षपरि । शलाकया विपरीतं वृत्तं शलाकापरि । एकपरि । क्वचिद्वा ॥ अप विष्णोः, अपविष्णु । परि विष्णोः, परिविष्णु । बहिर्वनात्, बहिर्वनम् । प्राग्वनात्, प्राग्वनम् । आ मुक्तेः, आमुक्ति । अभ्य-ग्निम्, अभ्यग्नि । प्रत्यग्निम्, प्रत्यग्नि । वनस्य समीपमुपवनम् । गङ्गामनु, अनुगङ्गम् । तिष्ठन्ति गावो यस्मिन्काले स तिष्ठद्गु । आयतीगवम् । पारे गङ्गायाः, पारेगङ्गम् । मध्ये गङ्गायाः,मध्येगङ्गम् । इत्यादयो निपात्याः । खले यवा यस्मिन् काले खलेयवम् । द्वौ मुनी वंश्यौ द्विमुनि । त्रिमुनि व्याकरणस्य । सप्त गङ्गाः समाहृताः सप्तगंगम् । द्वियमुनम् ॥ **टाडकाः** ॥ समासे सति ट अ ड क इत्येते प्रत्यया भवन्ति ॥ शरदः समी-पमुपशरदम् । प्रतिविपाशम् ॥ **जराया जरस्** ॥ उपजर-सम् । अक्षि प्रतीति प्रत्यक्षम् । अक्ष्णः परं परोक्षम् । परश-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

ब्दस्य परस् परोक्ष इति ज्ञापकात् । अन्वक्षम् । उपराजम् । " क्लीबे वाऽनूलोपश्च " । उपचर्मम्, उपचर्म ॥ झसान्ताद्वा ॥ उपसमिधम्, उपसमित् ॥ नद्यादिभ्यो वा ॥ उपनदम्, उपनदि ॥ **अमादौ तत्पुरुषः ॥** द्वितीयाद्यन्ते पूर्वपदे सति योऽन्वयः स तत्पुरुषसंज्ञः समासो भवति ॥ ग्रामं प्राप्तो ग्रामप्राप्तः । कृष्णश्रितः । कूपपतितः । ग्रामगतः । खट्वारूढः । मुहूर्तसुखम् । दुःखातीतः । ग्रामगामी । अन्नबुभुक्षुः । दात्रेण छिन्नम्, दात्रच्छिन्नम् । मासेन पूर्वो मासपूर्वः । मातृसदृशः । पितृसदृशः । माषोनम् । वाक्कलहः । आचारनिपुणः । गुडमिश्रः । मासावरः । हरित्रातः । नखभिन्नः । दध्र्योदनः । गुडधानाः । यूपाय दारु, यूपदारु । अर्थस्य विशेष्यलिङ्गता ॥ द्विजायायं द्विजार्थः सूपः । द्विजार्था शाटी । द्विजार्थं पयः । भूतबलिः । गोहितम् । गोसुखम् । गोरक्षितम् । चौराद्भयम्, चौरभयम् । सुखापेतः । दुःखापोढः । व्याघ्रभीतिः । राज्ञः पुरुषः, राजपुरुषः । द्विजयाजकः । देवपूजकः ॥ **क्वचित्षष्ठी न समस्यते ॥** नृणां द्विजः । सतां षष्ठः । काकस्य कार्ष्ण्यम् । फलानां सुहितः । इदमेषां शयितम् । अपां स्रष्टा । ओदनस्य पाचकः । भवतः शायिका ॥ **क्वचिदमाद्यन्तस्य परत्वम् ॥** रायमतिक्रान्तोऽतिराः । नावमतिक्रान्तोऽतिनौः । पूर्वं भूतो भूतपूर्वः । कायस्य पूर्वः पूर्वकायः । अपरकायः । अधरकायः । उत्तरकायः । अह्नो मध्यं मध्याह्नः । सायाह्नः । मध्यरात्रः । पश्चिमरात्रः । अर्द्ध-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

पिप्पली ॥ **क्वचिद्वा** ॥ द्वितीयं भिक्षायाः द्वितीयभिक्षा, भिक्षाद्वितीयम् । तृतीयभिक्षा, भिक्षातृतीयम् । चतुर्थभिक्षा, भिक्षाचतुर्थम् । तुरीयभिक्षा, भिक्षातुरीयम् । जीविकाप्राप्तः, प्राप्तजीविकः । आपन्नजीविकः, जीविकापन्नः ॥ **परिमाणवता सह समस्यतेऽमाद्यन्तस्य परनिपातश्च तत्पुरुषे** ॥ मासजातः ॥ **समासे क्वचिदेकपद्यं णत्वहेतुः** ॥ शराणां वनं शरवणम् । आम्राणां वनमाम्रवणम् । प्लक्षवणम् । शूर्पणखा ॥ **क्वचिद्वा** ॥ माषवापिणौ, माषवापिनौ । व्रीहिवापाणि, व्रीहिवापानि । व्रीहिवापेण, व्रीहिवापेन । सुरापाणम् । सुरापानम् । अक्षेषु शौण्डोऽक्षशौण्डः ॥ **पात्रेसमितादयो निपात्याः** ॥ पात्रेसमितः । गेहेशूरः । गेहेनर्दी ॥ **नञि** ॥ नञि पूर्वपदे संति योऽन्वयः स तत्पुरुषसंज्ञः समासो भवति ॥ **ना समासे** ॥ नञो नस्यादादेशः ॥ धर्मविरुद्धोऽधर्मः । ज्ञानविरुद्धमज्ञानम् ॥ **अन् स्वरे** ॥ समासे नञो नस्य अन् स्यात्स्वरे ॥ अश्वादन्योऽनश्वः । संशयस्यासंभवोऽसंशयः ॥ **निरनुबन्धकस्य तु नानौ** ॥ नाकः । नक्षत्रम् । नक्रः । नासत्यौ । नैकधा ॥ **चार्थे द्वन्द्वः** ॥ समुच्चयान्वाचयेतरेतरयोगसमाहाराश्चार्थाः । तत्रेश्वरं गुरुं च भजस्वेति प्रत्येकमेकक्रियाभिसम्बन्धः समुच्चयः । बटो भिक्षामट गां चानयेति क्रमेण क्रियाद्वयसंबन्धोऽन्वाचयः । मिलितयोरेकत्रान्वय इतरेतरयोगः । संहतिः, समाहारः । तत्राद्ययोर्न समासोऽस्त्यनन्वयात् ॥ **द्वन्द्वेऽल्पस्वरप्रधाने-**

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

कारोकारान्तानां पूर्वनिपातः ॥ पटुश्च गुप्तश्च पटुगुप्तौ । अग्निश्च मरुच्च अग्नामरुतौ । भोक्तृभोग्यौ । धवखदिरौ । इन्द्राश्वरथाः । तापसपर्वतौ ॥ द्वन्द्वे स्वराद्यदन्तस्य पूर्वनिपातः । ईशकृष्णौ ॥ देवताद्वन्द्वे पूर्वपदस्याकारः ॥ इंद्राबृहस्पती । अग्नाविष्णू ॥ क्वचिन्न ॥ अग्निवायू ॥ ईदग्नेः सोमवरुणयोः ॥ अग्न्यादेः सोमादीनां सस्य षः ॥ अग्नीषोमौ । अग्नीवरुणौ ॥ समाहारे एकवद्भावः ॥ एकत्वे द्विगुद्वन्द्वौ ॥ नपुंसकलिङ्गौ भवतः ॥ पाणिपादम् । मार्दङ्गिकपाणविकम् । रथिकाश्वारोहम् । पदकक्रमकम् । बदरामलकम् । शशकुशपलाशम् ॥ संख्यापूर्वो द्विगुः ॥ तद्धितार्थे । पञ्चकपालः । समाहारेऽत ईप् द्विगुः ॥ समाहारेऽर्थे द्विगुः समासो भवति । ततोऽकारान्तादीप् प्रत्ययः ॥ दशानां ग्रामाणां समाहारो दशग्रामी । पञ्चाग्नि ॥ क्वचिन्न ॥ पञ्चपात्रम् । चतुर्युगम् । त्रिभुवनम् ॥ आबन्ताद्वा ॥ पञ्चखट्वी, पञ्चखट्वम् ॥ बहुव्रीहिरन्यार्थे ॥ अन्यपदार्थे योऽन्वयः स बहुव्रीहिसंज्ञः ॥ बहुव्रीहौ विशेषणसप्तम्यन्तक्तान्तसर्वादिसंख्यानां पूर्वनिपातः ॥ बहु धनं यस्य स बहुधनः । अस्तिधनः । लम्बकर्णः । कण्ठेकालः । बहेगङ्गः । कृतकटः । सर्वप्रियः । द्विपुत्रः । क्वचिन्न ॥ चन्द्रशेखरः । पद्मनाभः । दन्तजातः । ऊरुभिन्नः ॥ क्वचिद्वा ॥ प्रियगुडः, गुडप्रियः, । आहिताग्निः, अग्न्याहितः । अभ्युद्यतः, उद्य-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

तासि: ॥ नञ्दु:सुभ्यः प्रजामेधयोरसुक् ॥ अप्रजाः । दुर्मेधाः । सुप्रजाः ॥ धर्मादन् ॥ सुधर्मा । रूपवती भार्या यस्य ॥ अन्यार्थे ॥ स्त्रीप्रत्ययान्तस्यान्यार्थे वर्तमानस्य ह्रस्वः ॥ पुंवद्वा पूर्वस्य ॥ समासे समानाधिकरणे स्त्रीलिङ्गे परे पूर्वस्योक्तपुंस्कस्य स्त्रीलिङ्गस्य पुँल्लिङ्गस्येव रूपम् । रूपवद्भार्यः । उक्तपुंस्कस्य किम् । छायाद्वितीयः । गङ्गाभार्यः ॥ ऊप्रत्ययान्तस्य न ॥ वामोरूभार्यः ॥ पूरणार्थप्रत्ययान्ते प्रियादौ च न ॥ कल्याणी पञ्चमी यासां रात्रीणां ताः कल्याणीपञ्चमा रात्रयः । कल्याणीप्रियः ॥ तरतमचरट्कल्पदेश्यदेशीयरूपपाशादौ पुंवत् ॥ दर्शनीयतरा । दर्शनीयतमा । दर्शनीयचरी । दर्शनीयपाशा । इत्यादि । शसि बह्वल्पार्थस्य पुंवत् ॥ बह्वीभ्यो देहि बहुशः । अल्पशः ॥ त्वतलोर्गुणवचनस्य ॥ शुक्लाया भावः शुक्लत्वम् । शुक्लता ॥ कुक्कुटयादीनामण्डादिषु ॥ कुक्कुट्या अण्डं कुक्कुटाण्डम् । मृगपदम् । मृगक्षीरम् । काकशावः ॥ सर्वादेः समासादौ पुंवत् । दक्षिणस्याः पूर्वस्या अन्तरालं मध्ये या दिक् सा दक्षिणपूर्वा । सर्वा प्रधानमस्येति सर्वमयः । सर्वां करोतीति सर्वकरः ॥ यङ्मानिनोः पुंवत् ॥ एनीवाचरति एतायते । दर्शनीयां मन्यते दर्शनीयमानी चैत्रः ॥ अकतद्धिताभ्यां कोपधस्य न ॥ पाचिकाभार्यः । रसिकाभार्यः ॥ संज्ञापूरणार्थप्रत्यययोर्न ॥ दत्ताभार्यः । पञ्चमीभार्यः ॥ वृद्धिहेतो-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

स्तद्धितस्यारक्तविकारार्थस्य न ॥ माथुरीभार्यः । अरक्तेति किम् । कषायेण रक्ता कन्था काषायी । काषायी कन्था यस्य स काषायकन्थः । विकारे किम् । हेम्नो विकारो हैमी, हैमी मुद्रिका यस्येति हैममुद्रिकः ॥ युटि सति पुंवत् ॥ वैयाकरणभार्यः ॥ स्वाङ्गङीपोऽमानिनि न ॥ सुकेशी भार्या यस्य स सुकेशीभार्यः । मानिनि तु सुकेशमानी ॥ जातिवाचिनः स्त्रीप्रत्ययान्तस्य न ॥ शूद्राभार्यः । ब्राह्मणीभार्यः । इत्यादि ॥ गोः ॥ गोशब्दस्यान्यार्थे वर्तमानस्य ह्रस्वो भवति ॥ पञ्च गावो यस्य स पञ्चगुः ॥ संख्यासुव्याघ्रादिपूर्वस्य पादशब्दस्यान्तलोपः ॥ सहस्रं पादा यस्य स सहस्रपात् ॥ शसादौ स्वरे तद्धितयस्वरयोरीपीकारे च पदादेशः । सहस्रपदः । व्याघ्रपदी कुले । वैयाघ्रपदः । वैयाघ्रपद्यः । द्विपाद् । द्विपादौ । द्विपादः । सुपात् । व्याघ्रपात् । "टाङकाः" मध्याह्नः । पूर्वाह्णः ॥ नो वा ॥ नान्तस्य टेर्लोपः स्वरे यकारे च परे । वाग्रहणात्क्वचिन्न । क्वचिदुपधालोपः । कविराजः । कृष्णसखः । देवगवी । परमगवः । राजपुरम् । एकधुरम् । सर्वधुरम् । वाङ्मनसे । दक्षिणापथः । अहोरात्रः । द्विरात्राः । पञ्चपाः । बहुकर्तृकः । बहुलक्ष्मीकः । स्त्रीपुंसौ । ऋक्सामे । महोक्षः । वृद्धोक्षः । द्व्यायुषम् । त्र्यायुषम् । ग्रामतक्षः । फलकसक्थम् । मृगसक्थम् । पूर्वसक्थम् । अर्द्धखारम् । अर्द्धनावम् ॥ कर्मधारयस्तुल्यार्थे ॥ पदद्वये

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

तुल्यार्थे एकार्थनिष्ठे सति कर्मधारयः समासो भवति ॥ **कर्मधारये पूर्वं पुंवत्** ॥ नीलमुत्पलम् । नीलोत्पलम् । रक्तलता । पुंस्कोकिलः । ब्राह्मणभार्या । दत्तभार्या । सुकेशभार्या । स्नातानुलिप्तः । एकनाथः । सर्वयाज्ञिकाः । जरन्नैयायिकाः । पुराणमीमांसकाः । नवपाठकाः । केवलवैयाकरणाः ॥ **नाम्नश्च कृता समासः** ॥ प्रादेरुपसर्गस्य नाम्नश्च कृदन्तेन सह तत्पुरुषः समासो भवति ॥ व्याघ्रः । कच्छपः । कुम्भकारः । **शाकपार्थिवादीनां मध्यमपदलोपः** ॥ शाकप्रियः पार्थिवः शाकपार्थिवः । देवपूजको ब्राह्मणो देवब्राह्मणः ॥ **सहादेः सादिः** ॥ समासे सति सहादेः सादिरादेशः ॥ सह पुत्रेण सपुत्रः । सहाञ्चतीति सध्र्यङ् । समञ्चतीति सम्यङ् । तिरोऽञ्चतीति तिर्यङ् । विष्वद्र्यङ् । देवद्र्यङ् । लक्ष्मीर्जाया यस्य स लक्ष्मीजानिः । कुत्सितमन्नं कदन्नम् । ईषदुष्णम् कोष्णम् । कवोष्णम् । कदुष्णम् । द्यौश्च भूमिश्च द्यावाभूमी । जाया च पतिश्च जम्पती दम्पती । मातापितरौ । कुपुरुषः कापुरुषः ॥ **षष उत्वं दतृदशधासूत्तरपदादेष्टुत्वम्** ॥ षट् च दश च षोडश । षट् दन्ता यस्य षोडन् । संख्यायाः प्रकारे धा । षट् प्रकाराः । षोढा, षड्धा । महान् ईश्वरो महेश्वरः । महादेवः । खरा नासिका यस्य स खरणसः । खरणाः । खुरणसः । खुरणाः । उन्नता नासिका यस्य स उन्नसः । प्रणसः । विगता नासिका यस्य स विग्रः । विख्यः । चतस्रोऽस्रयो यस्य स चतुरस्रः । प्रोष्ठो गौस्तस्येव पादा यस्य स प्रोष्ठपदः । प्रगते

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

जानुनी अस्य प्रज्ञुः । संज्ञुः । ऊर्ध्वाद्वा ज्ञुः ॥ ऊर्ध्वज्ञुः, ऊर्ध्व-जानुः ॥ बहुव्रीहौ धनुषोऽनङ् ॥ अधिज्यधन्वा । शार्ङ्गं धनुरस्य शार्ङ्गधन्वा । उद्गन्धिः । सुगन्धिः । पूतिगन्धिः । सुरभिगन्धिः । द्विदन् । चतुर्दन् । असुमञ्चतीति अमुमुयङ् । अदमुयङ् । अदद्र्यङ् । कौमुदगन्ध्यायाः पुत्रः कौमुदगन्धीपुत्रः । कौमुदगन्धीपतिः । समानं ज्योतिरस्य सज्योतिः । सनाभिः । सनामा । सवयाः । संब्रह्मचारी । सतीर्थ्यः । क्षीरोदः । सुरोदः । लवणोदः । शुद्धोदः । पृषोदरः । वारिवाहको बलाहकः । गूढोत्मा । दक्षिणतीरम् । दक्षिणतारम् । इत्यादि ॥ अलुक् क्वचित् ॥ क्वचित्समासे तद्धिते च विभक्तेरलुक् ॥ कृच्छ्रान्मुक्तः । स्तोकान्मुक्तः । दूरान्मुक्तः । निकटान्मुक्तः । अप्सु-योनिः । सरसिजम् । उरसिलोमा । हृदिस्पृक् । कण्ठेकालः । वाचो-युक्तिः । दिशोदण्डः । पश्यतोहरः । खेशयः । ग्रामेवासः । ग्रामे-वासी । चौरस्यकुलम् । ओजसाकृतम् । अम्भसाकृतम् । सहसा-कृतम् । पुंसानुजः । जनुषान्धः । आत्मनापञ्चमः । त्वचिसारः । गवि-ष्ठिरः । युधिष्ठिरः । आत्मनेपदम् । आत्मनेभाषा । मध्येगुरुः । स्तम्बे-रमः । कर्णेजपः । पूर्वाह्णेतरे । पूर्वाह्णेतमे । आमुष्यायणः ॥ आमुष्य-कुलिका । आमुष्यपुत्रिका ॥ "मातृपितृभ्यां स्वसुः सस्य षः" मातृ-ष्वसा । पितृष्वसा । मातृपितृभ्यां वा । मातुःस्वसा, मातुःष्वसा । पितुःस्वसा, पितुःष्वसा । होतुरन्तेवासी । होतुःपुत्रः । पितुरन्तेवासी ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

पितुःपुत्रः । देवानांप्रिय इति च मूर्खे । दिवोदासः । शुनःशेफः । शुनःपुच्छः । इत्यादि ॥ तरतमरूपकल्पचेलड्ब्रुवगोत्रमतहतेषु ईबन्तस्यानेकस्वरस्य ह्रस्वो भाषितपुंस्कस्य ॥ ब्राह्मणितरा । ब्राह्मणितमा । ब्राह्मणिरूपा । ब्राह्मणिकल्पा । ब्राह्मणिचेली ॥ अनीबन्तस्य स्त्रीप्रत्ययान्तस्येबन्तस्यैकस्वरस्य वा ह्रस्वस्तरादौ ॥ ब्रह्मबन्धूतरा, ब्रह्मबन्धुतरा । स्त्रीतरा, स्त्रितरा ॥ त्रितः परस्य वा ॥ विदुषितरा, विद्वत्तरा । भवतितरा, भवत्तरा । पचन्तितरा, पचत्तरा ॥ इष्टकेषीकामालानां चिततूलभारिषु ह्रस्वः ॥ इष्टकचितम् । पक्वेष्टकचितम् । इषीकतूलम् । मुञ्जेषीकतूलम् । मालभारी । उत्पलमालभारी ॥ कारे सत्यागदस्य मुम् ॥ सत्यंकारः । अगदंकारः ॥ अस्तोश्च ॥ अस्तुंकारः ॥ धेनोर्भव्यायाम् ॥ धेनुंभव्या ॥ लोकस्य पृणे ॥ लोकंपृणः । इत्येऽनभ्यासस्य ॥ मुम् । अनभ्यासमित्यः ॥ भ्राष्ट्राग्न्योरिन्धे ॥ भ्राष्ट्रमिन्धः । अग्निमिन्धः ॥ गिलेऽगिलस्य ॥ मुम् ॥ तिमिंगिलः ॥ गिलगिले च ॥ तिमिंगिलगिलः ॥ उष्णभद्रयोः करणे ॥ उष्णंकरणम् । भद्रंकरणम् ॥ रात्रेः कृति वा ॥ रात्रिंचरः, रात्रिचरः । रात्रिमटः, रात्र्यटः ॥ नहिवृतिवृषिव्यधिरुचिसहितनिषु ॥ क्विबन्तेषु पूर्वस्य दीर्घः ॥ उपानत् । नीवृत् । प्रावृट् । मर्माावित् । नीरुक् । अभीरुक् । ऋतीषट् । परीतत् ॥ मत्वर्थे बहुस्वरस्य ॥ अमरावती ॥ शरादेश्च ॥ शरावती ॥ अजिरादेर्न ॥ अजिरवती ॥ उपसर्गस्य

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

घञ्यमनुष्ये वा दीर्घः ॥ परिपाकः, परीपाकः । परिहासः परीहासः । अमनुष्ये किम् । निषादः ॥ **आदेश्च द्वन्द्वे** ॥ द्वन्द्वे सति क्वचिदादेर्लोपः ॥ माता च पिता च पितरौ । श्वश्रूश्च श्वशुरश्च श्वशुरौ । दुहिता च पुत्रश्च पुत्रौ । स्वसा च भ्राता च भ्रातरौ ॥ **ऋतां द्वन्द्वे** ॥ पूर्वस्यात्वम् ॥ मातापितरौ । होतापोतारौ । नेष्टोद्गातारौ ॥ **पुत्रे च** ॥ पितापुत्रौ । गावश्च गावश्च गाव इमाः । शुक्लश्च शुक्ला च शुक्लं च शुक्लम् । स च यश्च तौ यौ वा ॥ **दिक्संख्ये संज्ञायाम्** । दिग्वाचिनः संख्यावाचिनः शब्दाः समानाधिकरणेन संज्ञायामेव समस्यन्ते स कर्मधारयः समासः ॥ दक्षिणाग्निः । सप्तर्षयः संज्ञायां किम् । पञ्चफलानि । दिक्संख्ये किम् । शूर्पणखा ॥ **द्वन्द्वतत्पुरुषयोः परपदस्येव लिङ्गम्** ॥ कुक्कुटमयूर्याविमे । मयूरीकुक्कुटाविमौ । अर्द्धपिप्पली ॥ **द्विगुप्राप्तापन्नालंपूर्वप्रादिसमासे न** ॥ पञ्चकपालः । प्राप्तो जीविकां प्राप्तजीविकः । आपन्नजीविकः । अलंकुमार्यै । अलंकुमारिः । निष्कौशांबिः ॥ **अश्ववडवयोर्द्वन्द्वः पूर्ववल्लिङ्गः** ॥ अश्ववडवान् ॥ **रात्राह्नाहान्ताः पुंस्येव** ॥ अहोरात्रः । पूर्वरात्रः । पूर्वाह्णः । द्व्यहः । पूर्वाहः ॥ **संख्यापूर्वं रात्रं क्लीबम्** ॥ द्विरात्रम् । त्रिरात्रम् ॥ **अपथं तत्पुरुषे क्लीबम्** ॥ अपथम् ॥ **अर्द्धर्चादयः क्लीबपुंसोः** ॥ अर्द्धर्चम्, अर्द्धर्चः । ध्वजम् । ध्वजः । तीर्थम् । तीर्थः ॥ एवं शरीरमण्डपीयूषदेहदेशाङ्कुशकलशादयः ॥ **आवन्तोत्तरपदाद्द्विगोर्वेप्** ॥ पञ्चखट्वी,पञ्चखट्वम् ॥ **अनो नलोपो द्विगोर्वेप्** ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

पञ्चतक्षम्, पञ्चतक्षी ॥ पुण्यसुदिनाभ्यामह्नः क्लीबता ॥ पुण्याहम् । सुदिनाहम् ॥ संख्याऽव्ययाभ्यां परस्य पथः क्लीबता ॥ त्रिपथम् ॥ विपथम् ॥ सामान्ये नपुंसकम् ॥ मृदु पचति । प्रातः कमनीयम् ॥ उपज्ञोपक्रमान्तस्तत्पुरुषः क्लीबम् ॥ उपज्ञायमानोपक्रम्यमाणयोः प्राथम्यं चेदाख्यातुमिष्यते ॥ पाणिन्युपज्ञं ग्रन्थः । नन्दोपक्रमं द्रोणः ॥ छायान्तश्च पूर्वपदार्थबाहुल्ये ॥ इक्षूणां छाया इक्षुच्छायम् ॥ राजपर्यायपूर्वो रक्षःपिशाचादिपूर्वश्च सभान्तः क्लीबम् ॥ इनसभम् । ईश्वरसभम् । नेह । राजसभा । रक्षःसभम् । पिशाचसभम् ॥ सङ्घातार्थे सभान्तः ॥ स्त्रीसभम्, स्त्रीसङ्घात इत्यर्थः ॥ सेनासुराच्छायाशालानिशान्तो वा ॥ ब्राह्मणसेनम् । यवसुरम् । कुड्यच्छायम् । गोशालम् । श्वनिशम् । पक्षे ब्राह्मणसेनेत्यादि ॥

इति समासप्रक्रिया ॥

अथ तद्धिताः ।

अपत्येऽण् ॥ नाम्नोऽपत्येऽर्थेऽण् प्रत्ययः ॥ **आदिस्वरस्य ञ्णिति च वृद्धिः** ॥ स्वराणां मध्ये य आदिस्वरस्तस्य वृद्धिर्ञिति णिति च तद्धिते ॥ **वोऽव्यस्वरे** ॥ उवर्णस्योतश्चाव् तद्धितस्य यकारे स्वरे च ॥ उपगोरपत्यमौपगवः । वैदुषः । वासिष्ठः । गौतमः । भार्गवः । आङ्गिरसः । वैदः । और्वः । यात्रेयः ॥ **ऋ उरणि** ॥ संख्यासंभद्रपूर्वस्य मातृशब्दस्य ऋत उर्भवत्यणि परे ॥ षाण्मातुरः । सांमातुरः । भाद्रमातुरः ॥ शिवादे-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

श्वाण् ॥ शैवः । गाङ्गः ॥ **अत इञनृषेः ॥** अकारान्तान्नाम्नोऽनृषिशब्दापत्येऽर्थे इञ् ॥ दैवदत्तिः । श्रैधरिः । दाशरथिः । पौरंदरिः ॥ **बह्वादेश्च ॥** बहोरपत्यं बाहविः । औडुलोमिः । गार्गिः । वैदिः । नाडिः । कौञ्जिः ॥ **सुधातृव्यासवरुडनिषादचण्डालबिम्बानामकङ् च ॥** सुधातुरपत्यं सौधातकिः । वैयासकिः । वारुडकिः । नैषादकिः । चाण्डालकिः । बैम्बकिः ॥ **ण्यायनणेयण्णीया गर्गनडात्रिस्त्रीपितृष्वस्रादेः ॥** गर्गादेर्ण्यो नडादेरायनण् अत्र्यादेः स्त्रीप्रत्ययान्ताच्च एयण् पितृष्वस्रादेर्णीयोऽपत्येऽर्थे ॥ गार्ग्यः । वात्स्यः । कात्यः । वातण्ड्यः । आवट्यः । माण्डूक्यः । पौतिमाष्यः । नाडायनः । चारायणः । गार्ग्यायणः । वात्स्यायनः । आमुष्यायणः । आत्रेयः । कापेयः । नैधेयः । गाङ्गेयः । माहेयः । गौधेयः । नाटेयः ॥ **कल्याण्यादेरिनङ् च ॥** कल्याणिनेयः । कौलटिनेयः ॥ **गोधादेरारणेरणौ ॥** गौधारः । नाटारः । पाण्डारः । गौधेरः । नाटेरः । पाण्डेरः । पैतृष्वस्रीयः । मातृष्वस्रीयः ॥ **पितृष्वस्रादेरेयाणि टिलोपः ॥** पैतृष्वसेयः । मातृष्वसेयः ॥ **पाण्डोर्ड्यण् ॥** पाण्ड्यः ॥ **चटकादेरैरण् ॥** चटकस्यापत्यं चाटकैरः ॥ **स्त्र्यपत्ये लुक् ॥** चटका ॥ **लुग्बहुत्वे क्वचित् ॥** प्रत्ययस्य ॥ गर्गाः । वसिष्ठाः । भृगवः । अङ्गिरसः । वत्साः । कुत्साः । गौतमाः । अत्रयः । बिदाः । अङ्गाः । वङ्गाः । कलिङ्गाः । विदेहाः ॥ **स्त्रियामवन्तिकुन्तिकुरुशूरसेनादिभ्योऽबहुत्वेऽपि ॥**

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

अवन्ती । कुन्ती । कुरूः । शूरसेनी ॥ **देवतेदमर्थे** ॥ देवतार्थे इदमर्थे चोक्ता वक्ष्यमाणाश्च प्रत्ययाः ॥ इन्द्रो देवताऽस्य ऐन्द्रम् । सौम्यम् । आग्नेयम् । गृहमेधीयम् । वास्तोष्पतीयम् । अग्नीषोमीयम् । मरुत्वतीयम् ॥ **अपोनपादपान्नपातोरपोनप्तृअपान्नप्तृआदेशौ** ॥ इयेययोः परतः । अपोनप्त्रियम्, अपोनप्त्रीयम् । अपान्नप्त्रियम्,अपान्नप्त्रीयम् । **प्रावृष एण्यः** । प्रावृड् देवताऽस्य प्रावृषेण्यम् । कः प्रजापतिर्देवताऽस्य कायम् ॥ **क्वचिद्द्वयोः** ॥ पूर्वोत्तरपदाद्योः स्वरयोः क्वचिद् वृद्धिर्भवति ञ्णिति ॥ आग्निमारुतम् ॥ **अग्नेरिद्वृद्धौ** । वृद्धिमत्युत्तरपदे अग्नेरिदादेशः स्यात् ॥ आग्निवारुणम् । सौहार्दम् । सौभागिनेयः । सौभाग्यम् । साक्तुसैन्धवः । आनुशातिकम् । ऐहलौकिकम् । पारलौकिकम् । पौर्वाह्णिकम् । **णितो वा** ॥ उक्ता वक्ष्यमाणाश्च प्रत्यया णितो वा ॥ स्वस्रीयः। श्वशुरस्यापत्यं श्वशुर्यः । पित्र्यम् । गव्यम् । पयस्यम् । कुल्यम् । तदीयम् । त्वदीयम् । मदीयम् । **अन्यस्य दक्** ॥ अन्यदीयम् । **पितुर्भ्रातरि व्यः** ॥ पितुर्भ्राता पितृव्यः । **मातुर्भ्रातरि डुलः** ॥ मातुलः मातृपितृभ्यां पितरि मातरि च डामहष् ॥ मातुः पिता मातामहः । पितामहः । मातुर्माता मातामही । पितामही ॥ **अवेर्दुग्धे सोढदूसमरीसाः** ॥ अवेर्दुग्धम् । अविसोढम्, अविदूसम्, अविमरीसम् ॥ **तिलान्निष्फलात्पिञ्जपेजौ** ॥ निष्फलस्तिलस्तिलपिञ्जः, तिलपेजः ॥ **कारकात्क्रियायुक्ते** ॥ कारकादप्येते प्रत्ययाः क्रियायुक्ते कर्तरि कर्मणि

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

च ॥ कुङ्कुमेन रक्तं कौङ्कुमम् । वस्त्रेण परिवृतो वास्त्रो रथः । काम्बलः । द्वैपः । वैयाघ्रः ॥ पाण्डुकम्बलादिनिः ॥ पांडुकम्बलेन संवीतः पाण्डुकम्बली रथः । वसिष्ठेन दृष्टं वासिष्ठं साम । कालेयम् । वररुचिना कृतो वाररुचो ग्रंथः । मनुना प्रोक्तो मानवो धर्मः । मथुराया आगतो माथुरः । ग्रामादागतो ग्राम्यः । धुरं वहतीति धुर्यः । धौरेयः । सर्वधुरीणः । एकधुरीणः ॥ मुखपार्श्वतसोर्लोप ईये ॥ मुखतो भवं मुखतीयम् । पार्श्वतीयम् ॥ देवस्वराजजनपराणां कुक् ईये ॥ देवकीयम् । स्वकीयम् । राजकीयम् । जनकीयम् । परकीयम् ॥ मध्यान्मः ॥ मध्यमः ॥ हेमन्तस्य वा तलोपोऽणि ॥ हैमनम् । हैमंतम् ॥ चिरपरुत्परारिभ्यस्त्नः ॥ चिरत्नम् । परुत्नम् । परारित्नम् ॥ अग्रादिपश्चादन्ताड्डिमः ॥ अग्रिमम् । आदिमम् । पश्चिमम् । अन्तिमम् ॥ हेतुमनुष्येभ्यो वा रूप्यमयटौ ॥ समादागतं समरूप्यम् । सममयम् । समीयम् । देवदत्तमयम् । देवदत्तरूप्यम् । देवदत्तीयम् ॥ छगलिनो णेयिनः ॥ छगलिना प्रोक्तमधीते यः छागलेयिनः ॥ पाराशर्यशिलालिभ्यां भिक्षुनटसूत्रयोर्णिनिः ॥ पाराशर्येण प्रोक्तं भिक्षुसूत्रमधीयते पाराशरिणो भिक्षवः शैलालिनो नटाः ॥ कर्मन्दकृशाश्वादिनिः ॥ उक्तविषये ॥ कर्मन्दिनः । कृशाश्विनः ॥ त्रपुजतुनोः षण् विकारे ॥ त्रापुषम् । जातुषम् ॥ शम्याः ष्लञ् ॥ शामीली स्रुक् ॥ शक्तियष्ट्योरीकण्प्रहरणे ॥ शाक्तीकः । याष्टीकः ॥ विंशतित्रिंशद्भ्यां

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

डकको वा ॥ विंशतेस्तिलोपो डिति ॥ विंशकः । विंशतिकः । त्रिंशत्कः । कर्मण उकञ् ॥ कर्मणे प्रभवति कार्मुकम् ॥ मनोर्जातावपत्ये ष्यषणौ ॥ मनोरपत्यं मनुष्यः । मानुषः । जातौ किम् । मानवः ॥ केनेयेकाः ॥ कारकात्क ईन ईय इक इत्येते प्रत्यया भवंति कर्तरि कर्मणि चोक्तवक्ष्यमाणेष्वर्थेषु च णितो वा ॥ क्रममधीते क्रमकः । पदकः । ग्रामादागतस्तत्र जातो वा ग्रामीणः । सध्रीचीनः । समीचीनः । तिरश्चीनः । कुलस्यापत्यं कुलीनः । महाकुलीनः । आढ्यकुलीनः ॥ क्वचिद्यलोपः ॥ कन्याया अपत्यं कानीनः ॥ कात्यस्येमे कातीयाः छात्राः । गार्गीयाः । रेवत्या अपत्यं रैवतिकः । पुष्येण युक्ता पौर्णमासी पौषी । तैषी । क्षत्रस्यापत्यं क्षत्रियः । शुक्रो देवताऽस्य शुक्रियम् । इन्द्रस्य लिङ्गमिन्द्रियम् । अक्षैर्दीव्यतीत्याक्षिकः । कुद्दालैः खनति कौद्दालिकः । हलं वहति हालिकः । शब्दं करोति शाब्दिकः । दार्दुरिकः । धर्मं चरति धार्मिकः । अधार्मिकः । पक्षिणो हंति पाक्षिकः । शाकुनिकः । तैत्तिरिकः । मात्सिकः । मैनिकः । मार्गिकः । सारङ्गिकः । पुराणमधीते पौराणिकः । ऐतिहासिकः । वैदिकः ॥ पील्वादिकर्णादिभ्यः कुणजाहौ पाकमूलयोः ॥ पीलूनां पाकः पीलुकुणः । कर्णस्य मूलं कर्णजाहम् ॥ पक्षात्तिर्मूले ॥ पक्षस्य मूलं पक्षतिः ॥ चुञ्चुचणौ वित्ते ॥ विद्यया वित्तो विद्याचुञ्चुः, विद्याचणः ॥ वेः शालशङ्कटौ ॥ विस्तृतं विशालम् । विशङ्कटम् ॥ विनञ्भ्यां नानाञौ नसह ॥ असहार्थे पृथग्भावे वर्तमानाभ्यां नानाञौ स्तः ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

विना । नाना ॥ विसम्प्रादेः कटः ॥ विकटम् । संकटम् । प्रकटम् । उत्कटम् ॥ अलाबूतिलोमाभङ्गाभ्यो रजसि ॥ अलाबूनां रजोऽलाबूकटम् । तिलकटम् । उमाकटम् । भङ्गाकटम् ॥ गोष्ठादयः स्थानादिषु पशुनामभ्यः ॥ गवां स्थानं गोष्ठम् । अश्वगोष्ठम् ॥ सङ्घाते कटः॥ अवीनां संघातोऽविकटः ॥ विस्तारे पटः॥ अविपटः ॥ द्वित्वे गोयुगः ॥ द्वावुष्ट्रौ उष्ट्रगोयुगम् ॥ षट्त्वे षड्गवः ॥ अश्वषड्गवम् ॥ स्नेहे तैलः ॥तिलतैलम् ।सर्षपतैलम् ॥ भवने क्षेत्रे शाकटशाकिनौ॥ इक्षूणां भवनं क्षेत्रम् इक्षुशाकटम्, इक्षुशाकिनम् ॥ अवात्कुटारकटौ ॥ अवाचीनोऽवकुटारः । अवकटः ॥ नासिकाया नते संज्ञायां टीटनाटभ्रटा अवात् ॥ नासिकाया नतम् अवटीटम् । अवनाटम् । अवभ्रटम् । तद्योगान्नासिकाऽवटीटा । पुरुषोऽवटीटः ॥ नेर्बिडबिरीसौ ॥ निबिडम् । निबिरीसम् ॥ इनच्पिटचकाः प्रत्यया नेश्चिकचिचिकादेशाः ॥ चिक्किनम् । चिपिटम् । चिक्कम् ॥ क्लिन्नस्य चिल्पिल्चुलो लः प्रत्ययोऽस्य चक्षुषी इत्यर्थे । क्लिन्ने चक्षुषी अस्य चिल्लः । पिल्लः । चुल्लः ॥ उपाधिभ्यामासन्नारूढयोस्त्यकः ॥ पर्वतस्यासन्ना भूमिरुपत्यका ॥ आरूढा अधित्यका ॥ कर्मणष्ठो घटते इत्यर्थे ॥ कर्मणि घटते कर्मठः । साक्षाद् द्रष्टरि संज्ञायां डिनिः ॥ साक्षाद् द्रष्टा साक्षी ॥ इष्टादिभ्य इनिरनेनेत्यर्थे ॥ इष्टमनेन इष्टी । अधीती । हैयङ्गवीनं श्रोत्रियः क्षेत्रियोऽनुपदी इत्यादयो निपात्याः । ह्योगोदोहोद्भवं हैयङ्गवीनम् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

छन्दोऽधीते श्रोत्रियः । परक्षेत्रे चिकित्स्यः क्षेत्रियः । अनुपदमन्वेष्टाऽनुपदी ॥ **आख्याताव्ययसर्वादेष्टेः प्रागकः** ॥ पचतकि । उच्चकैः । नीचकैः । सर्वकः । अयकम् । असकौ । त्वकम् । अहकम् ॥ **त्यतनौ भवाद्यर्थे** ॥ त्यतनौ प्रत्ययौ स्तः अव्ययात् । कुत्र भवः कुत्रत्यः । कुतस्त्यः । अमात्यः । इहत्यः । अव्ययस्य तद्धितयस्वरयोष्टिलोपः । वहिर्भवो बाह्यः ॥ स्वः स्वर्गस्तत्र भवः सौवः । पौनःपुन्यम् । पौनःपुनिकः ॥ **दक्षिणापश्चात्पुरसस्त्यण्** ॥ दाक्षिणात्यः । पाश्चात्त्यः । पौरस्त्यः । ऐषमस्त्यम् । ऐषमस्तनम् ॥ **श्वसस्तिकण्वा** ॥ शौवस्तिकम् । अद्यतनः । ह्यस्तनः । श्वस्तनः । सनातनः । सदातनः । पुरातनः । दोषातनः । सायंतनः । चिरंतनः । प्राह्णेतनः । **स्वार्थेऽपि** ॥ उक्ता वक्ष्यमाणाश्च प्रत्ययाः स्वार्थे स्युः ॥ देवदत्त एव देवदत्तकः । चौरः । वय एव वायसः । रक्ष एव राक्षसः । चत्वारो वर्णाश्चातुर्वर्ण्यम् । समीपमेव सामीप्यम् । चत्वारो वेदाश्चातुर्वेद्यम् । प्रज्ञ एव प्राज्ञः । चातुराश्रम्यम् । त्रैलोक्यम् । अनन्त एवानन्त्यम् । अवसथ एवावसथ्यम् । इतिह एव ऐतिह्यम् । भेषजमेव भैषज्यम् ॥ **भागरूपनामभ्यो धेयः** ॥ भाग एव भागधेयम् । रूपधेयम् । नामधेयम् ॥ **देवात्तः** ॥ देव एव देवता ॥ **मृदस्तिकः** ॥ मृदेव मृत्तिका ॥ **सस्नौ प्रशंसायाम्** ॥ प्रशस्ता मृत् मृत्सा मृत्स्ना ॥ **अणीनयोर्युष्मदस्मदोर्युष्माकास्माकौ एकत्वे तवकममकौ** ॥ युवयोर्युष्माकं वाऽयं यौष्माकः । यौष्माकीणः । आवयोरस्माकं वाऽयम्

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

आस्माकः। आस्माकीनः। तवायं तावकः। ममायं मामकः। तावकीनः। मामकीनः॥ **वत्तुल्ये**॥ सादृश्येऽर्थे वत्प्रत्ययः॥ चन्द्रेण तुल्यं चन्द्रवत्। ब्राह्मणवत्। क्षत्रियवत्। मथुरायामिव मथुरावत्। पाटलिपुत्रे इव प्राकारः पाटलिपुत्रवत्। चैत्रस्येव चैत्रवत्। मैत्रस्य गृहम्॥ **अर्हेऽपि**॥ विधिमर्हति विधिवत्॥ **भावे तत्वयणः**॥ शब्दस्य प्रवृत्तिनिमित्तं भावस्तत्र वाच्ये एते स्युः॥ तान्तं स्त्रियाम्। वान्तं क्लीवम्॥ ब्राह्मणता। ब्राह्मणत्वम्। ब्राह्मण्यम्। शुक्लता। शुक्लत्वम्। शौक्ल्यम्। वैदुष्यम्॥ **कर्मण्यपि**॥ ब्राह्मणस्य कर्म ब्राह्मण्यम्। राज्यम्। स्तैन्यम्॥ **लोहितादेर्डिमन् भावे वा**॥ लोहितिमा। लोहितता। लोहितत्वम्। लौहित्यम्। अणिमा। लघिमा॥ **भावेऽणपि**॥ लाघवम्। गौरवम्। यौवनम्। शैशवम्। मौनम्। हौत्रम्। औद्गात्रम्। महतो भावो महिमा॥ **ऋ र इमनि**॥ हसादेर्लघोर्ऋकारस्य रेफो भवति इमनि इष्ठेयसोश्च॥ पृथोर्भावः प्रथिमा। म्रदिमा। क्रशिमा। द्रढिमा। लघोः किम्। कृष्णिमा। हसादेः किम्। ऋजिमा॥ **बहोर्लोपो भू च बहोः**॥ बहोः परेषामिमनादीनामिवर्णस्तस्य लोपो बहोर्भूरादेशश्च॥ बहोर्भावो भूमा। **स्तेनाद्यो नलोपश्च**॥ स्तेनस्य कर्म भावो वा स्तेयम्॥ **समूहेऽर्थेऽपि**॥ मयूराणां समूहो मायूरम्। कौशिकम्। क्षैत्रम्। कैदारिकम्। गाणिक्यम्। तद्धितयस्वरयोः पुंवत्। हास्तिकम्। गार्भिणम्। ग्रामता। जनता। बंधुता। पाश्या। वात्या।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

खल्या । गव्या । वार्द्धकम् । कैदार्यम् । कावचिकम् । ब्राह्मण्यम् । वाडव्यम् । माणव्यम् । गजता । सहायता ॥ पर्श्वा डुवण् ॥ पर्शूनां समूहः । पार्श्वम् । साक्तुकम् । धैनुकम् । रथ्या ॥ खलगोरथेभ्य इनित्रकट्याः ॥ खलिनी गोत्रा । रथकट्या ॥ हिते च ॥ सूर्याय हितः सूरीयः । आत्मनीनः । विश्वजनीनः । मातृभोगीणः । अपूपाय हितोऽपूपीयः, अपूप्यः । आमिक्षीयम् । शंकव्यम् । गव्यम् । हविष्यम् । खल्यम् । यव्यम् ॥ शुनो वस उर्वा च दीर्घः ॥ शुने हितं शून्यम्, शुन्यम् ॥ ऊधसोनङ् ॥ ऊधन्यः ॥ अजाविभ्यां थ्यः ॥ अजथ्या । अविथ्या । अस्त्यर्थे मतुः ॥ नाम्नः ॥ गावोऽस्यास्मिन्वा संति गोमान् । श्रीर्विद्यतेऽस्य श्रीमान् । विदुष्मान् । गोमती ॥ अइकौ च मत्वर्थे ॥ नाम्नोऽइकस्त्वदन्तात् ॥ अर्शसः । वैजयन्तः । दंडिकः । धनिकः । मान्तोपधाद्वत्विनौ ॥ मान्तान्मान्तोपधादवर्णान्तादवर्णोपधाच्च वतुरिनस्त्वदन्तात् । किंवान् । लक्ष्मीवान् । धनवान् । विद्यावान् । यशस्वान् । भास्वान् । क्षत्री । दण्डी ॥ यवादेर्न ॥ यवमान् । भूमिमान् ॥ तडिदादिभ्यश्च ॥ तडित्त्वान् । विद्युत्त्वान् । मायी । व्रीही । मायिकः ॥ लोमपामपिच्छादिभ्यः शनेलाः ॥ लोमशः । गिरिशः । पामनः । दद्रुणः । अङ्गना ॥ लक्ष्म्या अच्च ॥ लक्ष्मणः ॥ विष्वगित्युत्तरपदलोपश्चाकृतसन्धेः ॥ विषुणः । पिच्छिलः । तुन्दिलः । फेनिलः ॥ सिध्मादेर्लः ॥ सिध्मलः । चूडालः ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

कुमुदनडवेतसेभ्यो ड्मतुः ॥ कुमुद्वान् । नड्वान् । वेतस्वान् ॥ **महिषाड्ड्मतुः** ॥ महिष्मान् देशः ॥ **नडशादाड्ड्वलः** ॥ नड्वलः । शाद्वलः ॥ **शिखाया वलः** ॥ शिखावलः ॥ **नडादीनामीये कुक्** ॥ नडकीयम् ॥ **कुञ्चा ह्रस्वत्वं च** ॥ कुञ्चकीयम् ॥ **शृङ्ग-वृन्दाभ्यामारकः** ॥ शृङ्गारकः । वृन्दारकः ॥ **फलबर्हाभ्या-मिनः** ॥ फलिनः । बर्हिणः ॥ **मलादिनः** ॥ मलिनः ॥ **ईमसश्च** ॥ मलीमसः ॥ **हृदयादालुः** ॥ हृदयालुः ॥ **शीतोष्णतृप्रेभ्यस्तदस-हने** ॥ शीतं न सहते शीतालुः । उष्णालुः । तृप्रं दुःखं न सहते तृप्रालुः ॥ **हिमादेलुः** ॥ हिमं न सहते हिमेलुः ॥ **बलादूलः** ॥ बलं न सहते बलूलः ॥ **वातात्समूहे च** ॥ वातं न सहते तस्य समूहो वा वातूलः ॥ **तः पर्वमरुद्भ्याम्** ॥ पर्वतः । मरुत्तः ॥ **ऊर्णा-हंशुभंभ्यो युः** ॥ ऊर्णायुः । अहंयुः । शुभंयुः ॥ **स्वादामिन्नै-श्वर्ये** ॥ स्वमैश्वर्यमस्यास्मिन्वास्ति स्वामी । **वातातीसारपिशाचा-नामिनिः कुक् च** ॥ वातकी । अतीसारकी । पिशाचकी ॥ **ज्योत्स्नादिभ्योऽण्** ॥ ज्यौत्स्नः । तामिस्रः । तापसः । सैकतः ॥ शार्करः ॥ **ऊषशुषिमुष्कमधुखमुखकुञ्जनगपांशुपाण्डुभ्यो रः** ॥ ऊषरः । शुषिरम् । मुष्करः । मधुरः । खरः । मुखरः । कुञ्जरः ॥ नगरम् । पांशुरः । पाण्डुरः ॥ **कच्छ्वा ह्रस्वत्वं च** ॥ कच्छुरः ॥ **द्युद्रुभ्यां मः** ॥ द्युमः । द्रुमः ॥ **केशादिभ्यो वः** ॥ केशवः । मणिवः । हिरण्यवः ॥ **अर्णसो लोपश्च** ॥ अर्णवः । **रजःकृष्या-**

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

सुतिपरिषद्भ्यो वलः ॥ रजस्वला ॥ कृष्यादीनां वले दीर्घः ॥ कृषीवलः । आसुतीवलः । परिषद्वलः ॥ अन्येभ्योऽपि ॥ भ्रातृवलः । पुत्रवलः । दन्तावलः । बन्धुवलः ॥ तुन्दिबलिवटेर्भः ॥ तुन्दिभः । बलिभः । वटिभः । एतत्किमिदं यत्तद्भ्यः परिमाणे वतु ॥ यत्तदेतदामा वतौ ॥ यावान् ॥ तावान् । एतावान् ॥ किमः किर्वतोर्वस्य यः ॥ कियान् ॥ इदम इश्वतोर्वस्य यः ॥ इयान् ॥ श्रद्धादेर्लुः ॥ श्रद्धालुः । कृपालुः । दयालुः ॥ औन्नत्ये दन्तादुरः ॥ दन्तुरः ॥ अस्मायामेधास्रग्भ्यो विनिः ॥ तपस्वी । ओजस्वी । वर्चस्वी । तेजस्वी । मायावी । मेधावी । स्रग्वी ॥ आमयस्य दीर्घश्च ॥ आमयावी ॥ वाचो ग्मिनिः ॥ वाग्मी ॥ आलाटौ कुत्सितभाषिणि ॥ वाचालः । वाचाटः ॥ ईषदसमाप्तौ कल्पदेश्यदेशीयाः ॥ ईषदपरिसमाप्तः सर्वज्ञः सर्वज्ञकल्पः । पटुदेश्यः । विद्वद्देशीयः । पटुदेशीयः ॥ बहुर्वा उक्तार्थे स च प्रागेव ॥ ईषदूनः पटुः बहुपटुः ॥ प्रकारे जातीयः ॥ पटुप्रकारः । पटुजातीयः ॥ कुटीशमीशुण्डाभ्यो रो ह्रस्वत्वे ॥ ह्रस्वा कुटी कुटीरः । शमीरः । शुण्डारः ॥ कुत्वा डुपः ॥ ह्रस्वा कुतूः कुतुपः ॥ कासूगोणीभ्यां ष्टरः ॥ ह्रस्वा कासूः कासूतरी । गोणीतरी ॥ वत्सोक्षाश्वर्षभेभ्यस्तनुत्वे ॥ तनुर्वत्सः । वत्सतरः । उक्षतरः । अश्वतरः । ऋषभतरः ॥ देवतान्तात्तादर्थ्ये यः ॥ अग्निदेवतायै

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

इदमग्निदेवत्यम् ॥ पादार्घाभ्यां च ॥ पादार्थमुदकं पाद्यत् । अर्घ्यम् ॥ नवस्य नू आदेशस्त्नतनईनाः प्रत्ययाः स्वार्थे ॥ नूत्नम् । नूतनम् । नवीनम् ॥ पुराणे प्रान्नश्च ॥ प्रणम् । प्रत्नम् । प्रतनम् । प्रीणम् ॥ अतिथेऽर्ज्यः ॥ अतिथय इदमातिथ्यम् ॥ प्रशंसायां रूपः ॥ प्रशस्तो वैयाकरणो वैयाकरणरूपः ॥ कुत्सायां पाशः ॥ कुत्सितो भिषक् भिषक्पाशः ॥ भूतपूर्वे चरट् ॥ पूर्वं दृष्टो दृष्टचरः । दृष्टचरी । आढ्यचरी ॥ षष्ठ्या रूप्य च प्राचुर्यविकारप्राधान्यादिषु मयट् ॥ अन्नं प्रचुरमत्रान्नमयो यज्ञः । मृन्मयो घटः । स्त्रीमयो जाल्मः । अमृतं स्वरूपमस्यामृतमयश्चन्द्रः ॥ आम्रस्य विकारोऽवयवो वा आम्रमयम् । शरमयम् ॥ गोः पुरीषे ॥ गोमयम् ॥ न संधिय्वोरैयुट् ॥ संधिजयोर्यकारवकारयोः संबन्धिनः स्वरस्य न वृद्धिः किंतु तयोरैयुडागमो यस्यैट् वस्यौट् पश्चाद्वृद्धिः ॥ व्याकरणमधीते वेद वा वैयाकरणः । स्वश्वं वेद सौवश्वः । व्यासस्यापत्यं वैयासकिः ॥ द्वारादीनां च ॥ द्वारादीनां संबन्धिनः स्वरस्य न वृद्धिः । किंतु तयोरैयुडागमः ॥ द्वारे नियुक्तो दौवारिकः । व्यल्कशस्येदं वैयल्कशम् । सौवरम् । शौवम् । सौवग्रामिकः । नैयग्रोधम् । सौवादुमृदवम् । शौवस्तिकम् । शौवापदम् ॥ इतो जातार्थे ॥ लज्जा जातास्य लज्जितः । फलितः । तारकितः ॥ तरतमेयस्विष्ठाः प्रकर्षे ॥ अतिशयेन शुक्लः शुक्लतरः । शुक्लतमः ॥ ईयस्विष्ठौ डितौ ॥ अतिशयेन लघुर्लघीयान् । लघिष्ठः ॥ गुर्वादेरिष्ठेमेयस्सु गरादिष्टय-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

लोपश्च ॥ गुरोर्भावो गरिमा । अतिशयेन गुरुर्गरिष्ठः, गरीयान् । प्रियस्य भावः प्रेमा । अतिशयेन प्रियः प्रेष्ठः, प्रेयान् । अतिशयेन स्थूलः स्थविष्ठः, स्थवीयान् । अतिशयेन प्रशस्यः श्रेष्ठः, श्रेयान् । दीर्घः द्राघिष्ठः, द्राघीयान् । स्थिरः स्थेष्ठः, स्थेयान् । स्फिरः स्फेष्ठः, स्फेयान् । ऊरुः वरिष्ठः, वरीयान् । बहुलः बंहिष्ठः, बंहीयान् । वृद्धः वर्षिष्ठः, वर्षीयान् । तृप्तः त्रपिष्ठः, त्रपीयान् । वृन्दारकः वृन्दिष्ठः, वृन्दीयान् । दूरः दविष्ठः, दवीयान् । युवा यविष्ठः, यवीयान् ॥ **युवाल्पयोः कन् वा** ॥ कनिष्ठः, कनीयान् । अल्पिष्ठः, अल्पीयान् । ह्रस्वः ह्रसिष्ठः ह्रसीयान् । क्षिप्रः क्षेपिष्ठः, क्षेपीयान् । क्षुद्रः क्षोदिष्ठः, क्षोदीयान् । अन्तिकः नेदिष्ठः, नेदीयान् । बाढः साधिष्ठः, साधीयान् ॥ **वृद्धिप्रशस्योर्वा** ॥ **ईलोपो ज्याशब्दादीयसः** ॥ ज्याशब्दात्परस्येयस ईकारस्य लोपः । अतिशयेन वृद्धः, प्रशस्यो वा ज्यायान्, ज्येष्ठः ॥ **बहोरिष्ठेयिः** ॥ बहोरुत्तरस्येकारस्य यिरादेशः ॥ **बहोर्भूश्च** ॥ भूयिष्ठः, भूयान् ॥ **विन्मतोर्लुक्** ॥ **किमोऽव्ययादाख्याताच्च तरतमयोराम्वा द्रव्यप्रकर्षे** ॥ किंतराम् । किंतमाम् । कुतस्तराम् । कुतस्तमाम् । उच्चैस्तराम् गायति । उच्चैस्तमाम् । पचतितराम् । पचतितमाम् । पठतितराम् । पठतितमाम् । द्रव्यप्रकर्षे तु । उच्चैस्तमस्तरुः ॥ **परिमाणे दघ्नद्द्वयसट्मात्रटः** ॥ जानुदघ्नम् । शिरोद्वयसम् । पुरुषमात्रम् ॥ **पुरुषहस्तिभ्यामण् च** ॥ पौरुषम् । हास्तिनम् ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

वत्वन्तात्स्वार्थे द्वयसट्मात्रटौ ॥ तावद्द्वयसम् । तावन्मात्रम् ॥ द्वयोर्बहूनां चैकस्य निर्द्धारणे किमादिभ्यो डतरडतमौ ॥ भवतोः काण्वः कतरः । भवतां तान्त्रिकः कतमः । भवतोर्यतरस्ताकिकः ततर उद्गृह्णातु ॥ संख्येयविशेषावधारणे द्वेस्तीयः ॥ द्वयोः पूरणो द्वितीयः ॥ त्रेस्तृश्च ॥ तृतीयः ॥ षट्कतिकतिपयचतुर्भ्यस्थट् ॥ षष्ठः । कतिथः । कतिपयथः । चतुर्थः । चतुरो थयौ चस्य च लोपः ॥ तुर्यः । तुरीयः ॥ पञ्चादेर्मट् ॥ पञ्चमः । सप्तमः ॥ एकादशादेर्डट् ॥ एकादशः ॥ द्वादशः ॥ द्वयष्टनोरात्वं संख्यायामुत्तरपदे ॥ अष्टादशः ॥ त्रेस्त्रयस् ॥ त्रयोदशः । चतुर्दशः । पञ्चदशः । षोडशः । सप्तदशः ॥ विंशत्यादेर्वा तमट् ॥ विंशतितमः । एकेन ऊना विंशतिः एकोनविंशतिः । एकोनविंशतेः संख्यापूरक एकोनविंशतितमः ॥ विंशतेस्तिलोपो डिति ॥ विंशः । त्रिंशत्तमः । त्रिंशः । द्वाभ्यामधिका अशीतिर्द्व्यशीतिः । द्व्यशीतेः संख्यापूरको द्व्यशीतितमः । द्विचत्वारिंशत्तमः । पञ्चाशत्तमः । षष्टेः संख्यापूरणः षष्टितमः । सप्ततितमः । नवतितमः ॥ शतादेर्नित्यम् ॥ शततमः ॥ संख्याया: प्रकारे धा ॥ द्विधा । त्रिधा । चतुर्धा । दशधा ॥ द्वित्रिभ्यामेधाधमुञो वा ॥ द्वेधा । त्रेधा । द्वैधम् । त्रैधम् ॥ एकाद्ध्यमुञ्वा ॥ ऐकध्यम् । एकधा ॥ एकादाकिन्नसहाये ॥ एकाकी ॥ क्रियाया आवृत्तौ कृत्वसु ॥ पञ्चकृत्वः ॥ सप्तकृत्वः ॥ द्वित्रिचतुर्भ्यः सुः ॥ द्विः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

त्रिः । चतुः ॥ एकस्य सकृदादेशश्च ॥ एकवारं सकृत् ॥ बह्वल्पार्थात्कारकाच्छस् ॥ बहुशः । अल्पशः ॥ संख्यापरिमाणाभ्यां वीप्सायाम् ॥ द्वौ द्वौ इति द्विशो ददाति । प्रस्थशः । माषशः ॥ तयडयटौ संख्याया अवयवे ॥ द्वाववयवौ यस्य द्वितयम् । त्रितयम् । चतुष्टयम् । चतुष्टयी । स्त्रीपुंसाभ्यां नञ्स्नञौ ॥ स्त्रियां भवः स्त्रैणः । पुंसि भवः पौंस्नः ॥ वीप्सायां पदं द्विः ॥ वृक्षं वृक्षं सिञ्चति । ग्रामो ग्रामो रमणीयः ॥ परेर्वर्जने वा द्वित्वम् । परिपरि वङ्गेभ्यो वृष्टो देवः । परिवङ्गेभ्यो वृष्टो देवः । वङ्गान्परिहृत्येत्यर्थः ॥ उपर्यध्यधसः सामीप्ये द्विः ॥ उपर्युपरि ग्रामम् । ग्रामस्योपरिष्टात्समीपदेश इत्यर्थः । अध्यधि सुखम् । सुखस्योपरिष्टात्समीपदेश इत्यर्थः ॥ वाक्यादेः संबोधनस्यासूयासंमतिकोपकुत्सनभर्त्सनेषु ॥ असूयायामुदाहरणम् । सुन्दरसुन्दर वृथा ते सौन्दर्यम् । संमतौ । देवदेव वन्द्योऽसि । कोपे । दुर्विनीत दुर्विनीत इदानीं ज्ञास्यसि । कुत्सने । धानुष्क धानुष्क वृथा ते धनुः । भर्त्सने चोरचोर घातयिष्यामि त्वाम् ॥ द्विरुक्त एकशब्दो बहुव्रीहिवत् ॥ तेन विभक्तिलोपपुंवद्भावौ । एकैकमक्षरम् । एकैकयाहुत्या । इह पूर्वभागे पुंवद्भावादवग्रहे विशेषः । पदविभागोऽवग्रहः । एकैकया इत्यादिविशेषः । एकैकस्मै देहि ॥ पीडायां द्योत्यायां द्वे स्तो बहुव्रीहिवच्च ॥ गतगतः । विरहात्पीड्यमानस्येयमुक्तिः । गतगता ॥ सादृश्ये द्योत्ये गुणवचनस्य द्वे स्तो बहुव्रीहिवच्च ॥ पटुपट्वी । पटुपटुः । पटु-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

सदृशः ईषत्पटुरिति यावत्। गुणोपसर्जनद्रव्यवाचिनः केवलगुणवाचिनश्चेह गृह्यन्ते। शुक्लशुक्लः पटः। शुक्लशुक्लं रूपम्॥ अनुक्रमे द्योत्ये द्वे॥ मूलेमूले स्थूलो वृक्षः॥ संभ्रमेण प्रवृत्तावनेकधा प्रयोगः॥ सर्पः ३ बुध्यस्व ३॥ क्रियासमभिहारे द्वे॥ लुनीहिलुनीहि इत्येवायं लुनाति॥ कर्मव्यतिहारे सर्वादेर्द्वित्वं समासवच्च बहुलम्॥ वहुलग्रहणादन्यपरयोर्न समासवत्। इतरशब्दस्य नित्यं समासवत्॥ असमासवद्भावे पूर्वपदस्थाया विभक्तेः सिरादेशो वाच्यः॥ अन्योऽन्यौ अन्योऽन्यान् अन्योऽन्येन कृतम्। अन्योऽन्यस्मै दत्तम्। इत्यादि। 'अन्योऽन्येषां पुष्करैरामृशन्ते' इति माघः। एवं परस्परम्। घाचस्पत्यादित्वात्सः। इतरेतरम्। इतरेतरेण इत्यादि॥ स्त्रीनपुंसकयोरुत्तरपदस्थाया विभक्तेराम्भावो वा॥ अन्योऽन्याम्। अन्योऽन्यम्। परस्पराम्। परस्परम्। इतरेतराम्। इतरेतरं वा इमे ब्राह्मण्यौ कुले वा भोजयतः॥

दलद्वयेऽप्याबभावः क्लीबे तु विरहः स्यमोः।
समासे सेरलुक्चेति सिद्धं बाहुलकात्त्रयम्॥

समासे सेरलुक्चेत्यस्योदाहरणं तु अन्योऽन्याश्रयः परस्पराक्षिसादृश्यमित्यादिकं बोध्यम्॥ अकृच्छ्रे प्रियसुखयोर्वा द्वित्वम्॥ प्रियप्रियेण ददाति प्रियेण वा। सुखसुखेन ददाति सुखेन वा। अतिप्रियमपि वस्त्वनायासेन ददातीत्यर्थः॥ यथास्वे यथायथम्॥ यथाशब्दस्य द्वित्वं क्लीबत्वं च भवति॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

यथास्वमिति वीप्सायामव्ययीभावः । यो य आत्मा । यद्यच्चात्मीयं यद्यथास्वम् । यथायथं ज्ञाता यथास्वभावमित्यर्थः । यथात्मीयमिति वा ॥ द्वन्द्वं रहस्यमर्यादावचनव्युत्क्रमणयज्ञपात्रप्रयोगाभिव्यक्तिषु ॥ एष्वर्थेषु द्विशब्दस्य द्विर्वचनं पूर्वपदस्याम्भावोऽत्वं चोत्तरपदस्य नपुंसकत्वं च निपात्यते ॥ तत्र रहस्यं द्वन्द्वशब्दस्य वाच्यम् ॥ इतरे तु विषयभूताः । द्वन्द्वं मंत्रयते रहस्यमित्यर्थः । मर्यादा स्थित्यनतिक्रमः। आचतुरं होमे पशवो द्वन्द्वं मिथुनायन्ते । माता पुत्रेण मिथुनं गच्छति । पौत्रेण प्रपौत्रेणापीति मर्यादार्थः। व्युत्क्रमणं पृथगवस्थानम् । द्वन्द्वं व्युत्क्रान्तः । द्विवर्गसंबन्धेन पृथगवस्थितः । द्वन्द्वं यज्ञपात्राणि प्रयुनक्ति । द्वन्द्वं संकर्षणवासुदेवौ । अभिव्यक्तौ साहचर्येणेत्यर्थः ॥ चार्थे द्वन्द्व इति निपातनात्पुंस्त्वमपि ॥ **शेषा निपात्याः कत्यादयः ॥** का संख्या येषां ते कति । दाविकः । शाशकः । दात्यौहः । दार्घसत्रः । श्रायसः ॥

इति श्रीरामाश्रमाचार्यविरचितायां सिद्धान्तचन्द्रिकायां पूर्वार्द्धे संपूर्णम् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

श्रीगणेशाय नमः ।

सिद्धान्तचन्द्रिका ।

उत्तरार्द्धम् ।

अथ भ्वादयः ।

धातोः ॥ इदमधिक्रियते ॥ भ्वादिः ॥ क्रियावाची भ्वादिर्धातुसंज्ञकः स्यात् ॥ आदनुदात्तङितः ॥ अनुदात्तेतो ङितश्च धातोरात् ॥ ञित्स्वरितेत उभे ॥ ञितः स्वरितेतश्च धातोः आत्पे स्तः ॥ परतोऽन्यत् ॥ उक्तनिमित्तहीनाद्धातोः पम् ॥ नव पम् ॥ तिबादीनामाद्यानि नव वचनानि पसंज्ञानि स्युः ॥ पराण्यात् ॥ पराणि नव वचनानि आत्मनेपदानि स्युः ॥ नाम्नि च युष्मदि चास्मदि च भागैः ॥ तिबाद्येकार्थेषु नामादिषूपपदेष्वेते प्रत्ययास्त्रिभिर्भागैः स्युरात्पयोः । नाम्नि प्रयुज्यमाने चादप्रयुज्यमाने प्रथमः। युष्मदि मध्यमः । अस्मद्युत्तमः ॥ कर्तरि पं च ॥ चादात् ॥ भू सत्तायाम् ॥ वर्तमाने ॥ तिप् तस् अन्ति, सिप् थस् थ, मिप् वस् मस्, ते आते अन्ते, से आथे ध्वे, ए वहे महे ॥ वर्तमानार्थक्रियावृ-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

भ्वेर्धातोस्तिबादयः प्रत्यया भवन्ति ॥ एषां संज्ञा लट् ॥ अप् कर्तरि ॥ कर्त्रर्थेषु तिबादिषु चतुर्षु दिप्पर्यन्तेषु परतो धातोरप् स्यात् ॥ गुणः ॥ नाम्यन्तस्य धातोर्गुणो भवति ॥ अपित्तादिर्ङित् ॥ पकारेतं तादिकं च विहाय अन्यप्रत्ययो ङिद्वत्स्यात् ॥ क्ङित्यद्वुसि ॥ क्ङिति ङिति च परे वृद्धिगुणौ न द्विर्वचनहेतुके उसि गुणः स्यात् ॥ इति तसि गुणाप्राप्तौ अब्निमित्तो गुणः । भवतः ॥ अदे ॥ अतो लोपो भवत्यकारे एकारे च परे ॥ भवन्ति । भवसि, भवथः, भवथ ॥ व्मोरा ॥ वमयोः परयोरत आत्वं स्यात् ॥ भवामि, भवावः, भवामः । स भवति । त्वं भवसि । अहं भवामि । युगपत्प्राप्तौ परः । स च त्वं च भवथः । अहं च त्वं च भवावः । अहं च त्वं च स च भवामः ॥ विधिसम्भावनयोः ॥ यात् याताम् युस्, यास् यातम् यात, याम् याव, याम । ईत ईयाताम् ईरन्, ईथास् ईयाथाम्, ईध्वम्, ईय ईवहि ईमहि ॥ विधिः कर्तव्यार्थोपदेशः । सम्भावनं कल्पनम् । तत्र यादादयः । एषां संज्ञा लिङ् ॥ या ॥ अतः परो या इः स्यात् ॥ भवेत्, भवेताम् ॥ युस इट् ॥ अतः परस्य युस इडागमः स्यात् ॥ भवेयुः । भवेः, भवेतम्, भवेत । यामियम् ॥ अतः परो याम् इयं स्यात् । भवेयं, भवेव, भवेम । शिष्यो गुरुशुश्रूषको भवेत् । विधिः । भवेदसौ वेदवित् ब्राह्मणत्वात् ॥ आशीः प्रेरणयोः ॥ तुप् ताम् अन्तु, हि तम् त, आनिप् आवप् आमप् । ताम् आताम् अन्ताम्, स्व आथाम् ध्वम्,

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

ऐपू आवहैप् आमहैप् ॥ अप्राप्तप्रार्थनमाशीः। परस्येष्टार्थशंसनं वा। प्रेरणं प्रवर्तनम्। तत्र तुवादयः ॥ एषां संज्ञा लोट् ॥ तुह्योस्तातङ्ङाशिषि वा ॥ भवतु, भवतात्, भवताम्, भवन्तु । अतः ॥ अतः परस्य हेर्लुक् स्यात् ॥ भव, भवतात्, भवतम्, भवत। भवानि, भवाव, भवाम। अध्ययनायोद्यतो भव सौम्य । आयुष्मान् भवतु भवान् ॥ अनद्यतेऽतीते ॥ दिप् ताम् अन्, सिप् तम् त, अमिप् व म। तन् आताम् अन्त, थास् आथाम् ध्वम्, ई वहि महि ॥ अतीताया रात्रेर्यामद्वयादर्वाग्यावदागामिन्याः प्रथमं यामद्वयं दिवसः सकलः सोऽद्यतनः नास्त्यद्यतनो यस्मिन्नतीते काले तत्र दिवादयः। एषां संज्ञा लङ् ॥ दिसिमीनामिकार उच्चारणार्थः ॥ दिवादावट् ॥ धातोः। अभवत्, अभवताम्, अभवन्। अभवः,अभवतम्, अभवत। अभवम्, अभवाव, अभवाम। ह्योऽभवत् त्वत्पुत्रः ॥ परोक्षे ॥ णप् अतुस् उस्, थप् अथुस् अ, णप् व म। ए आते इरे, से आथे ध्वे, ए वहे महे ॥ धातोः परोक्षेऽतीते काले णबादयः ॥ एषां संज्ञा लिट्। द्विश्च ॥ उक्तार्थणबादियोगे धातोर्द्विर्वचनम् ॥ सस्वरादिर्द्विराद्विः ॥ अनेकस्वरस्य धातोः सस्वराद्योऽवयवोऽद्विरुक्तो द्विर्भवति ॥ णादिः कित् ॥ अपित् णादिः कित् ॥ आभ्वोर्णादौ ॥ पूर्वस्याकारस्य भूशब्दस्य चाकारो णादौ परे ॥ ह्रस्वः ॥ पूर्वसम्बन्धिनो दीर्घस्य ह्रस्वः ॥ झपानां जबजपाः ॥ पूर्वस्य झपानां जबाश्चपाः स्युः ॥ झढधघभानां जडदगबाः खफछठथानां चटतकपाः स्युः ॥ भुवो

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

वुक् ॥ भुवो वुगागमो णादौ स्वरे ॥ बभूव, बभूवतुः, बभूवुः । क्रादेर्णादेः ॥ कृ सृ भृ वृ स्तु द्रु स्रु श्रु इत्येतेभ्यः परस्य वसादेर्णादेरिट् न भवति अन्यस्मात् भवतीति नियमादिद् स्यात् ॥ बभूविथ, बभूवथुः, बभूव । बभूव, बभूविव, बभूविम । बलिर्बलवान् बभूव ॥ आशिषि ॥ यात् यास्ताम् यासुस्, यास् यास्तम् यास्त, यासम् यास्व यास्म ॥ सीष्ट सीयास्ताम् सीरन्, सीष्ठास् सीयास्थाम् सीध्वम्, सीय सीवहि सीमहि ॥ धातोराशिषि यादादयः ॥ एषां संज्ञा लिङ् ॥ आशीर्यादादेः पंकित् । भूयात्, भूयास्ताम्, भूयासुः । भूयाः, भूयास्तम्, भूयास्त । भूयासम्, भूयास्व, भूयास्म । स श्रीमान् भूयात् ॥ श्वस्तने ॥ ता तारौ तारस्, तासि तास्थस् तास्थ, तास्मि तास्वस् तास्मस् । ता तारौ तारस्, तासे तासाथे ताध्वे, ताहे तास्वहे तास्महे ॥ श्वोभाविन्यर्थे तादयः ॥ एषां संज्ञा लुट् ॥ सिसतासीस्य पामिट् ॥ भविता, भवितारौ, भवितारः । भवितासि, भवितास्थः, भवितास्थ । भवितास्मि, भवितास्वः, भवितास्मः । श्वो भविता राज्यभारः कुमारस्य ॥ स्यादौ भविष्यति स्यप् ॥ धातोर्भविष्यति काले स्यप्प्रत्ययो भवति तिबाद्यष्टादशसु परतः ॥ एषां संज्ञा लृट् ॥ भविष्यति, भविष्यतः, भविष्यन्ति । भविष्यसि, भविष्यथः, भविष्यथ । भविष्यामि, भविष्यावः, भविष्यामः । कल्की धर्मपालको भविष्यति ॥ स्यप् क्रियातिक्रमे ॥ क्रियाया अतिक्रमे कुतश्चिदनिष्पत्तौ सत्यां स्यप्प्रत्ययो भवति दिबादिषु परतः ॥ एषां संज्ञा लृङ् ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

यदि सुवृष्टिः सुराज्यं चाभविष्यत् तदा सुभिक्षमभविष्यत् । अभविष्यत् अभविष्यताम्, अभविष्यन् । अभविष्यः, अभविष्यतम्, अभविष्यत । अभविष्यम्, अभविष्याव, अभविष्याम ॥ **भूते सिः** ॥ धातोर्भूतमात्रे काले सिः प्रत्ययो भवति दिबादिषु परतः ॥ एषां संज्ञा लुङ् ॥ **दादेः पे** ॥ पे परे अपिद्दाधास्थेण्भूपिबतिभ्यः परस्य सेर्लोपः ॥ **शाछासाघ्राधेटां वा** । **भुवः सिलोपे अयङ्लुकि गुणो न** ॥ अभूत्, अभूताम् ॥ **भुवः सिलोपे स्वरे वुक्** ॥ अभूवन् । अभूः, अभूतम्, अभूत । अभूवम्, अभूव, अभूम ॥ **माङि सिरेव** । **स्मसहिते दिबादिर्वा** । **मेऽटः** ॥ माङ्योगे अटो लोपः ॥ मा भवान् भूत् । मा स्म भूत् । मास्म भवत् ॥ भू प्राप्तावात्वान् । भवते ॥ **आदाथ ईः** ॥ अतः परस्यात आथश्चात ईर्भवति ॥ भवेते, भवन्ते । भवसे, भवेथे, भवध्वे । भवे, भवावहे, भवामहे । भवेत, भवेयाताम्, भवेरन् । भवेथाः, भवेयाथाम्, भवेध्वम् । भवेय, भवेवहि, भवेमहि । भवताम् भवेताम्, भवन्ताम् । भवस्व, भवेथाम्, भवध्वम् । भवै, भवावहै, भवामहै । अभवत, अभवेताम्, अभवन्त । अभवथाः, अभवेथाम्, अभवध्वम् । अभवे, अभवावहि, अभवामहि । बभूवे, बभूवाते, बभूविरे । बभूविषे, बभूवाथे ॥ **नामिनोऽचतुर्णां धो ढः** ॥ नाम्यन्ताद्धातोः परस्य षीध्वंलुङ्लिटां धस्य ढः ॥ **सेटो हलाद्वा** ॥ बभूविढ्वे, बभूविध्वे । बभूवे, बभूविवहे, बभूविमहे । भविषीष्ट, भविषीयास्ताम्, भविषीरन् । भविषीष्ठाः, भविषीयास्थाम्, भविषीढ्वम्—भविषीध्वम् । भविषीय,

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

भविषीवहि, भविषीमहि । भविता, भवितारौ, भवितारः । भवितासे, भवितासाथे, भविताध्वे । भविताहे, भवितास्वहे, भवितास्महे । भविष्यते, भविष्येते, भविष्यन्ते । भविष्यसे, भविष्येथे, भविष्यध्वे । भविष्ये, भविष्यावहे, भविष्यामहे । अभविष्यत, अभविष्येताम्, अभविष्यन्त, अभविष्यथाः, अभविष्येथाम्, अभविष्यध्वम् । अभविष्ये, अभविष्यावहि, अभविष्यामहि । अभविष्ट, अभविषाताम् ॥ **आतोऽन्तोऽदनतः॥** आतोऽन्तोऽद्भवत्यकारादुत्तरस्य न ॥ अभविषत । अभविष्ठाः, अभविषाथाम् ॥ **ध्वे सेर्लोपः॥** अभविढ्वम्, अभविध्वम् । अभविषि, अभविष्वहि, अभविष्महि ॥ चिती संज्ञाने ॥ **उपधाया लघोः॥** धातोरुपधाया लघोर्नामिनो गुणः ॥ चेतति ॥ **पूर्वस्य हसादिः शेषः॥** पूर्वस्यादिर्हसः शिष्यते अन्ये हसा लुप्यन्ते ॥ चिचेत । चिचेतिथ ॥ **सेः॥** सिशब्दात्परयोर्दिप्सिपोरीट् ॥ **इट ईटि॥** इटः परस्य सेर्लोपः ईटि ॥ अचेतीत्, अचेतिष्टाम् ॥ **स्याविदः॥** सरातो विदश्च परस्यान उस् भवति ॥ अचेतिषुः॥ च्युतिर् आसेचने ॥ च्योतति । च्योतेत् । च्योततु, च्योततात्द्वा । अच्योतत् । चुच्योत । च्युत्यात् । च्योतिता । च्योतिष्यति । अच्योतिषत् । **इरितो वा॥** इरितो धातोर्वा ङप्रत्ययो भवति पे ॥ सेरपवादः ॥ अच्युतत्, अच्योतीत् ॥ श्च्युतिर् क्षरणे॥श्च्योतति । श्च्योतेत्।श्च्योततु,श्च्योततात्द्वा॥ अश्च्योतत् ॥ **न शसात्खपाः॥** पूर्वस्मात्पराः खपाः शिष्यन्ते न शसाः॥ चुश्च्योत । श्च्युत्यात् । श्च्योतिता । श्च्योतिष्यति । अश्च्योति-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

ष्यत्। अश्च्युतत्, अश्च्योतीत्। यकाररहितोऽप्ययम्॥ श्चोतति। श्चोतेत्। श्चोततु। श्चोततात्। अश्चोतत्। चुश्चोत। श्चुत्यात्। श्चोतिता। श्चोतिष्यति। अश्चोतिष्यत्। अश्चुतत्। अश्चोतीत्॥ मन्थ विलोडने॥ मन्थति। मन्थेत्। मन्थतु, मन्थतात्। अमन्थत्। नो लोप इति नलोपे प्राप्ते ऋसंयोगाण्णादिरकित्। ममन्थ, ममन्थतुः॥ नो लोपः॥ धातोर्हसान्तस्योपधाभूतस्य नकारस्य लोपः क्ङिति परे॥ पूजार्थाञ्चतेर्न। निरुपपदात् क्रुञ्चेः क्विपि न। मथ्यात्। मन्थिता। मन्थिष्यति। अमन्थिष्यत्। अमन्थीत्॥ कुथि पुथि लुथि मथि हिंसासंक्लेशनयोः॥ इदितो नुम्॥ इदितो धातोर्नुम्॥ कुन्थति। कुन्थेत्। कुन्थतु, कुन्थतात्। अकुन्थत्। कुहोश्चुः॥ पूर्वस्य कवर्गहकारयोश्चुत्वं भवति हस्य वर्गचतुर्थः॥ चुकुन्थ॥ इदितो नलोपो न॥ कुन्थ्यात्। कुन्थिष्यति। अकुन्थिष्यत्। अकुन्थीत्॥ चुबि वक्त्रसंयोगे॥ चुम्बति॥ षिधु गत्याम्॥ आदेः ष्णः स्नः॥ धात्वाद्योः षकारणकारयोः सकारनकारौ भवतः॥ सेधति। सेधेत्। सेधतु सेधतात्। असेधत्। सिषेध। सिध्यात्। सेधिता॥ प्रादेश्च तथा तौ सुनमाम्॥ प्रादेः परेषां स्वादीनां नमादीनां च धातूनां सकारनकारयोः षकारणकारौ भवतः षत्वणत्वनिमित्ते सति। निषेधति॥ सेधतेर्गतौ न षः॥ गंगां विसेधति॥ अड्द्वित्वव्यवधानेऽपि षः॥ न्यषेधत्। निषिषेध॥ षिधू शास्त्रे माङ्गल्ये च॥ ऊदितो वा॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

ऊदितो धातोः परस्य वसादेरनपीड्वा ॥ स्वरतिसूतिसूयतिधूञूरधनश्-
तृप्दृप्द्रुहमुहस्नुहस्निहां च ॥ स्वरतिसूतिसूयतिधूञां किद्धसादेर्णादे-
र्नित्यमिट् स्यात् ॥ सेधति । सेधेत् । सेधतु, सेधताद्वा । असेधत् ।
सिषेध । सिषेधिथ ॥ तथोर्धः ॥ झभान्ताद्धातोस्तकारथकारयोर्ध-
कारो भवति दधातेर्न ॥ झभे जबाः ॥ सिषेद्ध । सेधिता,सेद्धा । सेधि-
ष्यति, सेत्स्यति, । असेधिष्यत्, असेत्स्यत् । असेधीत् ॥ अनिटो-
ऽनामिवतः ॥ अनिटोऽनामिवतश्च धातोर्वृद्धिः स्यात्पे परे सौ ॥
असैत्सीत् ॥ झसात् ॥ झसादुत्तरस्य सेर्लोपो झसे ॥ असैद्धाम् ।
असैत्सुः । असैत्स्व ॥ असैत्स्म ॥ खद स्थैर्ये हिंसायां च ॥ खदति ।
खदेत् । खदतु, खदताद्वा । अखदत् ॥ अत उपधायाः ॥ धातोरु-
पधाया अतो वृद्धिः ञ्णिति । चखाद ॥ णन्नुत्तमो वा णित् ॥
चखाद । चखद "पे सिर्णित्" ॥ अतो हसादेर्लघोर्वा वृद्धिः सेटि
सौ ॥ अखादीत्, अखदीत् ॥ गद व्यक्तायां वाचि ॥ प्रादिस्था-
न्निमित्तान्नेर्नस्य णो गदनदपदपतअपिहाधास्थामाङ्मेङ्स्य-
तिहन्तियातिवातिद्रातिप्सातिवपतिवहतिशाम्यतिचिनोतिदे-
ग्धिषु ॥ अन्यत्राकखादावषान्ते आद्योच्चारणे वा ॥ अकखादौ
किम् । प्रनिकरोति । प्रनिखादति । अषान्ते किम् । प्रनिदुःष्यति । वेति
किम् । प्रणिभवति । प्रनिभवति । आद्योच्चारणे किम् । प्रनिचखाद ।
प्राणिगदति । अगदीत् ॥ रद विलेखने ॥ रदति । रदेत् । रदतु ।
अरदत् । रराद ॥ लोपः पचां किरये चास्य ॥ पचादीनां किति

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

लिङ्घ्यनादेशादीनां पूर्वस्य लोपो भवत्यकारस्य एकहसमध्यस्थस्य चैकारः किति णादौ सेटि थपि च ॥ रेदतुः ॥ रेदिथ ॥ णद अव्यक्ते शब्दे ॥ प्रणिनेदुः । नेदिथ ॥ अर्द गतौ याचने च ॥ आभ्वोर्णादौ ॥ नुगशास् ॥ अश्नोतेर्ऋकारादेः संयोगान्ताकारादेश्च पूर्वस्य नुग्भवति णादौ ॥ आनर्द । आर्दीत् ॥ नर्द गर्द शब्दे ॥ तर्द हिंसायाम् । तर्दति ॥ कर्द कुत्सिते शब्दे । कर्दति । खर्द दंदशूके ॥ खर्दति । क्रदि चेष्टायाम् ॥ क्लिदि परिदेवने ॥ क्लिन्दन्ति ॥ अत सातत्यगमने ॥ आतिथ ॥ खाद भक्षणे ॥ अखादीत् ॥ क्रदि आह्वाने रोदने च ॥ अति अदि बन्धने ॥ अन्तति । अन्तेत् । अन्ततु । आन्तत् । आनन्त । आनन्द । अन्द्यात् । अन्दिता । अन्दिष्यति । आन्दिष्यत् । आन्दीत् ॥ टुनदि समृद्धौ ॥ ननन्द । चदि आह्लादने दीप्तौ च ॥ " इदितो नुम् " चन्दति ॥ चन्देत् । चन्दतु । अचन्दत् । चचन्द । चन्द्यात् । चन्दिता । चन्दिष्यति । अचन्दिष्यत् । अचन्दीत् ॥ शुन्ध शुद्धौ ॥ शुन्धति । शुन्धेत् । शुन्धतु । अशुन्धत् । शुशुन्ध । शुध्यात् । शुन्धिता । शुन्धिष्यति । अशुन्धिष्यत् । अशुन्धीत् ॥ तक्क कक्क हसने ॥ तकि कृच्छ्रजीवने ॥ तङ्कति । ततङ्क । अतङ्कीत् । शुक गतौ ॥ शोकति । अशोकीत् ॥ बुक्क भषणे ॥ बुक्कति ॥ कष हसने । कषति । युगि जुगि वर्जने ॥ युङ्गति ॥ इदि परमैश्वर्ये । इन्दति ॥ स्वरादेः ॥ स्वरादेर्धातोर्द्वितीयोऽडागमो भवति दिवादौ परे ॥ अ इ ए ॥ ए ऐ ऐ ॥ ऐन्दत् ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

कासादिप्रत्ययादामूक्रस्भूपरः ॥ कास् आस् दय अय गुरुनाम्याद्यनेकस्वरेभ्यो णबादौ परे आम् प्रत्ययो भवति । स च कृ अस् भूपरः प्रयोक्तव्यः । विददरिद्राजाग्रुषां वा ॥ रः ॥ पूर्वस्य ऋवर्णस्याकारः ॥ धातोर्नामिनः ॥ नाम्यन्तस्यादन्तस्य च धातोर्वृद्धिः ञ्णिति परे । इन्दांचकार, इन्दाचक्रतुः, इन्दांचक्रुः । इन्दांचकर्थ । इन्दामास, इन्दामासतुः, इन्दामासुः । इन्दांवभूव । इन्द्यात् । ऐन्दीत् । णिदि कुत्सायाम् ॥ "इदितो नुम्" ॥ प्रपूर्वः प्रणिन्दाति । प्रनिन्दति । प्रनिन्देत् । प्रनिन्दतु । प्रणिन्दतु । प्राणिन्दत् । निनिन्द । निन्द्यात् । निन्दिता । निन्दिष्यति । अनिन्दिष्यत् । अनिन्दीत् । दधि पालने ॥ ददन्ध ॥ उख गतौ ॥ " अप् कर्तरि " " उपधाया लघोर्गुणः " । ओखति । ओखेत् । ओखतु । औखत् ॥ असवर्णे स्वरे पूर्वस्येवर्णोवर्णयोरियुवौ ॥ उवोख, ऊखतुः, ऊखुः । उवोखिथ । औखीत् ॥ लुञ्च अपनयने ॥ अञ्चु गतिपूजनयोः ॥ अञ्चति । अञ्चेत् । अञ्चतु । आञ्चत् । आनञ्च । अच्यात् । पूजायाम् । अञ्च्यात् । अञ्चिता । अञ्चिष्यति । आञ्चिष्यत् । आञ्चीत् ॥ आछि आयामे ॥ आञ्छति । आञ्छेत् । आञ्छत् ॥ आञ्छेर्नुग्वा ॥ णादौ ॥ अनाञ्छ, आञ्छ ॥ हुर्छा कौटिल्ये ॥ स्वोर्वि हसे ॥ हूर्छति । हूर्छतु । अहूर्छत् । जुहूर्छ । हूर्छ्यात् । हूर्छिता । हूर्छिष्यति । अहूर्छिष्यत् ॥ युच्छ प्रमादे ॥ युच्छति ॥ वज गतौ ॥ शसददवादिगुणभूताकारणां नैत्वपूर्वलोपौ ॥ ववाज ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

ववजतुः। अवाजीत्। व्रज गतौ॥ व्रजति। व्रजेत्। व्रजतु। अव्रजत्। वव्राज। व्रज्यात्। व्रजिता। व्रजिष्यति। अव्रजिष्यत्॥ **वदिव्रज्योः सौ नित्यं वृद्धिः॥** अव्राजीत्॥ अज गतौ क्षेपणे च॥ अजति॥ अजेत्। अजतु। आजत्॥ **अजेरचतुर्षु वी वसादौ वा॥** विवाय॥ **नुधातोः॥** विकरणस्य नोर्धातोश्चेवर्णोवर्णयोरियुवौ स्वरे॥ अनेकस्वरस्यासंयोगपूर्वस्य तु य्वौ। उवर्णान्तेषु हुन्वोरेवापि॥ विव्यतुः॥ **स्वरान्तादत्वतश्च तादौ नित्यानिटः स्थपो वेट्॥** विवयिथ, विवेथ। आजिथ। विव्यथुः, विव्य। आजिव, आजिम। वीयात्॥ **नैकस्वरादनुदात्तात्॥** आद्योच्चारणेऽनुदात्तादेकस्वराद्धातोः परस्य गसादेरिण्न स्यात्॥

अनिट् स्वरान्तो भवतीति दृश्यता-
मिमांस्तु सेटः प्रवदन्ति तद्विदः।
अदन्तमृदन्तमृतां च वृङ्वृञौ
श्विडीङिवर्णेष्वथ शीङ्श्रिञावपि॥ १॥
गणस्थमूदन्तमुतां च रुस्नुवौ
क्षुवं तथोर्णोतिमथो युणुक्ष्णुवः।
इति स्वरान्ता निपुणैः समुच्चिता-
स्ततो हसान्तानपि सन्निबोधत॥ २॥
शकिस्तु कान्तेष्वनिडेक इष्यते
घसिश्च सान्तेषु वसिः प्रसारणी।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

राभिश्च भान्तेष्वथ मैथुने यभि-
स्ततस्तृतीयो लभिरेव नेतरे ॥ ३ ॥
यमिर्न्नमान्तेष्वनिडेक इष्यते
रमिर्दिवादावपि पठ्यते मनिः ।
नमिश्चतुर्थो हनिरेव पञ्चमो
गमिस्तु षष्ठः प्रतिषेधवाचिताम् ॥ ४ ॥
दिहिर्दुहिर्मेहतिरोहती वहि-
र्नहिस्तु षष्ठो दहतिस्तथा लिहिः ।
इमेऽनिटोऽष्टाविह मुक्तसंशया
गणेषु हान्ताः प्रविभज्य कीर्तिताः ॥ ५ ॥
दिशिं दृशिं दंशिमथो मृशिं स्पृशिं
रिशिं रुशिं क्रोशतिमष्टमं विशिम् ।
लिशिं च शान्ताननिटः पुराणगाः
पठन्ति पाठेषु दशैव नेतरान् ॥ ६ ॥
रुधिः सराधिर्युधिबन्धिसाधयः
क्रुधिक्षुधी शुध्यतिबुध्यती व्यधिः ।
इमे तु धान्ता दश चानिटो मता-
स्ततः परं सिध्यतिरेव नेतरे ॥ ७ ॥
शिषिं पिषिं शुष्यतिपुष्यती त्विषिं
विषिं श्लिषिं तुष्यतिदुष्यती द्विषिम् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

इमान् दशैवोपदिशन्त्यनिड्विधौ
गणेषु षान्तान् कृषकर्षती तथा ॥ ८ ॥
तपिं तिपिं चापिमथो वपिं स्वपिं
लिपिं लुपिं तृप्यतिदृप्यती सृपिम् ।
स्वरेण नीचेन शपिं क्षुपिं क्षिपिं
प्रतीहि पान्तान् गणितांस्त्रयोदश ॥ ९ ॥
अदिं हदिं स्कन्दिभिदिच्छिदिक्षुदीन्
शदिं सदिं स्विद्यतिपद्यती खिदिम् ॥
नुदिं तुदिं विद्यति विन्त इत्यपिं
प्रतीहि दान्तान् दश पञ्च चानिटः ॥ १० ॥
पचिं वचिं विचिरिचिरञ्जिपृच्छतीन्
निजिं सिचिं मुचिभजिभञ्जिभृज्जतीन् ।
त्यजिं यजिं युजिरुजिसञ्जिमज्जतीन्
भुजिं स्वजिं सृजिविजिविद्धचानिट्स्वरान् ॥ ११ ॥

वेता । अवैषीत् ॥ क्षि क्षये ॥ चिक्षयिथ—चिक्षेथ ॥ ये ॥ अनपि यकारे परे पूर्वस्वरस्य दीर्घः स्यात् ॥ क्षीयात् । अक्षैषीत् ॥ तुम्प हिंसायाम् ॥ प्रात्तुम्पतेः सुट् भवि कर्तरि ॥ प्रस्तुम्पति गौः । अड्द्वित्वव्यवधानेऽपि सुट् । प्रास्तुम्पत् । प्रतुस्तुम्प ॥ ओणृ अपनयने ॥ ओणांचकार ॥ वन षण संभक्तौ ॥ ववनतुः । अवनीत्-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

अवानीत् । सेनतुः ॥ जनसनखनामामात्त्वमनिटि से क्ङिति झसे यादौ क्ङिति वा ॥ सायात्—सन्यात् । असनीत्—असानीत् ॥ चमु अदने ॥ ष्ठिवुक्लम्वाचमां दीर्घोऽपि ॥ आचामति । आङ् किम् । चमति । विचमति । चेमतुः । अचमीत् ॥ ष्ठिवु निरसने ॥ नामधातुष्वष्कष्ठिवां सत्वं न ॥ ष्ठीवति ॥ ष्ठिवेः पूर्वस्य ठस्य थो वा ॥ तिष्ठेव—टिष्ठेव ॥ य्वोर्विहसे ॥ ष्ठीव्यात् । अष्ठवीत् ॥ कटे वर्षावरणयोः ॥ ह्म्यन्तक्षणश्वसजागृश्वेदितां सेटि सौ न वृद्धिः ॥ अकटीत् ॥ हय गतौ ॥ अहयीत् ॥ जु रंहसि ॥ नानप्योर्वः ॥ अनपि विषये उवर्णस्य वत्वं न ॥ जुजुवतुः । जुजुविथ-जुजोथ । अजौषीत् ॥ गुपू रक्षणे ॥ आयः ॥ गुपूधूपविच्छिपणिपनिभ्यः स्वार्थे आयः प्रत्ययः । अनपि तु वा ॥ स धातुः ॥ यङादिप्रत्ययान्तः शब्दो धातुसंज्ञको भवति ॥ गोपायति । गोपायांचकार । जुगोप ॥ यतः ॥ यस्यातश्चानपि लोपः ॥ गोपाय्यात्-गुप्यात् । गोपायिता—गोपिता—गोप्ता । अगोपायीत्—अगोपीत्—अगौप्सीत् ॥ "झसात्" ॥ अगौप्ताम् ॥ एवं धूप संतापे ॥ तप संतापे । तेपिथ—ततप्थ । अताप्सीत् ॥ जप जल्प व्यक्तायां वाचि ॥ जेपिथ । जपिता । अजापीत् ॥ क्रमु पादविक्षेपे ॥ भ्राशभ्लाशभ्रमुक्रमुक्लमु-त्रसित्रुटिलषां यो वा कर्त्रर्थेषु चतुर्षु ॥ क्रमः पे दीर्घोऽब्विषये ॥ क्राम्यति—क्रामति । अक्रमीत् ॥ यम उपरमे ॥ गमां छः ॥ गमयमेष्णूणां छः स्यादब्विषये ॥ यच्छति । येमिथ—ययन्थ ॥ यमिरमिनमातां सक्से-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

रिट् पे ॥ अयंसीत्, अयंसिष्टाम् ॥ णम प्रह्वत्वे शब्दे च ॥ नेमिथ–ननन्थ । अनंसीत् ॥ ईर्क्ष्य ईर्ष्य ईर्ष्यायाम् ॥ ईर्क्ष्यति । ऐर्क्ष्यीत् । ऐर्ष्यीत् ॥ गम्लृ गतौ ॥ गच्छति ॥ गमां स्वरे ॥ गम्हन्जन्खन्–घसामुपधाया लोपः स्यात्स्वरे क्ङिति न तु ङे ॥ जग्मतुः । जगमिथ-जगन्थ ॥ हन्नृतः स्यपः ॥ हन्तेः ऋदन्ताच्च परस्य स्यप इड् भवति गमेस्तु पे ॥ गमिष्यति ॥ लित्पुषादेर्ङः ॥ लितो धातोः पुषादेश्च ङः प्रत्ययः स्यात् पे ॥ सेरपवादः ॥ अगमत् ॥ म्रुचु म्लुचु गतौ ॥ म्रोचति ॥ म्रुचादेर्वा ङः ॥ अम्रुचत्–अम्रोचीत् । अम्लुचत्–अम्लोचीत् ॥ ग्रुचु ग्लुचु चौर्ये ॥ अग्रुचत्–अग्रोचीत् । अग्लुचत्–अग्लोचीत् ॥ ग्लुञ्चु गतौ ॥ अग्लुचत्–अग्लुञ्चीत् ॥ ञिफला विशरणे ॥ तॄफलभजत्रपाम् ॥ क्ङिति णादौ सेटि थपि चैत्वपूर्वलोपौ ॥ फेलतुः । फेलिथ ॥ लान्तस्य ॥ लरसमीपाकारस्य सौ नित्यं वृद्धिः॥ अफालीत् ॥ फल निष्पत्तौ ॥ फेलतुः । अफालीत् ॥ चर गति-भक्षणयोः ॥ अचारीत् ॥ स्वृ शब्दोपतापयोः ॥ स्वरति । सस्वार ॥ गुणोऽर्तिसंयोगाद्योः ॥ सस्वरिथ-सस्वर्थ । सस्वार । स्वर्यात् । स्वरिष्यति । अस्वारीत् । अस्वारिष्टाम् । अस्वार्षीत् । अस्वार्ष्टाम् । अस्वार्षुः ॥ जि जये ॥ सपरोक्षयोर्जेर्गिः ॥ जिगाय, जिग्यतुः, जिग्युः । जिगयिथ–जिगेथ । जीयात् । अजैषीत् । कृष विलेखने ॥ कर्षति । चकर्ष । चकर्षिथ । रारो झसे दृशाम् ॥ दृशसृजकृशमृशस्पृशतृपदृपसृपां झसेऽरो रो भवत्यारो रश्च ॥ कृशा-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

दीनां वा ॥ क्रष्टा–कर्ष्टा ॥ "षढोः कः से" ॥ क्रक्ष्यति–कर्क्ष्यति । अक्राक्षीत्–अकार्क्षीत् ॥ कृषमृषस्पृशमृशतृपदृपां वाऽसिः ॥ हशषान्तात्सक् ॥ हान्तात् शान्तात्षान्तान्नाम्युपधादनिटः सक् प्रत्ययः स्याद्दिवादिपरो न तु दृशः ॥ सेरपवादः ॥ अकृक्षत् ॥ सृप्लृ गतौ ॥ सर्पति । स्रप्ता–सर्प्ता । असृपत् ॥ क्रुश आह्वाने रोदने च ॥ क्रोशति । क्रोष्टा । अक्रुक्षत् ॥ रुष रिष शिष हिंसायाम् ॥ इषुसहलुभरिषरुषामनापि तस्येड्वा ॥ रोषिता–रोष्टा । रेषिता–रेष्टा । अरिक्षत् ॥ उष गतौ ॥ ओषति । ओषांचकार । उवोष ॥ मिह सेचने ॥ ढि ढो लोपो दीर्घश्च ॥ ढे परे ढस्य लोपः स्याच्चानृतो दीर्घः ॥ मेढा ॥ षढोः कः से ॥ धातोः षढयोः कत्वं स्यात्से परे । अमिक्षत् ॥ दह भस्मीकरणे ॥ देहिथ-ददग्ध । धक्ष्यति । अधाक्षीत् ॥ "झसात्" ॥ अदाग्धाम् ॥ इवि व्याप्तौ ॥ इन्वति । इन्वांचकार । ऐन्वीत् ॥ हिवि दिवि धिवि जिवि प्रीणने ॥ हिन्वति ॥ धिन्विकृण्व्योर्वस्य लोपो गुणाभाव उप्रत्ययश्चाब्विषये ॥ विकरणस्य नुप्रत्ययस्योप्प्रत्ययस्य च गुणो भवति पिति परे ॥ धुनोति ॥ ओऽमोर्वा लोपः ॥ असंयोगपूर्वस्य प्रत्ययोकारस्य लोपो वा वमयोः ॥ धिन्वः–धिनुवः । धिन्मः–धिनुमः । मिपि तु गुणो बाधकः । धिनोमि ॥ ओर्वा हेः ॥ असंयोगपूर्वात्प्रत्ययोकाराद्धेर्लोपो भवति ॥ धिनु–धिनुतात् ॥ कृवि हिंसाकरणगतिषु ॥ कृणोति, कृण्वन्ति । चकृण्व ॥ अक्षू व्याप्तौ ॥ अक्षो

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

र्वा नुप्रत्ययोऽविषये ॥ अक्ष्णोति, अक्ष्णुवन्ति । अक्षति । आनक्षिथ—आनष्ठ । अक्षिता—अष्टा । अक्षिष्यति—अक्ष्यति । आक्षत्, आक्षिष्टाम् । आक्षीत्, आष्टाम्, आक्षुः ॥ तक्षू त्वक्षू तनूकरणे ॥ (तक्षेस्तनूकरणे नुर्वाऽविषये) तक्ष्णोति, तक्षति वा काष्ठम् । ततक्षिथ, ततष्ठ । अतक्षीत्, अताक्षिष्टाम्, अताक्षीत्, अताष्टाम् । । तनूकरणे किम् । वाग्भिः संतक्षति । भर्त्सयतीत्यर्थः ॥ णिक्ष चुम्बने ॥ प्रणिक्षति । निक्षति ॥ ग्लै म्लै हर्षक्षये ॥ सन्ध्यक्षराणामा ॥ अनपि आतो णव् डौ ॥ आदन्ताद्धातोः परो णव् डौ ॥ जग्लौ ॥ आतोऽनापि ॥ धातोरातो लोपोऽनपि क्ङिति स्वरे इटि च ॥ जग्लतुः । जग्लिथ—जग्लाथ ॥ संयोगादेरादन्तस्य क्ङिति लिङ्च्येकारो वा ॥ ग्लायात्—ग्लेयात् । अग्लासीत् ॥ कै गै रै शब्दे ॥ जगौ ॥ दादेरे ॥ अपिद्दाधामागैहाक्पिबतिसोस्थामात एकारो भवत्याशीर्यादादौ पे ॥ गेयात् । अगासीत् । स्त्यै ष्ट्यै शब्दसङ्घातयोः ॥ स्त्यायति । तस्त्यौ । स्त्यायात्—स्त्येयात् । अस्त्यासीत् ॥ दैप् शोधने ॥ ददौ । दायात् । अदासीत् ॥ धेट् पाने ॥ दधौ । धेयात् । अधासीत् । सिलोपपक्षे । अधात्, अधाताम् ॥ उस्यालोपः ॥ अधुः । धेटो भूतमात्रे दिवादिपरो ङो वा द्वित्वं च ॥ " आतोऽनापि " अदधत् ॥ दृशिर् प्रेक्षणे ॥ दृशादेः पश्यादिः ॥ चतुर्ष्वपि दृशऋसृशदसदप्राघ्राध्माम्नादाण्स्थां पश्य-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

ऋच्छधौशीयसीदपिबजिघ्रधममनयच्छतिष्ठाः । पश्यति । 'ददर्श' ददृशतुः ॥ सृजिदृशोस्थपो वेट् ॥ ददर्शिथ-दद्रष्ठ । द्रष्टा । अद्राक्षीत्, अद्राष्टाम् ॥ ऋवर्णदृशोर्ङे गुणः ॥ अदर्शत् । ऋ गतौ ॥ ऋच्छति । आर्च्छत् ॥ गुणोऽर्तिसंयोगाद्योः ॥ अर्तेः संयोगादेर्ऋदन्तस्य च गुणो यकि याङि किति णादावाशीर्यादादौ च ॥ आरतुः । आरुः ॥ अत्त्यर्तिव्ययतीनां थपो नित्यमिट् ॥ आरिथ । अर्यात् । अर्ता । अरिष्यति । आरिष्यत् । सर्तिशास्त्यर्तिभ्यो ङो लुङि ॥ सेरपवादः ॥ " स्वरादेः " । आरत्, आरताम् । अर्तेर्ह्रादेरिति केचित् । आर्षीत् । आर्ष्टाम् ॥ सृ गतौ । धावति । अधावत् । शीघ्रगताववायम् । अन्यत्र सरति । ससार । सस्रतुः । ससर्थ । ससृव, ससृम ॥ यादादौ पे ॥ यादादौ धातोः ऋतो रिङ् भवति ॥ ङो व्यवधानार्थः । तेन ' ये ' इति न दीर्घः । स्रियात् । सर्ता । सरिष्यति । असरत्, असरताम् ॥ स्रु गतौ । स्रवति । अस्रवत् । सुस्राव । सुस्रुवतुः । सुस्रोथ । स्रुयात् । स्रोता ॥ श्रिस्रुद्रुभ्यो ङो धातोश्च द्वित्वं लुङि ॥ सेरपवादः ॥ असुस्रुवत् ॥ दु द्रु गतौ ॥ दुदविथ-दुदोथ । दोता । अदौषीत् ॥ द्रवति । दुद्रोथ । दुद्रुवुः । अदुद्रुवत् ॥ श्रु श्रवणे ॥ श्रुवः शृआदेशो नुप्रत्ययश्चाब्विषये ॥ " नूपः " ॥ शृणोति । शृणोमि ॥ " ओर्म्वोर्वा लोपः " ॥ शृणुवः-शृण्वः । शृणुमः-शृण्मः । शृणुयात् । शुश्राव । श्रूयात् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

अश्रौषीत् ॥ शद्लृ शातने ॥ **शीयादेशो आत्** ॥ शीयते । अशीयत । शशाद । शेदिथ—शशत्थ । शत्ता । अशदत् ॥ षद्लृ विशरणगत्यवसादनेषु ॥ सीदति ॥ **सदिस्वञ्जोर्लिटि परस्य न षः** ॥ निषसाद । सत्ता । सत्स्यति । असदत् ॥ पा पाने ॥ पिबति । पपौ । पेयात् । पाता । पास्यति ॥ " दादेः पे " अपात् ॥ घ्रा गंधोपादाने ॥ जिघ्रति । जघ्रौ । घ्रेयात्—घ्रायात् । घ्रास्यति । अघ्रासीत्, अघ्रात् ॥ ध्मा शब्दाग्निसंयोगयोः ॥ धमति । दध्मौ । ध्मेयात् । ध्मायात् । अध्मासीत् ॥ ष्ठा गतिनिवृत्तौ ॥ तिष्ठति ॥ तस्थौ ॥ " दादेरे " स्थेयात् ॥ म्ना अभ्यासे । मनाति । मम्नौ । म्नायात्-म्नेयात् ॥ अम्नासीत् । दाण् दाने ॥ यच्छति ॥ ददौ । देयात् । अदात् ॥ ह्वृ कौटिल्ये । ह्वरति । जह्वार ॥ "गुणोऽर्तिसंयोगाद्योः" जह्वरतुः ॥ ऋदन्तात्थपो नेट् ॥ जह्वर्थ । ह्वर्यात् । ह्वर्ता । ह्वरिष्यति । अह्वरिष्यत् । अह्वार्षीत् ॥ स्वृ शब्दोपतापयोः ॥ स्वरति । सस्वरिथ, सस्वर्थ । सस्वरिव । स्वरिता, स्वर्ता । स्वरिष्यति । अस्वरिष्यत् । अस्वारीत्—अस्वार्षीत्, अस्वार्ष्टाम्, अस्वार्षुः ॥ बुध अवगमने ॥ बोधति । बोधिता । रुह बीजजन्मनि प्रादुर्भावे च ॥ रोढा । रोक्ष्यति । अरुक्षत् ॥ स्कन्दिर् गतिशोषणयोः स्कन्दति । चस्कन्दिथ, चस्कन्त्थ । स्कंद्यात् । स्कन्त्ता । स्कन्त्स्यति ॥ अस्कान्त्सीत्—अस्कदत् ॥ यभ मैथुने ॥ यभति । ययाभ, येभतुः । येभिथ—ययब्ध । यभ्यात् । यब्धा । अयाप्सीत्, अयाब्धाम्, अयाप्सुः ॥ तॄ प्लवनतरण-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

थोः ॥ तरति । ततार, तेरतुः तेरिथ । ऋत इर् ॥ ॠकारस्य इर् भवत्यगुणवृद्धिविषये ॥ तीर्यात् ॥ ईटो ग्रहाम् ॥ ग्रहादीनामिट ईकारो न तु णादौ ॥ वृङ्वृञ्ॠदन्तानां वा ॥ तारिता–तरीता ॥ पे सेरिटो न दीर्घः सीष्टादेश्च ॥ अतारीत्, अतारिष्टाम्, अतारिषुः ॥ दंश दशने ॥ अपि रञ्जदंशसञ्जस्वञ्जाम् ॥ एषां नस्य लोपोऽपि ॥ दशति । दंष्टा । अदाङ्क्षीत् ॥ षञ्ज सङ्गे ॥ ससञ्जिथ, ससङ्क्थ । न्यषाङ्क्षीत् ॥ कित रोगापनयने संशये च ॥ गुब्भ्यः ॥ गुप्तिज्कित्मान्बध्दान्शान्भ्यः स्वार्थे सप्रत्ययो भवति धातोश्च द्वित्वम् ॥ चिकित्सति । चिकित्सांचकार । चिकित्सिता । अचिकित्सीत् । पत्लृ पतने ॥ पपात, पेततुः । पतेर्ङेंपुम् ॥ अपप्तम् ॥ भ्रमु चलने ॥ यो वा ॥ भ्राम्यति भ्रमति ॥ फणूराजृभ्राजृभ्राशृभ्लाशृस्यमुस्वन्जॄष्भ्रमुत्रसाम् ॥ एत्वपूर्वलोपौ वा । भ्रेमतुः–बभ्रमतुः । अभ्रमीत् ॥ टुवम उद्गिरणे ॥ "वम एत्वपूर्वलोपौ वेति केचित्" ॥ वेमतुः ववमतुः । अवमीत् ॥ फण गतौ ॥ फेणतुः–पफणतुः । अफाणीत्–अफणीत् ॥ स्वन स्यमु शब्दे ॥ स्वेनतुः–सस्वनतुः । अस्वानीत्–अस्वनीत् । स्येमतुः–सस्यमतुः । अस्यमीत् ॥ शसु हिंसायाम् ॥ शसतुः । शशसिथ ॥ तुहिर् दुहिर् उहिर् अर्दने ॥ अतुहत्–अतोहीत् । दोहिता । अदुहत्–अदोहीत् । उवोह, ऊहतुः ॥ वस निवासे । णबादौ पूर्वस्य ॥ यजादीनां ग्रहादीनां च पूर्वस्य संप्रसारणं णबादौ ॥ यवराणामिदुद्दृतः ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

सस्वरस्य संप्रसारणम् । दीर्घस्य दीर्घो ह्रस्वस्य ह्रस्वः ॥ उवास ॥ यजां यवराणां ख्वृतः संप्रसारणं किति ॥ यजादीनां संप्रसारणं किति ॥

यजिर्वपिर्वहिश्चैव वेञ्व्येञौ ह्वयतिस्वपी ।
वदिवसी श्वयतिर्वक्तिरेकादश यजादयः ॥

घसादेः षः ॥ घसिशासिवसीनां सस्य षो निमित्ते सति ॥ ऊषतुः । उवसिथ–उवस्थ । उष्यात् । वस्ता ॥ सस्तोऽनापि ॥ सस्य तोऽनापि से ॥ वत्स्यति । अवात्सीत्,अवात्ताम् ॥ वद व्यक्तायां वाचि । वदति । उवदिथ । उद्यात् । "वदिव्रज्योः सौ नित्यं वृद्धिः" अवादीत् । टुओश्विइर् गतिवृद्ध्योः । श्वयतेर्णादौ संप्रसारणं वा ॥ ततो द्वित्वम् । शुशाव, शुशुवतुः । शुशविथ । शिश्वाय, शिश्वियतुः । शिश्वयिथ । शूयात् । श्वयिता । अश्वयीत् । श्वयतेरितो लोपो ङे ॥ अश्वत् ॥ श्वयतेर्ङे द्वित्वं वा एरलोपः ॥ अशिश्वियत् ॥ घस्ऌ अदने ॥ घसति । घसेत् । जघास, जक्षतुः । जघसिथ–जघस्थ । घस्ता । घत्स्यति । अघत्स्यत् । इति पंप्रक्रिया ।

एध वृद्धौ ॥ एधते । एधांचक्रे ॥ आमो भ्वसोर्नात्कर्तरि ॥ एधामास । एधाम्बभूव । ऐधिष्ट ॥ ईक्ष दर्शनाङ्कनयोः । ईक्षाञ्चक्रे ॥ ऐक्षिष्ट । ष्वष्क गतौ ॥ ष्वष्कते । ष्वष्किषीष्ट । अष्वष्किष्ट ॥ वेष्ट वेष्टने ॥ विवेष्टे ॥ चेष्ट चेष्टायाम् ॥ चिचेष्टे । अचेष्टिष्ट ॥ ऋज गतौ स्थैर्ये च ॥ अर्जते । आनृजे ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

आर्जिष्ट ॥ ष्वञ्ज परिष्वङ्गे ॥ स्वजते । **स्वजतेर्णादेर्वा क्त्वित्त्वम्** ॥ सदिस्वञ्जोर्लिटि परस्य न षः । परिषस्वञ्जे-परिषस्वजे । स्वङ्क्षीष्ट । स्वङ्क्ता । स्वङ्क्ष्यते । अस्वङ्क्त, अस्वङ्क्षाताम् । पर्यष्वङ्क्त-पर्यस्वङ्क्त ॥ त्रपूष् लज्जायाम् ॥ त्रपते । त्रेपे ॥"ऊदितो वा" त्रपिषीष्ट-त्रप्सीष्ट । अत्रपिष्ट-अत्रप्त ॥ तिपृ तेपृ ष्टिपृ ष्टेपृ क्षरणे । तेपते । तितिपे । तिप्सीष्ट । अतिप्त । तेपृ । तेपते । तितेपे । तेपिषीष्ट । अतेपिष्ट ॥ ष्टिपृ । स्तेपते । तिष्टिपे । स्तेपिष्ट ॥ जभी जृभि गात्रविनामे ॥ "रधिजभोः स्वरे नुम्" जम्भते । अजम्भिष्ट ॥ जृम्भते । जजृम्भे ॥ ष्टुभ स्तम्भे ॥ विष्टोभते । तुष्टुभे । स्तोभिता । स्तोभिषीष्ट ॥ क्षमूष् सहने ॥ क्षमते । चक्षमे । चक्षमिषे । चक्षंसे ॥ **मो नो धातोः** ॥ मान्तस्य धातोर्मकारस्य नः स्यात् झसे पदान्ते वमयोः परयोः । चक्षमिवहे । चक्षमिमहे । चक्षण्वहे । चक्षण्महे । अक्षमिष्ट-अक्षंस्त । क्नूयी शब्दे उन्दे च । क्नूयते । अक्नूयिष्ट ॥ क्ष्मायी विधूनने ॥ क्ष्मायते । चक्ष्माये । अक्ष्मायिष्ट ॥ स्फायी ओप्यायी वृद्धौ ॥ स्फायते । पस्फाये । अस्फायिष्ट ॥ प्यायते ॥ **लिड्यङोः प्यायः पी** ॥ पिप्ये ॥ **दीपजनबुधपूरितायिप्यायिभ्यो वा इण् तनि कर्तरि** ॥ सेरपवादः ॥ **लुक्** ॥ इणः परस्य तनो लुक् ॥ अप्यायि-अप्यायिष्ट ॥ तायृ संतानपालनयोः । तताये । अतायिष्ट ॥ वल वल्ल संवरणे ॥ वलते । वल्लते । टुभ्राजृ टुभ्राशृ टुभ्लाशृ दीप्तौ ॥ भ्रेजे-बभ्राजे । भ्राश्यते-भ्राशते । भ्रेशे-बभ्राशे । भ्लाश्यते-भ्लाशते । भ्लेशे ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

वम्लाशे ॥ तिज निशाने क्षमायां च ॥ " गुभ्यः " ॥ तितिक्षते । तितिक्षांचक्रे ॥ गुप् गोपनकुत्सनयोः ॥ जुगुप्सते ॥ मान विचारणे ॥ थः से ॥ पूर्वस्यात इत्से ॥ मानादीनां पूर्वस्येतो दीर्घः ॥ मीमांसते ॥ वध निन्दायाम् ॥ "आदिजबानाम्" इति भः । बीभत्सते ॥ पण व्यवहारे स्तुतौ च । पन च ॥ पणायति । स्तुतावेवायम् । पणते । पणायांचक्रे । पेणे ॥ एवं पन् ॥ कमु कान्तौ ॥ कमेः स्वार्थे ञिङनपि तु वा ॥ कामयते । कामयांचक्रे—चकमे ॥ ञेरङ् द्विश्च । ञ्यन्ताद्धातोः कर्तरि अङ् लुङि ॥ सेरपवादः । धातोश्च द्वित्वम् ॥ ञेः ॥ अनपि ञेर्लोपो न त्विडामन्ताल्वाय्येत्न्विष्णुषु ॥ अङि लघौ ह्रस्व उपाधायाः ॥ अङि सत्युपधाया ह्रस्वो भवति पूर्वस्यातो लघुनि धात्वक्षरे इकारः ॥ लघोर्दीर्घः ॥ अङि सति पूर्वस्य लघोर्दीर्घो भवति लघुनि धात्वक्षरे परे ॥ अचीकमत । ञेरभावे ॥ कमेरङ्द्वित्वे ॥ अचकमत ॥ अय गतौ ॥ अयते ॥ अयतौ ॥ प्रादे रेफस्य लत्वम् ॥ प्लायते । अयांचक्रे । आयिष्ट ॥ दय दानगतिरक्षणहिंसादानेषु ॥ दयते । दयांचक्रे ॥ घट चेष्टायाम् ॥ घटते । जघटे । अघटिष्ट ॥ ईह चेष्टायाम् ॥ ईहांचक्रे ॥ ऊह वितर्के ॥ ऊहांचक्रे ॥ कासृ शब्दकुत्सायाम् ॥ कासांचक्रे ॥ षेवृ सेवने ॥ सिषेवे । असेविष्ट ॥ प्रुङ् प्लुङ् च्युङ् गतौ ॥ अप्रोष्ट । अप्लोष्ट । अच्योष्ट ॥ गाङ् गतौ ॥ गाते । अन्तरङ्गत्वात् " सवर्णे दीर्घः सह " । गाते, गाते । गै ॥ गावहे, गामहे । जगे । अगास्त ॥ रुङ् गतौ भाषणे च ॥ रवते ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

रुरुवे । अरविष्ट । अनिडयमित्येके ॥ मूङ् बन्धने ॥ मविता । अमविष्ट ॥ पूङ् पवने ॥ अपविष्ट ॥ देङ् त्रैङ् पालने । दयते ॥ देङो णादौ दिग्यादेशो द्वित्वाभावश्च ॥ दिग्ये । दासीष्ट ॥ अपिद्दाधास्थामित्सेर्ङित्त्वमाति न तु दीङः ॥ लोपो ह्रस्वाज्झसे । ह्रस्वात्परस्य सेर्लोपो झसे ॥ अदित, अदिषाताम् ॥ त्रायते । तत्रे । अत्रास्त । स्मिङ् ईषद्धसने । स्मयते । सिष्मिये । स्मेषीष्ट । स्मेता । अस्मेष्ट ॥ डीङ् विहायसा गतौ ॥ डयते । डिड्ये । अडयिष्ट ॥ द्युत दीप्तौ ॥ द्योतते ॥ द्युतेः पूर्वस्य संप्रसारणम् ॥ दिद्युते ॥ द्युतादिभ्यो लुङि वा पम् पे ङः ॥ अद्युतत् ॥ अद्योतिष्ट ॥ श्विता वर्णे ॥ अश्वितत् । अश्वेतिष्ट ॥ ञिष्विदा स्नेहनमोचनयोः । अस्विदत् ॥ अस्वेदिष्ट ॥ ञिक्ष्विदा च ॥ अक्ष्विदत् । अक्ष्वेदिष्ट ॥ ञिमिदा स्नेहने ॥ अमिदत्—अमेदिष्ट ॥ रुच दीप्तावभिप्रीतौ च ॥ अरुचत् । अरोचिष्ट ॥ घुट परिवर्तने ॥ अघुटत् । अघोटिष्ट ॥ रुट लुट लुठ प्रतिघाते ॥ अरुटत् । अरोटिष्ट । अलुटत् । अलोटिष्ट ॥ अलुठत् । अलोठिष्ट ॥ शुभ दीप्तौ ॥ अशुभत् । अशोभिष्ट ॥ क्षुभ संचलने ॥ अक्षुभत् । अक्षोभिष्ट ॥ णभ तुभ हिंसायाम् ॥ नेभे । अनभत् । अनभिष्ट ॥ स्रंसु ध्वंसु भ्रंसु अवस्रंसने ॥ अस्रसत् । अस्रंसिष्ट ॥ ध्वंसु गतौ च । अध्वसत् । अध्वंसिष्ट ॥ स्रम्भु विश्वासे ॥ अस्रभत् । अस्रम्भिष्ट ॥ वृतु वर्तने ॥ वर्तते ॥ वृतादिभ्यः स्यसयोर्वा पं पेऽनिट्त्वं च ॥ वर्त्स्यति । वर्तिष्यते । अवृतत् । अवर्तिष्ट ॥ वृधु

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

वृद्धौ ॥ वर्त्स्यति । वर्धिष्यते अवर्त्स्यत् । अवर्धिष्यत । अवृधत् । अवर्धिष्ट ॥ शृधु शब्दकुत्सायाम् ॥ शर्धते ॥ स्यन्दू प्रस्रवणे ॥ स्यन्दते । स्यन्त्स्यति । स्यन्दिष्यते–स्यन्त्स्यते । अस्यदत् । अस्यन्दिष्ट,अस्यन्त । कृपू सामर्थ्ये ॥ **कृपो रो लः** ॥ कृपो रेफस्य लः ऋकारस्य लृकारः ॥ कल्पते । चक्लृपे । कल्पिषीष्ट ॥ **सिस्योः** ॥ उपधाया गुणो न सिस्योरनिटोः परतः ॥ क्लृप्सीष्ट ॥ **कृपेस्तादौ पं वा पेऽनिट्त्वं च** ॥ कल्प्ता । आति–कल्पिता–कल्प्ता– । कल्प्स्यति । कल्पिष्यते–कल्प्स्यते । अक्लृपत् । अकल्पिष्ट–अक्लृप्त । एते द्युतादयो वृतादयश्च ॥ व्यथ दुःखसञ्चलनयोः ॥ व्यथते ॥ **व्यथेर्णादौ पूर्वस्य यस्य इः** ॥ विव्यथे । अव्यथिष्ट ॥ ज्युङ् गतौ ॥ ज्यवते । जुज्युवे । अज्योष्ट । रमु क्रीडायाम् ॥ रमते ॥ **व्याङ्पर्युपेभ्यो रमः पम्** ॥ विरमति । आरमति । परिरमति । उपरमति । रेमे । अरंसीत् । अरंस्त ॥ लोकृ दर्शने ॥ लुलोके ॥ श्लोकृ संघाते ॥ अश्लोकिष्ट ॥ शकि शङ्कायाम् ॥ शशङ्के । अशङ्किष्ट ॥ अकि लक्षणे ॥ आनङ्के ॥ ढौकृ त्रौकृ रधि गतौ ॥ डुढौके । तुत्रौके । अत्रौकिष्ट ॥ लघि भोजननिवृत्तौ ॥ ललङ्घे । अलङ्घिष्ट ॥ बाधृ विलोडने ॥ बाधते । बबाधे । अबाधिष्ट । नाथृ नाधृ याच्ञोपतापैश्वर्याशीःषु ॥ नाथ आशिष्येव आत्मनेपदम् ॥ नाथते । अन्यत्र । नाथति । नाथते । ननाथे । अनाथिष्ट ॥ दध धारणे ॥ देधे । अदधिष्ट ॥ स्कुदि आप्लवने । चुस्कुन्दे । अस्कुन्दिष्ट ॥ वदि अभिवादनस्तुत्योः ॥ वन्दते । ववन्दे ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

अवन्दिष्ट ॥ भदि कल्याणे सुखे च ॥ बभन्दे ॥ मदि स्तुतिमोदमद-स्वप्नकान्तिगतिषु ॥ मन्दते। ममन्दे । अमन्दिष्ट ॥ स्पदि किंचिच्चलने ॥ पस्पन्दे ॥ मुद हर्षे ॥ मुमुदे ॥ दद दाने ॥ ददे ॥ यती प्रयत्ने ॥ येते ॥ ञित्वरा संभ्रमे ॥ त्वरते ॥ तत्वरे । अत्वरिष्ट ॥ षह मर्षणे ॥ सहते । सेहे । सहिता ॥ "इषुसहलुभरुषारिषामनपि तस्येड्वा" ॥ सहिवहोरोदवर्णस्य ॥ ढलोपे सति ॥ असोढ । असहिष्ट । गाहू विलोडने ॥ गाहते । जगाहिषे—जघाक्षे । जगाहिढ्वे—जगाहिध्वे—जघाढ्वे । गाहिषीष्ट—घाक्षीष्ट । गाहिता—गाढा । गाहिष्यते—घाक्ष्यते । अगाहिष्ट—अगाढ । अघाक्षाताम् । अघाढ्वम् ॥ गृहू ग्रहणे ॥ जगृहिषे-जघृक्षे । जगृहिषे—जगृहिध्वे—जघृढ्वे । गर्हिषीष्ट—घृक्षीष्ट । गर्हिता—गर्ढा । गर्हिष्यते—घर्क्ष्यते । अगर्हिष्ट—अघृक्षत ॥ आति सको लोपः स्वरे ॥ अघृक्षाताम्, अघृक्षन्त । अघृक्षध्वम् । इत्यात्मक्रिया ॥

राजृ दीप्तौ ॥ रेजतुः—रराजतुः ॥ रेजे—रराजे । अराजीत्, अराजिष्टाम् । अराजिष्ट ॥ खनु खनने ॥ चखान, चख्नतुः, चख्नुः । खायात्—खन्यात् । अखानीत्—अखनीत् । अखानिष्ट ॥ हृञ् हरणे ॥ जहार । "ऋदन्तात्थपो नेट्" जहर्थ । जह्रे । ह्रियात् ॥ उः ॥ ऋवर्णस्य सिस्योरनिटो न गुणः ॥ ह्रषीष्ट । अहार्षीत् । अहृत ॥ दान आर्जवे ॥ गुब्भ्यः ॥ दीदांसति । दीदासांचकार ॥ शान-तेजने ॥ शीशासाञ्चके ॥ गुहू संवरणे ॥ गुहेरुपधाया ऊद् गुणहेतौ स्वरे ॥ जुगूह । जुगूहिथ—जुगोढ । जुगुहिषे—जुघुक्षे । जुगु-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

हिध्वे–जुगुहिढ्वे । जुघूढ्वे । गूहिषीष्ट–घुक्षीष्ट । गूहिता–गोढा । गूहिष्यति–घोक्ष्यति ॥ **दुहदिहलिहगुहूभ्यः सको लुग्वा वकारतवर्गयोरादि** ॥ अगूढ–अघुक्षत, अघुक्षाताम्, अघुक्षन्त । अगूढाः–अघुक्षथाः, अघुक्षाथाम्, अघूढ्वम् । अघुक्षध्वम् । अघुक्षावहि–अगुह्वहि, अघुक्षामहि । अगूहिष्ट । अघुक्षत्–अगूहीत् ॥ भज सेवायाम् ॥ भेजिथ–बभक्थ । भेजे ॥ भक्षीष्ट । अभाक्षीत् ॥ अभक्त ॥ श्रिञ् सेवायाम् ॥ शिश्रियतुः । शिश्रिये । श्रीयात् । श्रयिषीष्ट । श्रयिता । अशिश्रियत् । अशिश्रियत ॥ त्विष दीप्तौ ॥ तित्विषे । त्विक्षीष्ट । त्वेष्टा । त्वेक्ष्यते । अत्विक्षत् ॥ स्पश बाधनस्पर्शनयोः ॥ पस्पाश । पस्पशे । अस्पशत्–अस्पाशीत् । अस्पशिष्ट ॥ लष कान्तौ ॥ लष्यति–लषति । लष्यते–लषते । लषिता ॥ रञ्ज रागे । रजति । ररञ्जिथ–ररङ्थ । ररञ्जे । रज्यात् । रङ्क्षीष्ट । अराङ्क्षीत् । अरङ्क्त ॥ भृञ् भरणे । भरति । बभर्थ । बभृव । बभृढ्वे । भर्ता । धृञ् धारणे ॥ दधर्थ । दध्रिध्वे–दध्रिढ्वे । अधार्षीत् । अधृत ॥ णीञ् प्रापणे ॥ निनयिथ । निनेथ । निन्ये । अनैषीत् । अनेष्ट ॥ टुयाचृ याच्ञायाम् ॥ याचति । ययाचे । अयाचीत् । अयाचिष्ट ॥ यज देवपूजासङ्गतिकरणदानेषु । इयजिथ–इयष्ठ । अयाक्षीत् । अयष्ट । अयढ्वम् ॥ टुवप् बीजतन्तुसंताने ॥ उवपिथ–उवप्थ । ऊपे । उप्यात् । वप्सीष्ट ॥ अवाप्सीत्, अवाप्ताम् । अवप्त । वह प्रापणे ॥ वहति । उवहिथ–उवोढ । ऊहे । उह्यात् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri.

वक्षीष्ट । वोढा । अवाक्षित्, अवोढाम् । अवोढ, अवक्षाताम् ॥ वेञ् तन्तुसन्ताने ॥ **वेञो णादौ न संप्रसारणम्** ॥ ववौ । ववे ॥ **वेञो वा वय् णादौ** ॥ उवाय ॥ **ग्रहां ङ्किति च** ॥ ग्रहिज्यावयिव्याधिवाष्टिवृश्चतिपृच्छतिविचतिभृज्जतीनां संप्रसारणं किति ङिति च ॥ " वयो यस्य नेत्त्वम् " । ऊयतुः । ऊयुः । उवयिथ । ऊये ॥ **वयो यस्य क्किति लिटि वो वा** ॥ ऊवतुः । ऊवे । ऊयात् । वासीष्ट । अवासीत् । अवास्त । व्येञ् संवरणे ॥ **व्येञो लिटि नात्वम्** ॥ विव्याय । विव्ययिथ । वीयात् । व्यासीष्ट । अव्यासीत् । अव्यास्त ॥ ह्वेञ् स्पर्द्धायां शब्दे च ॥ **द्विरुक्तस्य ह्वयतेः संप्रसारणम्** ॥ जुहाव । जुहविथ–जुहोथ । जुहुवे । हूयात् । ह्वासीष्ट ॥ **लिपिसिचिह्वयतीनां ङौ लुङि वा आति** ॥ अह्वत–अह्वास्त । अह्वत् ॥ डुपचष् पाके ॥ पचति । पेचिथ-पपक्थ । पेचे । अपाक्षीत् । अपाक्तात्, अपाक्षुः ॥ षच समवाये ॥ सेचे । असाचीत् । असचिष्ट ॥ शप आक्रोशे ॥ शेपे । शप्ता । अशाप्सीत् । अशप्त ॥ हिक्क अव्यक्ते शब्दे ॥ जिहिक्के । अहिक्कीत् ॥ अञ्चु गतौ याचने च ॥ आनञ्चे । आञ्चीत् ॥ रेटृ परिभाषणे ॥ रिरेटे ॥ अरेटीत् ॥ चते चदे याचने च ॥ चेते । अचतीत् । चेदे । अचदीत् । अचदिष्ट ॥ प्रोथृ पर्याप्तौ ॥ पुप्रोथ । पुप्रोथे । अप्रोथीत् । अप्रोथिष्ट ॥ मिदृ मेदृ मेधाहिंसनयोः ॥ मिमिदे । अमेदीत् । अमेदिष्ट । मिमेदे । अमेदीत् । अमेदिष्ट ॥ मेधृ सङ्गमे च ॥ मिमेधे । मेधिता ॥ णिदृ णेदृ कुत्सासंनिकर्षयोः ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

निनेदे । नेदिता ॥ शृधु मृधु क्लेदने । शर्धति । शशर्ध,शशृधतुः । शशृधे । मर्धति । ममृधे । अमर्धीत् । अमर्धिष्ट ॥ बुधिर् बोधे ॥ बोधति । बोधते । अबोधीत्–अबुधत् । अबोधिष्ट ॥ उबुन्दिर् निशामने ॥ बुन्दति । बुबुन्दे । अबुदत्–अबुन्दीत् । अबुन्दिष्ट ॥ वेणृ गतिज्ञानचिन्तानिशामनवादित्रग्रहणेषु । वेणति ॥ वेणते । विवेण । अवेणीत् । अवेणिष्ट । नान्तोऽप्ययम् । वेनति ॥ चीवृ आदानसंवरणयोः ॥ चीवति । चिचीव । चिचीवे । अचीवीत् । अचीविष्ट ॥ चायृ पूजानिशामनयोः ॥ चायति । चचाय । चचाये । अचायीत् । अचायिष्ट ॥ व्यय गतौ ॥ व्ययति । वव्याय । वव्यये । अव्ययीत् । अव्ययिष्ट ॥ दाशृ दाने ॥ दाशति । ददाश । ददाशे । अदाशीत् । अदाशिष्ट ॥ भ्रेशृ भ्लेशृ गतौ ॥ भ्रेशति ॥ भेषृ भ्लेषृ गतौ भये च ॥ भेषति । बिभेषे । बिभेष । बिभ्लेष । अभेषीत् । अभेषिष्ट ॥ अस गतिदीप्त्यादानेषु ॥ असति । आस । आसे । आसीत् । आसिष्ट । अयं षान्तोऽपि । अषति ॥ चष भक्षणे ॥ चचाष । चेषतुः । चेषे । अचषीत्–अचाषीत् । अचषिष्ट । छष हिंसायाम् ॥ छषति । छषते । चच्छाष । चच्छषे । अच्छाषीत्–अच्छषीत् । अच्छषिष्ट ॥ झष आदानसंवरणयोः ॥ झषति । जझाष । जझषे । अझाषीत्–अझषीत् । अझषिष्ट ॥ भ्रक्ष भ्लक्ष अदने ॥ बभ्रक्षे । अभ्रक्षीत् । अभ्रक्षिष्ट ॥ दासृ दाने ॥ दासते । ददासे । माहृ माने ॥ ममाह । ममाहिषे । अमाहीत् । अमाहिष्ट ॥ इत्युभयपदप्रक्रिया ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

ऋत जुगुप्सायां कृपायां च ॥ ऋतेरीयङ् स्वार्थेऽनापि तु वा ॥ ऋतीयते । ऋतीयेत । ऋतीयताम् । आर्तीयत । ऋतीयांचक्रे । ऋतीयिषीष्ट । ऋतीयिता । ऋतीयिष्यते । आर्तीयिष्यत । आनर्त । ऋत्यात् । अर्तिता । अर्तिष्यति । आर्तिष्यत् । आर्तीत् । आर्तीयिष्ट ॥ इति भ्वादयः ॥

अथादादयः ।

अद भक्षणे ॥ अदादेर्लुक् ॥ अदादेः परस्यापो लुक् ॥ अत्ति, अत्तः, अदन्ति । अत्सि, अत्थः, अत्थ । अद्मि, अद्वः, अद्मः । अद्यात् ॥ झसाद्धिर्हेः ॥ झसाद्धकाराच्च परस्य हेर्धिर्भवति ॥ अद्धि–अत्तात्, अत्तम्, अत्त ॥ अदादेर्दिप्सिपोरट् ॥ अदादेश्च परयोर्दिप्सिपोरडागमः ॥ आदत् । आदः ॥ सिसयोरदेर्घस्लृ लिटि तु वा ॥ जघास ॥ "गमां स्वरे" ॥ "झसादेः" इति षः ॥ जक्षतुः । जघसिथ, जक्षथुः, जक्ष । आद, आदतुः, आदुः । आदिथ । अत्ता । लृदित्त्वात् ङः । अघसत् ॥ प्सा भक्षणे । प्साति । प्सायात् । प्सातु । अप्सात् । आदन्ताद्विषो लङोऽन उस् वा ॥ अप्सुः, अप्सान् ॥ पप्सौ ॥ "आतोऽनपि" ॥ पप्सुः । प्सायात्–प्सेयात् । अप्सासीत् ॥ मा माने ॥ माति । अमात् । अमुः- अमान् । ममौ । मेयात् । अमासीत् ॥ या प्रापणे । याति । ययौ । अयासीत् । वा गतिगन्धनयोः ॥ वाति ॥ रा दाने ॥ राति ॥ ला दानग्रहणयोः ॥ लाति । ललौ । अलासीत् ॥ श्रा पाके ॥ श्राति ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

श्रायात–श्रेयात् ॥ दाप् लवने ॥ दाति ददौ । दायात् । अदासीत् । ख्या प्रकथने ॥ ख्याति । चख्यौ ॥ **अस्यतिवक्तिख्यातिभ्यो ङो लुङि** ॥ सेरपवादः ॥ अख्यत् ॥ द्रा कुत्सायाम् ॥ द्राति । द्रेयात्–द्रायात् । अद्रासीत् ॥ पा रक्षणे ॥ पाति । पपौ । पायात् । अपासीत् ॥ भा दीप्तौ । भाति । बभौ ॥ ष्णा शौचे ॥ स्नाति । स्नायात्–स्नेयात् ॥ वश कान्तौ ॥ वष्टि, उष्टः, उशन्ति । वक्षि, उष्ठः, उष्ठ । वश्मि, उश्वः, उश्मः । उश्यात् । वष्टु–उष्टात्, उष्टाम्, उशन्तु । उड्ढि–उष्टात्, उष्टम्, उष्ट । वशानि, वशाव, वशाम ॥ **दिस्योर्हसात्** ॥ हसात्परयोर्दिप्सिपोर्लोपः ॥ अवट्–अवड्, औष्टाम्, औशन् । अवट्–अवड्, औष्टम्, औष्ट । अवशम्, औश्व, औश्म । उवाश, ऊशतुः । उवशिथ । उश्यात् । वशिता । अवाशीत्–अवशीत् ॥ हन हिंसागत्योः ॥ हन्ति ॥ **लोपस्त्वनुदात्ततनाम्** ॥ अनुदात्तानां ञमान्तानां तनादीनां वनतेश्च ञमस्य लोपो भवति झसे क्ङिति हकारे च ॥ हतः, घ्नन्ति । हन्यात् । हन्तु-हतात्, हताम्, घ्नन्तु ॥ **जह्येधिशाधि** ॥ हन्तेर्जहिरस्तेरेधिः शास्तेः शाधिर्निपात्यते हिविषये ॥ जहि । हनानि । अहन्, अहताम्, अघ्नन् । **पूर्वाद्धन्तेर्हस्य घः** ॥ जघान, जघ्नतुः, जघ्नुः । जघनिथ–जघन्थ ॥ **हनो लुङ्लिङोर्वधो लुङ्याति वा** ॥ वध्यात् ॥ हनिष्यति ॥ **जनिवध्योर्न वृद्धिः** ॥ अवधीत् ॥ यु मिश्रणे अमिश्रणे च ॥ **ओरौ** ॥ उकारस्याद्विरुक्तस्यौकारो भवत्यबादौ ॥ यौति, युतः,

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

युवन्ति । यौषि, युथः, युथ । यौमि, युवः, युमः । युयात् । यौतु । युहि । अयात् । अयौः । युयाव । युयविथ । यूयात् । यविता । अयावीत् ॥ तु गतिवृद्धिहिंसासु ॥ तुरुस्तुभ्योऽद्विरुक्तेभ्यो हसादीनां चतुर्णामीड्वा ॥ तौति—तवीति, तुतः—तुवीतः, तुवन्ति । तौषि—तवीषि, तुथः—तुवीथः; तुथ—तुवीथ । तौमि—तवीमि । तुयात्—तुवीयात् । तौतु-तवीतु--तुवीतात्-तुवीताद्, तुतात्-तुताद् । तुहि—तुवीहि । अतौत्—अतवीत् । तुताव । तोता । तोष्यति । अतौषीत् ॥ रु शब्दे ॥ रौति—रवीति । रुरविथ । अरावीत् ॥ णु स्तुतौ ॥ नौति, नुतः । नुनाव । नुनविथ । अनावीत् ॥ टुक्षु शब्दे ॥ क्षौति । क्षुयात् । क्षौतु । अक्षौत् । चुक्षविथ । क्षविता । अक्षावीत् ॥ क्ष्णु तेजने ॥ क्ष्णौति । चुक्ष्णविथ । अक्ष्णावीत् ॥ ष्णु प्रस्रवणे ॥ स्नौति । सुष्णविथ । अस्नावीत् ॥ द्यु अभिगमने ॥ द्यौति । दुद्यविथ—दुद्योथ । अद्यौषीत् ॥ षु प्रसवैश्वर्ययोः । सौति । सुषाव । सुषविथ—सुषोथ । असौषीत् ॥ कु शब्दे ॥ कौति । चुकविथ, चुकोथ । अकौषीत् ॥ वी गतिव्याप्तिप्रजनकान्त्यसनखादनेषु ॥ वेति, वीतः, वियन्ति । वेषि । वेतु । वीहि । अवेत् । अवियन् । विवयिथ-विवेथ । अवैषीत् ॥ एति, ईतः । ईयात् । ऐत् । ऐयन् । आयम् । अयांचकार । एता । ऐषीत् ॥ इण् गतौ । एति, इतः ॥ इणः क्ङिति स्वरे यः ॥ यन्ति । एषि । इयात् । एतु—यन्तु । इहि । आयम्, ऐव, ऐम । इयाय ॥ इणः किति णादौ पूर्वस्य दीर्घः ॥ ईयतुः, ईयुः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

इययिथ–इयेथ । ईयात् । एता ॥ “ दादेः पे ” ॥ “ इणः सिलोपे गा ” अगात्, अगाताम्, अगुः ॥ इक् स्मरणे ॥ इङिकावध्युपसर्गतो न व्यभिचरतः ॥ अध्येति, अधीतः, अधियन्ति । अध्यैत्-अध्यैद् ॥ इण्वदिकः ॥ अधीयाय । अधीयतुः । अधीययिथ-अधीयेथ । अधीयिवं । अधीयात् । अध्येता । अध्यगात् । विद ज्ञाने ॥ वेत्ति, वित्तः, विदन्ति । वेत्सि, वित्थः, वित्थ । वेद्मि ॥ विदो नवानां त्यादीनां णबादिर्नवको वा ॥ विदः परेषां त्यादीनां नवानां णबादिर्नवको वा ॥ वेद, विदतुः विदुः । वेत्थ, विदथुः, विद । वेद, विद्व, विद्म । विद्यात् । वेत्तु । विद्धि ॥ वेत्तेर्लोट्याम्गुणाभावः करोत्यनुप्रयोगश्च वा ॥ तनादेरुप् ॥ विदांकरोतु ॥ ॥ ङित्यदुः ॥ कृञोऽत उत् ङिति ॥ विदांकुरुतात् । विदांकुर्वन्तु । अवेत्–अवेद् ॥ “ स्याविदः ” ॥ अविदुः ॥ दः ॥ पदान्ते दस्य सो वा सिपि ॥ अवेः–अवेद्-अवेत् । आमि विदेर्न गुणः॥ विदांचकार । अवेदीत् । अस भुवि ॥ अस्ति ॥ नमस्योऽस्य ॥ प्रत्ययस्य नमोऽस्तेश्चाकारस्य लोपो ङिति ॥ स्तः, सन्ति । सिः सः ॥ अस्तेः सस्य लोपो भवति सादौ ॥ असि, स्थः, स्थ । अस्मि, स्वः, स्मः । स्यात् । अस्तु–स्तात्, स्तां, सन्तु, “ जह्येधिशाधि ” । एधि । असानि ॥ अस्तेरीट् ॥ विद्यमानादस्तेः रुदादेश्च परयोर्दिप् सिपोरीट् ॥ आसीत्, आस्ताम् । आसीः, आसम् ॥ अस्तेरनापि भूः ॥ बभूव । इत्यादि सिद्धम् ॥ मृजू शुद्धौ । मृजेर्वृद्धिः ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

क्ङिति स्वरे वा ॥ मार्ष्टि, मृष्टः, मृजन्ति—मार्जन्ति । मार्क्षि । मृज्यात् । मार्ष्टु । मृड्ढि । मार्जानि । अमार्ट्—अमार्ड् । ममार्ज, ममृजतुः--ममार्जतुः । ममार्जिथ—ममार्ष्ठ । मृज्यात् । मार्जिता—मार्ष्टा । अमार्जीत् । वच परिभाषणे ॥ वक्ति । नहि वचिरन्तिपरः। वक्षि । वक्थः । वच्मि । वच्यात् । वक्तु । वग्धि । अवक्—अवग् । उवाच, ऊचतुः ॥ उवचिथ—उवक्थ । उच्यात् । वक्ता । वक्ष्यति । अवक्ष्यत् । "अस्यतिवक्ति" इति ङः ॥ **वचेरुम्** । अवोचत्, अवोचताम्, अवोचन् ॥ रुदिर् अश्रुविमोचने ॥ **रुदादेश्चतुर्णां ह्वसादेः** ॥ रुदादेः परस्य तिबादिचतुर्णां मध्ये हकारवसादेः प्रत्ययस्येट् ॥ रोदिति, रुदितः, रुदन्ति । रोदिषि, रुदिथः, रुदिथ । रुद्यात् । रोदितु । रुदिहि ॥ **रुदादेर्दिस्योरडिटौ** ॥ अरोदीत्, अरोदत्, अरुदिताम्, अरुदन् ॥ "इरितो वा" ॥ अरुदत् ॥ ञिष्वप् शये । स्वपिति । स्वप्यात् । स्वपितु । अस्वपीत्—अस्वपत् । सुष्वाप । स्वप्ता । अस्वाप्सीत् ॥ श्वस् प्राणने ॥ श्वसिति । श्वस्यात् । श्वसितु । अश्वसत् । अश्वसीत् । शश्वास । अन प्राणने ॥ अनिति ॥ **प्रादे रेफादनितेर्नस्य णत्वम्** ॥ प्राणिति । प्राणिहि । आनीत्—आनत् । आन, आनतुः । अन्यात् । अनिता । आनीत् । जक्ष भक्षहसनयोः ॥ जाक्षिति, जाक्षितः ॥ **जक्षादेरन्तोऽदन उस्** ॥ जक्षजागृदरिद्राशास्चकासृभ्यः परस्यान्तोऽत् अन उस् च ॥ जक्षति । जक्ष्यात् । जक्षितु । जाक्षिहि । अजक्षीत् । अजक्षत् । जाक्षिता ॥ इति रुदादयः ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

जागृ निद्राक्षये । जागर्ति, जागृतः, जाग्रति । जागृयात् । जागर्तु । अजागः । अजागृताम् ॥ उसि गुणः ॥ अजागरुः । जजागार ॥ जागर्तेर्वीण्णबूङिन्द्भिन्नेषु गुणः ॥ जजागरतुः, जजागरुः । जजागरिथ । जागरांचकार । जागर्यात् । जागरिता । जागरिष्यति । अजागरिष्यत् । अजागरीत् । दरिद्रा दुर्गतौ ॥ दरिद्राति ॥ दरिद्रातेरिदालोपश्च ङिति ॥ दरिद्रातेरातो लोपो ङिति स्वरे इकारश्च ङिति हसे ॥ दरिद्रितः, दरिद्रति । दरिद्रियात् । दरिद्रातु । अदरिद्रात्, अदरिद्रिताम्, अदरिद्रुः ॥ दरिद्रातेरनप्यालोपः सौ वा णब्बुणनिट्सशुट्सु न ॥ ददरिद्रौ, ददरिद्रतुः । दरिद्रांचकार । दरिद्र्यात् । दरिद्रिता । अदरिद्रीत्, अदरिद्रिष्टाम्, अदरिद्रासीत् ॥ शासु अनुशिष्टौ ॥ शास्ति ॥ शासेरिः ॥ शासेरातो हसे क्ङिति ङे च इङ्वति ॥ "घसादेः षः" ॥ शिष्टः, शासति । शास्सि, शिष्ठः, शिष्ठ । शास्मि । शिष्यात् । शास्तु ॥ "जह्योधिशाधि" ॥ शाधि ॥ दिपि ॥ धातोः सस्य तः स्याद्दिपि ॥ अशाद्–अशात्, अशिष्टाम्, अशासुः ॥ सिपि वा ॥ धातोः सस्य वा तः स्यात्सिपि ॥ अशात्-अशाद्, अशाः । शशास । शिष्यात् । शासिता । अशासिष्यत् । अशिषत् ॥ चकासृ दीप्तौ ॥ चकास्ति, चकास्तः, चकासति ॥ "झसाद्धिर्हेः" ॥ "धे सलोपः" । चकाधि । अचकात्, अचकासुः ॥ अचकाः, अचकात्, अचकाद् । चकासांचकार । अचकासीत् ॥

इति परस्मैपदम् ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

चक्षिङ् व्यक्तायां वाचि ॥ "स्कोराद्योश्च" ॥ चष्टे, चक्षाते ॥ "आतोऽन्तोऽदनतः" ॥ चक्षते । चक्षे, चक्षाथे, चड्ढ्वे । चक्षे, चक्ष्वहे, चक्ष्महे । चक्षीत । चष्टाम् । अचष्ट ॥ चक्षिङोऽनपि ख्याञ्क्शाञौ णादौ तु वा ॥ चख्यौ, चख्यतुः । चख्ये । चख्याते । चक्शौ । चक्शे । चचक्षे । ख्येयात्—ख्यायात् । ख्यासीष्ट । क्शायात्—क्शेयात् । अख्यत् । अख्यत । अक्शास्त ॥ ईर गतौ कम्पने च ॥ ईर्ते, ईराते । ईर्ताम्, ईराताम् । ऐर्त । ईरांचक्रे । ईरिषीष्ट । ऐरिष्ट ॥ आङः शासु इच्छायाम् ॥ आशास्ते ॥ आशशासे । आशासिष्ट ॥ कासि गतिशासनयोः ॥ कंस्ते, कंसाते । अयमनिदिदित्येके । कस्ते । तालव्यान्तोऽप्यनिदित् । कष्टे, कशाते । कक्षे, कड्ढ्वे । अकशिष्ट ॥ णिसि चुम्बने ॥ निंस्ते, निंसाते, निंस्से । निंसिता ॥ णिजि शुद्धौ ॥ "चोः कुः" ॥ निङ्क्ते, निङ्क्षे । निञ्जिता ॥ शिजि अव्यक्ते शब्दे ॥ शिङ्क्ते । शिङ्क्षे । शिञ्जिता ॥ पिजि वर्णे संपर्चने च ॥ पिङ्क्ते । पिपिञ्जे । पिञ्जिता ॥ पृचि संपर्चने । पृङ्क्ते । पपृञ्चे पृञ्चिता ॥ पृची संपर्चने ॥ पृक्ते । पपृचे । अपर्चिष्ट ॥ ईड स्तुतौ ॥ ईट्टे । ईडीशिभ्यां सध्वयोरिट् ॥ ईडिषे, ईडिध्वे ॥ लङो ध्वस्य नेट् ॥ ऐड्ढ्वम् । ईडांचक्रे । ऐडिष्ट ॥ ईश ऐश्वर्ये ॥ ईष्टे । ईशिषे । ईशिध्वे । ईशांचक्रे । ईशितासे ॥ आस उपवेशने ॥ आस्ते । आध्वे । आसांचक्रे ॥ वस आच्छादने ॥ वस्ते । ववसे । अवसिष्ट ॥ षूङ् प्राणिगर्भविमोचने ॥ सूते । "नुधातोः" ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

सुवाते । सूताम् ॥ सुवो न गुणश्चतुर्षु ॥ सुवावहे । सुषुवे । संवि-षीष्ट—सोषीष्ट । सविता—सोता ॥ शीङ् स्वप्ने ॥ शीङो गुणश्च-तुर्षु ॥ शेते । शयाते ॥ शीङोऽतो रुट् ॥ शीङः परस्यातो रुडा-गमः ॥ शेरते । शेताम् । अशेत । अशेरत । शिश्ये । अशयिष्ट ॥ इङ् अध्ययने ॥ अधिपूर्वः । अधीते । अधीयते । अधीयीत । अधी-यीयाताम् । अध्ययै । अध्यैत । अध्यैयाताम् ॥ इङो णादौ गाङ्॥ अधिजगे । अध्येषीष्ट ॥ इङो वा गीर्लुङ्लृङोर्गुणाभावश्च ॥ अध्यगीष्यत—अध्यैष्यत । अध्यगीष्ट—अध्यैष्ट ॥ इति आत्मनेपदम् ॥

द्विष अप्रीतौ ॥ द्वेष्टि, द्विष्टः । द्वेष्टु । द्विड्ढि । अद्वेट्—अद्वेड् । अद्विष्टाम्, अद्विषुः, अद्विषन् । दिद्वेषिथ । द्विक्षीष्ट । अद्विक्षत् ॥ दुह प्रपूरणे ॥ "दादेर्घः" ॥ "तथोर्धः" ॥ दोग्धि, दुग्धः, दुहन्ति । धोक्षि । दुग्धे । दोग्धु । दोग्धि । दोहानि । अधोक्—अधोग् । दुदोह । धुक्षीष्ट । अधुक्षत् । अदुग्ध । अधुक्षत । अधुक्षाताम् । अदुग्धाः-अधुक्षथाः । अधुग्ध्वम्—अधुक्षध्वम् । अदुह्वहि—अधुक्षावहि ॥ दिह उपचये ॥ देग्धि ॥ लिह आस्वादने ॥ लेढि, लीढः ॥ ष्टुञ् स्तुतौ ॥ स्तौति—स्तवीति । स्तुतः—स्तुवीतः, स्तुवन्ति । स्तौषि—स्तवीषि । स्तुते—स्तुवीते । स्तुष्व—स्तुवीष्व । अस्तौत् । तुष्टोथ । तुष्टुव । तुष्टुम । स्तोषीष्ट ॥ स्तुसुधूञ्भ्यां पे सेरिट् ॥ अस्तावीत् । अस्तोष्ट ॥ ब्रूञ् व्य-क्तायां वाचि ॥ अब्रादावीप्पिति त्सिम ॥ ब्रूञ् ईप्प्रत्ययोऽब्रादौ पिति त्सिम ॥ ब्रवीति, ब्रूतः, ब्रुवन्ति ॥ ब्रुव आहश्च पञ्चानाम् ॥ ब्रुवः

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

परेषां पञ्चानां तिबादीनां णबादयः पञ्चादेशा वा स्युः ब्रुव आहश्च ॥ आह, आहतुः, आहुः ॥ तस्थे ॥ आहो हस्य तः थे परे ॥ आत्थ, आहथुः । ब्रूते । ब्रवीतु । अब्रवीत् ॥ ब्रुवोऽनापि वच् ॥उवाच।ऊचे। अवोचत् । अवोचत ॥ "आदाथ इः" ॥ अवोचेताम्, अवोचन्त । अवोचथाः, अवोचेथाम्, अवोचध्वम् । अवोचे । अवोचावहि ॥ ऊर्णुञ् आच्छादने ॥ ऊर्णोतेर्वा वृद्धिर्हसादौ पिति च चतुर्षु ॥ ऊर्णोति । ऊर्णौति,ऊर्णुतः, ऊर्णुवन्ति । ऊर्णुते । ऊर्णुयात् । ऊर्णुवीत । ऊर्णोतु–ऊर्णौतु । ऊर्णुहि ॥ ऊर्णोतेर्गुणो दिस्योः ॥ वृद्धेरपवादः ॥ और्णोत् । और्णोः ॥ ऊर्णोतेराम्न ॥ स्वरादेः परः । स्वरादेर्धातोर्द्वितीयोऽवयवोऽद्विरुक्तः सस्वरो द्विर्भवति ॥ स्वरात्पराः संयोगादयो नदरा द्विर्न ॥ ऊर्णुनाव, ऊर्णुनुवतुः ॥ ऊर्णोतेरिडादिप्रत्ययो वा ङित् ॥ ऊर्णुनुविथ–ऊर्णुनविथ । ऊर्णुविता–ऊर्णविता ॥ ऊर्णोतेर्वा वृद्धिः सौ पे ॥ पक्षे वा गुणः ॥ और्णावीत् । और्णाविष्टाम् । और्णवीत् । और्णुवीत् । और्णुविष्टाम्, और्णविष्ट । और्णुविष्ट ॥ इति आत्पे ॥ इत्यदादयः ॥

अथ ह्वादयः ।

हु दानादनयोः॥ ह्वादेर्द्विश्च ॥ हु इत्यादेरुत्पन्नस्यापो लुक् धातोश्च द्वित्वम् । जुहोति, जुहुतः ॥ द्वेः ॥ द्विरुक्तात्परस्यान्तोऽत् ॥ जुह्वति । जुहोषि, जुहुथः, जुहुथ । जुहोमि, जुहुवः, जुहुमः । जुहुयात् ॥ जुहोतेर्हेर्धिः ॥ जुहुधि । अजुहोत् ॥ अन उस् ॥ द्विरु-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

क्वादन उस् ॥ "उसि गुणः" । अजुहवुः । जुहाव ॥ भीहीभृहु-वामाम्वा स च लुग्वत् ॥ जुहवांचकार ॥ "ये" हूयात् । होता । होष्यति । अहौषीत् ॥ ञिभी भये ॥ बिभेति ॥ ङिति हसे भीहाकोरिद्वा ॥ बिभीतः, बिभितः, बिभ्यति । बिभीयात्, बिभियात् । बिभेतु, बिभीतात् । अबिभयुः । बिभयांचकार, बिभाय । अभैषीत् ॥ ह्री लज्जायाम् ॥ जिह्रेति । अजिह्रयुः । जिह्रयांचकार । जिह्राय । ह्रीयात् । ह्रेता । अह्रैषीत् ॥ पॄ पालनपूरणयोः ॥ ऋप्रो-रिः पूर्वस्य ॥ ऋप्रोः पूर्वस्यात इत् लुकि ॥ पिपर्ति ॥ पोरुर् ॥ पवर्गात् वकाराच्च ऋत उर् अगुणवृद्धौ प्रत्यये ॥ "य्वोर्वि हसे" पिपूर्तः । पिपुरति । पिपूर्यात् । पिपर्तु, पिपूर्तात्, पिपूर्ताम्, पिपुरतु ॥ "दिस्योर्हसात्" ॥ अपिपः ॥ पपार, पपरतुः । पपरिथ । पूर्यात् । परिता—परीता । परिष्यति—परीष्यति । अपारीत् ॥ पृ पालनपूर-णयोः ॥ पिपर्ति, पिपृतः, पिप्रति । पिपृयात् । पिपर्तु, । पिपृतात्, पिपृताम्, पिप्रतु । पिपृहि—पिपृताम्, पिपृतम्, पिपृत । पिपराणि, पिपराव, पिपराम । अपिपः, अपिपृताम् । पपार, पप्रतुः, पप्रुः । पपर्थ । प्रियात् । पर्ता । परिष्यति । अपरिष्यत् । अपार्षीत्, अपार्ष्टाम् ॥ ओहाक् त्यागे ॥ जहाति ॥ द्वेस्तो ॥ द्विरुक्तस्य धातोरातो लोपो ङिति स्वरे ईकारश्च ङिति हसे ॥ जहीतः, जहितः, जहति । "जहा-तेर्यादादावालोपः ॥ जह्यात् ॥ ईर्वा हौ ॥ जहातेर्हौ परे इकार ईकारश्च वा । जहिहि जहीहि जहाहि । अजहात्, अजहिताम्—अजहीताम्,

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

अजहुः ॥ जहौ 'दादेरे' ॥ हेयात् । अहासीत् । ऋ गतौ । "असवर्णे स्वरे इय्"। इयर्ति । इयृतः । इयृति । इयृयात् । इयर्तु। ऐयः, ऐयृताम्, ऐयरुः । आर । आरतुः, आरुः । 'अत्त्यर्तिव्ययसतीनाम्' इतीट् । आरिथ । आरत् । सृ गतौ ॥ ससर्ति । ससर्थ । स्रियात् । असरत् ॥ इति पस् ॥

ओहाङ् गतौ ॥ भृञां लुकि ॥ डुभृञ्हाङ्माङां पूर्वस्यात ईत् लुकि ॥ जिहीते, जिहाते । जिहते । जहे । अहास्त ॥ माङ् माने । मिमीते । ममे । अमास्त ॥ इत्यात् ॥

डुभृञ् धारणपोषणयोः ॥ बिभर्ति, बिभृतः, बिभ्रति । बिभृयात् । बिभर्तु । अबिभः । बिभरांचकार । बभर्थ । बभृव । बभृम । बभ्रे । बभृढ्वे । भृषीष्ट । अभार्षीत् । अभृत ॥ डुदाञ् दाने ॥ ददाति । दादेः ॥ द्विरुक्तानामपिद्वाधामातो लोपो ङिति ॥ दत्तः ॥ ददति । दत्ते । ददातु ॥ दां हौ ॥ अपिद्वाधामेत्वं पूर्वस्य च लोपो हौ ॥ देहि । अददात् । ददौ । ददिथ, ददाथ । देयात् । अदात् । अदित । अदिषाताम् ॥ डुधाञ् धारणपोषणयोः । दधाति ॥ पूर्वस्य ङिति झसे धः ॥ धाञः पूर्वस्य दकारस्य धो भवति ङिति झसे परे ॥ धत्तः, दधति । धत्ते । धेहि । अदधात् । धेयात् । अधित, अधिषाताम् ॥ णिजिर् शौचपोषणयोः ॥ निजां गुणः ॥ णिजिविजिविषां पूर्वस्य गुणो लुकि ॥ नेनेक्ति, नेनिक्तः, नेनिजति । नेनेक्षि । नेनिक्ते । नेनिज्यात् । नेनेक्त । नेनिजिध ॥ द्वे स्वरेऽपि नोपधागुणः ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

द्विरुक्तस्य धातोरब्विषयें स्वरे परे उपधाया गुणो न ॥ नेनिजानि । अनेनेक्-अनेनेग् । निनेज । निनिजे । निनिजिषे । निक्षीष्ट । अनिजत्-अनैक्षीत्, अनैक्ताम् । अनिक्त ॥ विजिर् पृथग्भावे । वेवेक्ति । विवेजिथ । विक्षीष्ट । अविजत्-अवैक्षीत् । अविक्त । विष्लृ व्याप्तौ ॥ वेवेष्टि । विविषिध्वे । विक्षीष्ट । अविषत् ॥ तनि "हसषा-न्तात्सक्" अविक्षत, अविक्षाताम्, अविक्षन्त ॥ इत्युभयपद-प्रक्रिया ॥ इति ह्वादयः ॥

अथ दिवादयः ।

दिवु क्रीडाविजिगीषाव्यवहारद्युतिस्तुतिमोदमदस्वप्नकान्तिगतिषु ॥ दिवादेर्श्यः ॥ कर्तरि चतुर्षु ॥ अपोऽपवादः ॥ " य्वोर्वि हसे " ॥ दीव्यति । दीव्येत् । दिदेव । दीव्यात् । अदेवीत् । षिवु तन्तुसन्ताने ॥ सीव्यति । " सिवादेरड्व्यवाये वा षः" । न्यषेवीत्-न्यसेवीत् ॥ स्रिवु गतिशोषणयोः ॥ स्रीव्यति । सिस्रेव । ष्ठिवु निरसने । ष्ठीव्यति ॥ ष्णुसु अदनादानदर्शनेषु । सुष्णोस ॥ ष्णसु निरसने ॥ स्नस्यति ॥ क्नसु कौटिल्ये दीप्तौ च ॥ चक्नसिथ । अक्नासीत्-अक्नसीत् ॥ व्युष प्लुष दाहे ॥ वुव्योष ॥ नृती गात्र-विक्षेपे ॥ नृत्यति । ननर्त ॥ नृतनृदचृतछृदकृद्धचोऽसेः सादेरिड्वा॥ नर्तिष्यति-नर्त्स्यति । अनर्तीत् । त्रसी उद्वेगे ॥ "भ्राशम्लाश" इति वा यः । त्रस्यति । त्रसति । तत्रास । तत्रसतुः ॥ कुथ पूतीभावे । कुथ्यति । चुकोथ । चुकोथिथ ॥ पुथ हिंसायाम् । पुथ्यति । अपो-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

थीत् ॥ गुध परिवेष्टने ॥गुध्यति । अगोधीत् ॥ क्षिप प्रेरणे ॥ क्षिप्यति । क्षेप्ता । अक्षैप्सीत् ॥ पुष्प विकसने ॥ पुष्प्यति । पुपुष्प । तिम् तीम् ष्टिम् ष्टीम् आर्द्रीभावे ॥ तिम्यति । तीम्यति । तितेम । तिष्टीम ॥ व्रीड लज्जायाम् ॥ व्रीड्यति । विव्रीड ॥ इष गतौ ॥ इष्यति । इयेष, ईषतुः । एषिता–एष्टा । ऐषीत् ॥ षह षुह तृप्तौ ॥ सह्यति । ससाह । सेहतुः, सेहुः । असहीत् । सुह्यति ॥ झृषिर् झॄष वयोहानौ ॥ जीर्यति । जजरतुः, जेरतुः । जीर्यात् । जरिता–जरीता । "ऋवर्णदृशोः" इत्यनेन गुणः । अजरत् । अजारीत् ॥ झीर्यति । जझरतुः । अझारीत् ॥ शो तनूकरणे ॥ य्योः ॥ यप्रत्यये परे धातोरोतो लोपः ॥ श्यति । शशौ । शाता । अशात् । अशासीत् ॥ छो छेदने । छ्यति । अच्छात् । अच्छासीत् ॥ षो अन्तकर्मणि ॥ स्यति । सेयात् । असात् । असासीत् ॥ दो अवखण्डने ॥ द्यति । देयात् । अदात् ॥ राध साध संसिद्धौ ॥ राधोऽकर्मकादेव यः ॥ राध्यति । रराधिथ । राद्धा । रात्स्यति । अरात्सीत् ॥ व्यध ताडने ॥ "ग्रहां क्ङिति च ॥" विध्यति । विव्याध, विविधतुः ॥ विव्यधिथ, विव्यद्ध । व्यद्धा । अव्यात्सीत् ॥ पुष पुष्टौ ॥ पुष्यति । पुपोषिथ । पोष्टा । पोक्ष्यति । पुषादित्वात् ङः । अपुषत् ॥ शुष शोषणे ॥ शोष्टा । शोक्ष्यति । अशुषत् ॥ तुष तुष्टौ । तोष्टा । तोक्ष्यति । अतुषत् । दुष वैकृत्ये ॥ दोष्टा । अदुषत् ॥ श्लिष आलिङ्गने ॥ श्लेष्टा । आलिङ्गनश्लिषेः सक्रू ॥ ङाऽपवादः । अश्लिक्षत्कन्यां चैत्रः ॥ अनालिङ्गने तु

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

समश्लिषज्जतु काष्ठम् ॥ ष्विदा गात्रप्रक्षरणे ॥ स्वेत्ता ॥ अस्विदत् ॥ क्रुध क्रोधे ॥ क्रोद्धा । अक्रुधत् ॥ क्षुध बुभुक्षायाम् ॥ क्षोद्धा । अक्षुधत् ॥ शुध शौचे ॥ शोद्धा । अशुधत् ॥ षिधु संराद्धौ ॥ सेद्धा । असिधत् । रध हिंसायाम् ॥ रध्यति । ररन्ध, ररन्धतुः । ररन्धिथ–ररद्ध । ररन्धिव–रेध्व । ररन्धिम–रेध्म ॥ **लिड्वर्जिते इटि रधेर्नुम्न॥** रधिता–रद्धा । रधिष्यति–रत्स्यति । अरधत् । णश अदर्शने । नश्यति । ननाश, नेशतुः, नेशिथ **॥ मस्जिनशोर्झसे नुम् ॥** ननंष्ठ । नेशिव–नेश्व । नेशिम–नेश्म । नशिता–नंष्टा । नशिष्यति-नङ्क्ष्यति । अनशत् ॥ तृप प्रीणने ॥ तृप्यति । ततर्पिथ–तत्रप्थ, ततर्प्थ । तर्पिता–त्रप्ता–तर्प्ता । तर्पिष्यति–त्रप्स्यति–तर्प्स्यति । अतृपत्–अतर्पीत्, अत्राप्सीत्–अतार्प्सीत् ॥ दृप हर्षगर्वयोः ॥ दृप्यति । अद्राप्सीत् ॥ द्रुह जिघांसायाम् ॥ दुद्रोहिथ–दुद्रोढ–दुद्रोग्ध । दुद्रुहिव–दुद्रुह्व, दुद्रुहिम–दुद्रुह्म । द्रोहिता–द्रोग्धा-द्रोढा । द्रोहिष्यति–ध्रोक्ष्यति । अद्रुहत् ॥ मुह वैचित्त्ये ॥ मुह्यति । मुमोहिथ–मुमोढ–मुमोग्ध ॥ ष्णुह उद्गिरणे ॥ स्नुह्यति । सुष्णोहिथ-सुष्णोढ–सुष्णोग्ध । ष्णिह प्रीतौ । सिष्णेहिथ–सिष्णेढ–सिष्णेग्ध । शमु उपशमे ॥ शमां दीर्घः ॥ शमादीनां दीर्घः कर्तरि ये ॥ शाम्यति । शमिता । अशमत् ॥ तमु काङ्क्षायाम् ॥ ताम्यति । तताम, तेमतुः । अतमत् । दमु शमनायाम् ॥ दाम्यति । देमतुः । अदमत् ॥ श्रमु तपसि खेदे च ॥ श्राम्यति । शश्राम, शश्रमतुः । अश्रमत् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

भ्रमु अनवस्थाने ॥ भ्राम्यति, भ्रमति । बभ्राम, भ्रेमतुः–बभ्रमतुः । अभ्रमत् ॥ क्षमू सहने ॥ क्षाम्यति । चक्षमिथ–चक्षन्थ । अक्षमत् । क्लमु ग्लानौ ॥ "भ्राशभ्लाश" इति यो वा । क्लाम्यति ॥ " ष्ठिवुक्लम्वाचमां दीर्घोऽपि " ॥ क्लामति ॥ मदी हर्षे ॥ माद्यति । मेदिथ । अमदत् ॥ शमादयोऽष्टौ ॥ असु क्षेपणे ॥ अस्यति । अस्येत् । आस, आसतुः । आसिथ ॥ अस्यतेस्थुक् ङे ॥ आस्थत् ॥ यसु प्रयत्ने ॥ अनुपसर्गाद्यसः सम्पूर्वाच्च यो वा ॥ यस्यति–यसति । संयस्यति–संयसति । ययास । येसिथ । अयसत् ॥ उपसर्गे तु प्रयस्यति ॥ जसु मोक्षणे । जस्यति । जजास । जेसिथ । अजसत् । तसु दसु उपक्षये ॥ तस्यति । दस्यति । ददास । देसिथ । अदसत् ॥ वसु स्तम्भे ॥ वस्यति । ववास । ववसतुः । अवसत् ॥ विस प्रेरणे ॥ विस्यति । विवेस । अविसत् । कुश संश्लेषणे ॥ कुश्यति । चुकोश । कोशिता । अकुशत् ॥ बुस उत्सर्गे ॥ बुस्यति । बुबोस । बोसिता । अबुसत् । मुस खण्डने । मुस्यति । मोसिता । अमुसत् ॥ मसी समी परिणामे ॥ मस्यति । मेसिथ । अमसत् ॥ लुठ विलोडने । लुठ्यति । लोठिता । अलुठत् ॥ उच समावाये ॥ उच्यति । उवोच, ऊचतुः । औचत् ॥ भृशु भ्रंशु अधःपतने ॥ भृश्यति । बभर्शिथ । अभृशत् । भ्रश्यति । बभ्रंश । अभ्रशत् ॥ वृश वरणे ॥ वृश्यति । ववर्शिथ । अवृशत् ॥ कृश तनूकरणे ॥ कृश्यति । चकर्शिथ । अकृशत् ॥ ञितृष् पिपासायाम् ॥ तृष्यति । ततर्षिथ ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

अतृषत् ॥ हृष् तुष्टौ ॥ हृष्यति । जहर्षिथ । अहृषत् ॥ रुष् रिष् हिंसायाम् ॥ रुष्यति । रोषिता—रोष्टा । अरुषत् । रिष्यति । रेषिता-रेष्टा । अरिषत् ॥ डिप् क्षेपे ॥ डिप्यति । अडिपत् ॥ कुप् क्रोधे ॥ कुप्यति । अकुपत् ॥ गुप् व्याकुलत्वे ॥ गुप्यति । अगुपत् ॥ युप् रुप् लुप् विमोहने ॥ युप्यति । युयोपिथ । अयुपत् । रुप्यति । रुरोपिथ । अरुपत् । लुप्यति । लुलोपिथ । अलुपत् ॥ लुभ आकाङ्क्षायाम् ॥ लुभ्यति । लुलोभ । लोभिता—लोब्धा । अलुभत् ॥ क्षुभ् संचलने ॥ क्षुभ्यति । चुक्षोभ । अक्षुभत् ॥ क्लिदू आर्द्रीभावे ॥ क्लिद्यति । चिक्लेद । क्लेदिता—क्लेत्ता । अक्लिदत् ॥ ञिमिदा स्नेहने ॥ **मिदेर्गुणो ये** ॥ मेद्यति । मिमेद । मिद्यात् । अमिदत् । ञिक्ष्विदा स्नेहनमोचनयोः ॥ क्ष्वेदिता । अक्ष्विदत् ॥ ऋधु वृद्धौ ॥ ऋध्यति । आर्ध्यत् । आनर्ध । ऋध्यात् । आर्धत् ॥ गृधु अभिकाङ्क्षायाम् ॥ गृध्यति । जगर्धिथ । अगृधत् ॥ इति परस्मैपदम् ॥ इति पुषादयः ।

षूङ् प्राणिप्रसवे ॥ सूयते । सुषुवे । सविता । असविष्ट ॥ दूङ् परितापे ॥ दूयते । दुदुविढ्वे—दुदुविध्वे । अदविष्ट ॥ दीङ् क्षये ॥ दीयते । **दीङो युट् क्ङित्स्वरस्य** ॥ दिदीये ॥ **मीनातिमिनोतिदीङां गुणवृद्धिविषये क्यपि चात्वम्** ॥ दासीष्ट । दाता । दास्यते । अदास्त ॥ डीङ् विहायसा गतौ ॥ डीयते । डयिष्यते । अडयिष्ट ॥ धीङ् धारणे ॥ धीयते । दिध्यिढ्वे—दिध्यिध्वे । अधेष्ट ॥ मीङ् प्राणवियोगे ॥ मीयते । मेता ॥ रीङ् स्रवणे ॥ रीयते । रिर्ये । अरेष्ट ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

लीङ् श्लेषणे ॥ लीयते । लिल्ये ॥ लीलीङोरात्वं वा गुणवृद्धिविषये क्यपि च ॥ लाता–लेता । अलास्त । अलेष्ट । व्रीङ् वरणे ॥ व्रीयते । विव्रिये । व्रेष्यते ॥ अव्रेष्ट ॥ स्वादय ओदितः॥ पीङ् पाने ॥ पीयते । अपेष्ट॥माङ् माने ॥ मायते । ममे । अमास्त–अमासाताम् ॥ ईङ् गतौ ॥ ईयते । अयांचक्रे ॥ प्रीङ् प्रीतौ । प्रीयते । पिप्रिये । अप्रेष्ट ॥ जनी प्रादुर्भावे ॥ ज्ञाजनोर्जा ॥ कर्तारि चतुर्षु ॥ जायते "गमां स्वरे" जज्ञे । जनिता । "दीपजन" इति इण् ॥ "जनिवध्योर्न वृद्धिः" ॥ अजनि–अजनिष्ट ॥ तूरी गतित्वरणहिंसनयोः ॥ तूर्यते । तुतूरिषे ॥ दीपी दीप्तौ ॥ दीप्यते । अदीपि–अदीपिष्ट ॥ पूरी आप्यायने ॥ अपूरि–अपूरिष्ट ॥ तप ऐश्वर्ये ॥ तप्यते । तेपे । तप्ता । अतप्त ॥ वावृतु वरणे ॥ वावृत्यते । वावर्ताञ्चक्रे ॥ पद गतौ ॥ पेदे । पत्ता ॥ पदेरिण् तनि कर्तरि ॥ अपादि, अपत्साताम् ॥ खिद दैन्ये ॥ खेत्ता ॥ विद सत्तायाम् ॥ विद्यते । वित्सीष्ट । वेत्ता । अवित्त ॥ बुध अवगमने ॥ बुध्यते । भुत्सीष्ट । "दीपजन" इति इण् । अबोधि । अबुद्ध ॥ युध संप्रहारे ॥ युध्यते । युयुधे । युत्सीष्ट । अयुद्ध ॥ अनुनोरुध कामे ॥ अनुरुध्यते । अनुरुरुधे । अनुरुत्सीष्ट । अनुरोद्धा । अन्वरुद्ध ॥ मन ज्ञाने ॥ मन्यते । मेने । मेनिषे । मन्ता । अमंस्त ॥ युज समाधौ ॥ युज्यते । योक्ता । अयुक्त ॥ सृज विसर्गे ॥ सृज्यते ॥ "रारो झसे दृशाम्" स्रष्टा । असृष्ट । असृक्षाताम् ॥ लिश अल्पीभावे ॥ लिश्यते । लिक्षीष्ट । लेष्टा । अलिक्षत, अलिक्षाताम् ॥ इत्याद ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

मृष् तितिक्षायाम् ॥ मृष्यति । मृष्यते । ममृषे । अमर्षीत् । अमर्षिष्ट ॥ ईशुचिर् क्लेदने ॥ शुच्यति । शुच्यते । अशुचत् । अशोचीत् । अशोचिष्ट ॥ रञ्ज रागे ॥ "अपि रञ्जदंश" इति नलोपः । रज्यति । रज्यते । अराङ्क्षीत् । अरङ्क्त ॥ शप् आक्रोशे ॥ शप्यति । शप्यते । शेपतुः । शेपे । शप्ता । अशाप्सीत् । अशप्त ॥ शक मर्षणे ॥ शेकिथ—शशक्थ । पुषादित्वात् ङः । अशकत् । अशक्त । सेट्कोऽयमित्येके । शकिता ॥ णह बन्धने ॥ नह्यते । नेहिथ—ननद्ध । नत्सीष्ट । नद्धा । अनात्सीत् । अनद्ध ॥ इत्यात्पे ॥ इति दिवादयः ॥

अथ स्वादयः ।

षुञ् अभिषवे ॥ स्वादेर्नुः ॥ कर्तरि चतुर्षु ॥ नूपः ॥ नुप्रत्ययस्य उप्रत्ययस्य च गुणो भवति पिति ॥ सुनोति । सुनुते ॥ "ओर्म्वोर्वा लोपः" सुन्वः—सुनुवः । सुनोतु ॥ "ओर्वो हेः" । सुनु । सुनवानि । सुनवै । असुनोत्, असुनुताम् । सुषाव, सुषुवतुः । सोषीष्ट । असावीत् ॥ "स्तुसुधूञ्भ्यां पे सेरिट्" ॥ असोष्ट ॥ षिञ् बन्धने ॥ सिनोति । सिनुते । सिष्ये, सिष्याते ॥ असैषीत् । असेष्ट ॥ शिञ् निशाने ॥ शेता । अशेष्ट । अशैषीत् ॥ डुमिञ् प्रक्षेपे ॥ मीनातिमिनोतीत्यात्वम् ॥ ममौ । मिम्यतुः । ममिथ—ममाथ । मिम्ये । अमासीत् । अमास्त ॥ चिञ् चयने ॥ चिनोति ॥ चिनोतेः सणादौ किर्वा ॥ चिकाय—चिचाय, चिच्यतुः । अचैषीत् । अचेष्ट ॥ स्तृञ् आच्छादने ॥ स्तृणोति । स्तृणुतः । स्तृण्वन्ति । तस्तार ॥ "गुणो-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

ऽर्त्तिसंयोगाद्योः " ॥ तस्तरतुः ॥ " ऋदन्तात्थपो नेट् " तस्तर्थ । तस्तरे । स्तर्यात् ॥ ऋदन्तात्संयोगादेः सिस्योरिड्वाऽऽति ॥ स्तरिषीष्ट–स्तृषीष्ट । अस्तारीत् । अस्तरिष्ट–अस्तृत ॥ " लोपो ह्रस्वाज्झसे " ॥ कृञ् हिंसायाम् ॥ कृणोति । कृणुते । चकर्थ । चकृवहे । अकार्षीत् ॥ अकृत ॥ वृ वरणे ॥ ववार । वव्रतुः ॥ वृञस्थप इट् ॥ ववरिथ ॥ वृङ्वृञ्ऋदन्तात्सिस्योरिड्वाऽऽति ॥ वरिषीष्ट–वृषीष्ट ॥ वरिता–वरीता । वरिष्यति–वरीष्यति । अवारीत्, अवारिष्टाम् । अवरिष्ट–अवरीष्ट–अवृत ॥ धुञ् कम्पने ॥ धुनोति । धुनुते । दुधाव, दुधुवतुः । धोष्यति । अधौषीत् । अधोष्ट । दीर्घान्तोऽप्ययम् ॥ धूनोति । " स्तुसुधूञ्भ्यः " इतीट् । अधावीत् । " स्वरतिसूति " इति वेट् । अधविष्ट–अधोष्ट ॥ इत्यात्मे ॥

टुदु उपतापे ॥ दुनोति । दुदाव । दुदुवतुः । अदौषीत् ॥ हि गतौ वृद्धौ च । हिनोति ॥ पूर्वाद्धिनोतेर्हस्य घो न ण्वडि ॥ जिघाय, जिघ्यतुः । अहैषीत् ॥ आप्लृ व्याप्तौ ॥ आप्नोति, आप्नुतः, आप्नुवन्ति । आप्नुहि । आप, आपतुः । आप्ता । आपत् ॥ शक्लृ शक्तौ । शक्नोति । शशाक, शेकतुः । शक्ता । अशकत् ॥ राध साध संसिद्धौ ॥ राध्नोति, राध्नुवन्ति ॥ राधो हिंसायामेत्वपूर्वलोपौ किति लिटि सेटि थपि च ॥ रराध, रेधतुः । रेधिथ । अरात्सीत् । ञिधृषा प्रागल्भ्ये ॥ धृष्णोति । दधर्ष । अधर्षीत् ॥ दम्भु दम्भे ॥ दभ्नोति ॥ श्रन्थिग्रन्थिदम्भिभ्यो लिटः कित्त्वं वा ॥ दम्भेर्लिं-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

टचेत्वपूर्वलोपौ ॥ ददम्भ, देभतुः—ददम्भतुः, देभिथ—ददंभिथ । अदम्भीत् ॥ ऋधु वृद्धौ ॥ आनर्ध ॥ " नुगशाम् ॥ " आनृधतुः । अर्धिता ॥ क्षि हिंसायाम् ॥ क्षिणोति, क्षिण्वन्ति । क्षेता ॥ इति पम् ॥

अशूङ् व्याप्तौ संघाते च ॥ अश्नुते ॥ " नुगशाम् " ॥ आनशे । अशिषीष्ट—अक्षीष्ट । अशिता—अष्टा । आशिष्ट, आक्षाताम् ॥ ष्टिघ आस्कन्दने ॥ स्तिघ्नुते,स्तिघ्नुवाते । तिष्टिघिध्वे । अस्तेघिष्ट ॥इत्यात् ॥ इति स्वादयः ॥

अथ रुधादयः ।

रुधिरावरणे ॥ रुधादेर्नम् ॥ कर्तारि चतुर्षु ॥ रुणद्धि ॥ " नमसोऽस्य " ॥ रुन्द्धः, रुन्धन्ति । रुणत्सि । रुन्द्धे, रुन्धाते । अरुधत्—अरौत्सीत् । अरुद्ध ॥ भिदिर् विदारणे ॥ अभिदत्—अभैत्सीत् । अभित्त ॥ छिदिर् द्वैधीकरणे ॥ अच्छिदत्—अच्छैत्सीत् । अच्छित्त ॥ रिचिर् विरेचने ॥ रिणक्ति । अरिणक्—अरिणग् । अरिचत्—अरैक्षीत् । अरिक्त ॥ विचिर् पृथग्भावे ॥ विङ्क्ते । अविचत्—अवैक्षीत् । अविक्त ॥ क्षुदिर् संपेषणे ॥ अक्षुदत्—अक्षौत्सीत् । अक्षुत्त ॥ युजिर् योगे । अयुजत्—अयौक्षीत् । अयुक्त ॥ उछृदिर् दीप्तिदेवनयोः ॥ छृणत्ति । छृन्ते । "नृततृद "इति वेट् । छृत्सीष्ट—छर्दिषीष्ट । अच्छृदत्—अच्छर्दीत् । अच्छर्दिष्ट ॥ उतृदिर् हिंसानादरयोः ॥ अतृदत्—अतर्दीत् ॥ इत्युभयपदप्रक्रिया ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

शिष्लृ विशेषणे ॥ शिनष्टि, शिंष्टः, शिंषन्ति । शेष्टा । शेक्ष्यति । अशिषत् ॥ पिष्लृ संचूर्णने ॥ पिनष्टि । पेक्ष्यति । अपिषत् ॥ भञ्जो आमर्दने ॥ भनक्ति । बभञ्जिथ–बभङ्क्थ । भङ्क्ता । अभाङ्क्षीत् ॥ भुज पालनाभ्यवहारयोः॥ भुनक्ति, भुङ्क्तः। अभुनक्–अभुनग् । अभौक्षीत् ॥ तृह हिंसि हिंसायाम् ॥ तृहो नामि कृते इमागमः पिति हसे ॥ तृणेढि । अतृणेट् । अतर्हीत् । “ इदितो नुम् ” नमः ॥ नम्प्रत्ययात् परस्य नस्य लोपः ॥ हिनस्ति, हिंस्तः, हिंसन्ति ॥ “ धे सलोपः” ॥ हिन्धि । अहिनः। जिहिंस । अहिंसीत् ॥ उन्दी क्लेदने ॥ उनत्ति, उन्तः, उन्दन्ति । औनत् । औन्दन् । उन्दांचकार । औन्दीत् ॥ अञ्जू व्यक्तिम्रक्षणकान्तिगतिषु ॥ अनक्ति । “ नुगशाम्” “ ऊदितो वा ॥ ” आनञ्जिथ–आनङ्क्थ । अञ्जिता–अङ्क्ता ॥ अञ्जेः सेर्नित्यमिट् ॥ आञ्जीत् ॥ तञ्चू संकोचने ॥ तनक्ति । अतञ्चीत् । अताङ्क्षीत् ॥ ओविजी भयचलनयोः ॥ विनक्ति ॥ विजेरिडादिप्रत्ययो ङित् ॥ विविजिथ । विजिता । अविजीत् ॥ वृजी वर्जने । वृणक्ति । अवर्जीत् ॥ पृची संपर्के ॥ पृणक्ति । अपर्चीत् ॥ इति पम् ॥

ञिइन्धी दीप्तौ ॥ इन्धे । इन्धीत । ऐन्द्ध । इन्धांचक्रे । ऐन्धिष्ट ॥ खिद दैन्ये ॥ खिन्ते । खित्सीष्ट । अखित्त ॥ विद विचारणे ॥ विन्ते । वित्सीष्ट । अवित्त ॥ इति रुधादयः ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

अथ तनादयः ।

तनु विस्तारे ॥ तनादेरुप् ॥ कर्तरि चतुर्षु ॥ " नूपः " ॥ तनोति, तनुतः, तन्वन्ति ॥ " ओर्म्वोर्वा लोपः " ॥ तनुवः—तन्वः । तनुते । ततान, तेनतुः । तेने । अतानीत्—अतनीत् ॥ तनादेस्त-थासोर्वा सेर्लुक् ॥ "लोपस्त्वनुदात्ततनाम्"॥ अतत—अतनिष्ट । अत-थाः—अतनिष्ठाः ॥ षणु दाने ॥ सनोति । सनुते । सेनतुः । सेने । " जनसनखनामात्वम् " ॥ सायात्—सन्यात् । असात—अस-निष्ट । असाथाः—असनिष्ठाः ॥ क्षणु क्षिणु हिंसायाम् ॥ क्षणोति । " ह्म्यन्तक्षण " इति न वृद्धिः । अक्षणीत् । अक्षत—अक्षणिष्ट । अक्षथाः—अक्षणिष्ठाः ॥ तनादेरुपधाया गुणो वोपि ॥ क्षिणोति—क्षेणोति । अक्षेणीत् । अक्षित—अक्षेणिष्ट । अक्षिथाः—अक्षेणिष्ठाः ॥ ऋणु गतौ ॥ ऋणोति—अर्णोति । ऋणुतः । आनर्ण । आनृणे । आर्णीत् । आर्त—आर्णिष्ट, आर्थाः—आर्णिष्ठाः ॥ तृणु अदने ॥ तृणो-ति—तर्णोति । तृणुते—तर्णुते । अतर्णीत् । अतृत—अतर्णिष्ट । अतृ-थाः—अतर्णिष्ठाः ॥ घृणु दीप्तौ ॥ घृणोति—घर्णोति । जघर्ण । अघ-र्णीत् । अघृत, अघर्णिष्ट । अघृथाः, अघर्णिष्ठाः ॥ डुकृञ् करणे ॥ करोति ॥ " ङित्यदुः " कुरुतः ॥ कुरुच्छुरोर्न दीर्घः ॥ कुर्वन्ति ॥ कृञो नित्यं वमोरुलोपः ॥ कुर्वः, कुर्मः ॥ कृञो ये ॥ कृञ उप्रत्ययस्य लोपो यि ॥ कुर्यात् । चकर्थ । कादेर्नेट् । क्रियात् । कृषीष्ट । अकार्षीत् । अकृत, अकृथाः ॥ संपर्युपेभ्यः करोतेर्भू-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

षणे सुट् ॥ संस्करोति । " अड्द्वित्वव्यवधानेऽपि कात्पूर्वः सुट् " ॥ समस्करोत् । संचस्कार ॥ ससुटः कृञो लिट इट् ॥ संचस्करिथ । संचस्करिव । संस्क्रियात् । संस्कृषीष्ट । एवं परिष्कुरुते । उपस्कुरुते । परिष्करिष्यते । पर्यस्कार्षीत्–पर्यष्कार्षीत् ॥ इत्यात्पे ॥

वनु याचने ॥ वनुते । ववने । परस्मैपद्ययमित्येके । वनोति । 'शसदद्" इति । ववान, ववनिथ । अवानीत्–अवनीत् ॥ मनु अवबोधने ॥ मनुते । मेने । मनिषीष्ट । अमत–अमनिष्ट ॥ इति तनादयः ॥

अथ तुदादयः ।

तुद व्यथने ॥ तुदादेरः ॥ कर्तरि चतुर्षु ॥ तुदति । तुदते । तुत्सीष्ट । अतौत्सीत्–अतुत्त ॥ णुद प्रेरणे ॥ नुदति । नुत्सीष्ट । अनौत्सीत् ॥ अनुत्त ॥ दिश अतिसर्जने ॥ दिशति । दिक्षीष्ट । अदिक्षत् । भ्रस्ज पाके । ॥ " ग्रहां क्ङिति च " ॥ " झवे जबाः ॥ " भृज्जते ॥ भ्रस्जो रसो रमनापि वा ॥ बभर्ज–बभ्रज्ज । बभर्जतुः-बभ्रज्जतुः । बभर्जिथ–बभ्रज्जिथ–बभर्ष्ठ–बभ्रष्ठ । "स्वरान्तादत्वतश्च"॥ इति वेट् ॥ क्ङिति संप्रसारणं बाधकम् । भृज्ज्यात् । अभ्राक्षीत्-अभार्क्षीत् । अभ्रष्ट-अभर्ष्ट । क्षिप प्रेरणे ॥ क्षिप्सीष्ट । अक्षैप्सीत्-अक्षिप्त ॥ कृष विलेखने ॥ कृक्षीष्ट । क्रष्टा-कर्ष्टा । अक्राक्षीत्-अकार्क्षीत्-अकृक्षत्, अकृक्षाताम्, अकृक्षन्त ॥ मिल संगमे ॥ मिलति । मिमिले । अमेलीत् । अमेलिष्ट ॥ मुच्लृ मोचने ॥ मुचादेर्मुम् ॥ मुचलुपविदालिपषिचकृत-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

पिषखिदामप्रत्यये मुम् ॥ मुञ्चति । मुक्षीष्ट ॥ " लित्पुषादेर्ङः " ॥ अमुचत् । अमुक्त ॥ लुप्ऌ छेदने ॥ लुम्पति । लुप्सीष्ट । अलुपत् । अलुप्त ॥ विद्ऌ लाभे ॥ विन्दति । अविदत् । अवेदिष्ट । अनिडय-मित्येके । वेत्ता ॥ लिप उपदेहे ॥ लिम्पति । "लिपिसिचि" इति ङः ॥ आलिपत् । अलिपत–अलिप्त ॥ षिच क्षरणे ॥ सिञ्चति । सिषिच्चिषे । असिचत् । असिचत–असिक्त । इत्यात्पे ॥

ऋषी गतौ ॥ ऋषति । आनर्ष ॥ ओव्रश्चू छेदने ॥ वृश्चति । वव्र-श्च, वव्रश्चतुः, वव्रश्चुः । वव्रश्चिथ–वव्रष्ठ । व्रश्चिता–व्रष्टा । व्रश्चिष्य-ति–व्रक्ष्यति । अव्रश्चीत्–अव्राक्षीत्, अव्राष्टाम् ॥ व्यच् व्याजीकरणे ॥ विचति । विव्याच, विविचतुः । विच्यात् । व्यचिता । व्यचिष्यति । अव्याचीत्–अव्यचीत् ॥ उछि उञ्छे ॥ उञ्छति । उञ्छांचकार । औञ्छीत् ॥ उच्छी विवासे ॥ उच्छति । उच्छांचकार । औच्छीत् ॥ ऋच्छ गतीन्द्रियप्रलयमूर्तिभावेषु ॥ ऋच्छति । **ऋच्छेर्नाम् ॥ ऋच्छे-र्लिटि गुणः ॥** "नुगशाम्" ॥ आनर्च्छ, आनर्च्छतुः । ऋच्छिता ॥ उब्ज आर्जवे ॥ उब्जांचकार ॥ उज्झ त्यागे ॥ उज्झांचकार ॥ लुभ विमोहने ॥ लुभति । लोभिता–लोब्धा । अलोभीत् ॥ तृप तृम्प तृफ तृम्फ तृप्तौ ॥ तृपति । अतर्पीत् । **तृम्फादीनामप्रत्यये नुम् ॥** तृम्फति ॥ तुप तुम्प तुफ तुम्फ हिंसायाम् । तुपति । तुतोप । अतो-पीत् । तुम्पति । अतुम्पीत् । तुफति । तुतोफ । अतोफीत् । तुम्फति । तुतुम्फ । अतुम्फीत् ॥ दृप दृम्फ उत्क्लेशे ॥ दृफति । दृम्फति ॥ ऋफ

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

ऋम्फ हिंसायाम् ॥ ऋफति । ऋम्फति । ऋम्फांचकार ॥ गुफ गुम्फ ग्रन्थे । गुफति । गुम्फति । अगुम्फीत् ॥ उभ उम्भ पूरणे ॥ उभति । उवोभ । औभीत् । उम्भति । उम्भांचकार । औम्भीत् ॥ शुभ शुम्भ शोभार्थे ॥ शुभति । अशोभीत् । शुम्भति । अशुम्भीत् ॥ दृभी ग्रन्थे ॥ दृभति । अदर्भीत् ॥ चृती हिंसाग्रन्थनयोः ॥ चृतति ॥ "नृततृदच्चृत" इतीड्वा । चर्तिष्यति–चर्त्स्यति । अचर्तीत् ॥ विध विधाने॥ विधति । वेधिता ॥ लिख अक्षरविन्यासे ॥ लिखति । लेखिता ॥ कुट कौटिल्ये ॥ कुटति । चुकोट ॥ कुटादेर्ङिणद्वर्जः प्रत्ययो ङित् ॥ चुकुटिथ । कुटिता । अकुटीत् ॥ पुट संश्लेषणे ॥ पुटति । पुपोट । अपुटीत् ॥ कुच संकोचने ॥ कुचति । चुकोच । अकुचीत् ॥ गुज शब्दे ॥ गुजति । गुजिता । अगुजीत् ॥ गुड रक्षायाम् ॥ गुडति । गुडिता । अगुडीत् ॥ कुड शब्दे ॥ कुडति । कुडिता ॥ डिप क्षेपे ॥ डिपिता ॥ छुर छेदे । "कुरुछुरोर्न दीर्घः"॥ छुर्यात् । छुरिता ॥ स्फुट विकसने ॥ स्फुटति ॥ मुट आक्षेपप्रमर्दनयोः॥ मुटति । मुमोट । मुटिता ॥ त्रुट छेदे ॥ त्रुट्यति–त्रुटति । तुत्रोट । त्रुटिता ॥ तुट कलहकर्मणि ॥ तुटति । तुटिता । तुटिष्यति ॥ छुट चुट छेदे ॥ छुटति । छुटिता । चुटिता ॥ जुट ॥ बन्धने ॥ जुटति । जुटिता ॥ कड मदे ॥ कडति । अकडीत् ॥ लुठ संश्लेषणे ॥ लुठति । लुठिता ॥ कृड घनत्वे ॥ कृडिता ॥ कुड बाल्ये ॥ कुडति ॥ पुड उत्सर्गे । पुडिता ॥ घुट प्रतीघाते ॥ घुटिता ॥ स्फुर स्फुरणे ॥ स्फुरिता ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

स्फुल संचलने ॥ स्फुलिता । निर्निर्विभ्यः स्फुरतिस्फुलत्योः सस्य षो वा ॥ निष्ष्फुरति–निस्स्फुरति–निस्फुरति–निष्फुरति–निःष्फुरति–निःस्फुरति ॥ निःष्फुलति–निःस्फुलति–निष्फुलति–निस्फुलति–निस्स्फुलति–निष्ष्फुलति ॥ णू स्तवने ॥ अनुवीत् । धू विधूनने ॥ अधुवीत् ॥ गु पुरीषोत्सर्गे ॥ जुगुविथ–जुगुथ । गूयात् । गुता ॥ ध्रु गतिस्थैर्ययोः ॥ ध्रुता । अध्रुषीत् ॥ इति कुटादयः॥ कृती छेदने ॥ "मुचादेर्नुम् ॥ " कृन्तति ॥ "नृततृदचृतछृदकृद्भ्योऽसेः सादेरिङ्वा" कर्तिष्यति–कर्त्स्यति । अकर्तीत् ॥ गॄ निगरणे ॥ गिरतेः स्वरे रस्य लो वा ॥ "ॠत इर् ॥" गिरति–गिलति । गरिता–गरीता–गलिता–गलीता ॥ अगारीत्–अगालीत् ॥ स्पृश स्पर्शने ॥ स्प्रष्टा–स्पर्ष्टा । अस्प्राक्षीत्-अस्पार्क्षीत्-अस्पृक्षत् ॥ प्रच्छ ज्ञीप्सायाम् ॥"ग्रहां क्ङिति च" ॥ पृच्छति । पप्रच्छिथ–पप्रष्ठ । अप्राक्षीत् ॥ सृज विसर्गे ॥ सृजति । "सृजिदृशोस्थपो वेट्" ससर्जिथ–सस्रष्ठ । स्रष्टा । अस्राक्षीत् ॥ टुमस्जो शुद्धौ ॥ मज्जति ॥ "मस्जिनशोर्झसे नुम् ॥ " ममज्जिथ-ममङ्क्थ । मङ्क्ता । अमाङ्क्षीत् ॥ विच्छ गतौ ॥ " आयः " ॥ विच्छायति । विच्छायांचकार–विविच्छ ॥ इषु इच्छायाम् ॥ " गमां छः ॥ " इच्छति । इच्छेत् । इच्छतु । ऐच्छत् । इयेष । इयेषिथ । एषिता–एष्टा । ऐषीत् ॥ विश प्रवेशने॥ वेष्टा । अविक्षत् ॥ मृश आमर्शने ॥ अम्राक्षीत्–अमार्क्षीत्–अमृक्षत् ॥ रि पि गतौ ॥ रियति । पियति । रेता । पेता ॥ धि धारणे ॥ धियति ॥ क्षि निवास-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

गत्योः ॥ क्षियति ॥ षु प्रेरणे ॥ सुवति । सविता ॥ कॄ विक्षेपे ॥ किरति । चकार, चकरतुः, चकरुः ॥ **उपात् किरतेः सुट् छेदेऽर्थे ॥ हिंसायां प्रतेश्च ॥** उपस्किरति । प्रत्यस्किरत् ॥ रुजो भङ्गे ॥ अरौक्षीत्, अरौक्ताम् ॥ भुजो कौटिल्ये ॥ भोक्ता । अभौक्षीत्, अभौक्ताम् ॥ छुप स्पर्शे ॥ छोप्ता । अच्छौप्सीत् ॥ रुश रिश हिंसायाम् ॥ रोष्टा,रोष्टारौ । अरुक्षत् । रेष्टा । अरिक्षत् ॥ लिश गतौ । लेष्टा । अलिक्षत् ॥ खिद परिघाते ॥ "मुचादेर्मुम् ॥" खिन्दति । खेत्ता । अखैत्सीत् ॥ पिश अवयवे ॥ पिंशति । पेशिता ॥ इति पम् ॥

जुषी प्रीतिसेवनयोः॥ जुषते ॥ ओविजी भयचलनयोः ॥ विजते ॥ **विज इट् ॥** विजेः पर इडादिप्रत्ययो ङित् ॥ विजिता ॥ ओलजी ओलस्जी व्रीडे ॥ लेजे–ललज्जे ॥ पृङ् व्यायामे ॥ **अयङ्कि ॥** ऋतो रिङ् भवत्यकारे प्रत्यये यकि च ॥ " नुधातोः ॥" व्याप्रियते । व्यापरिष्यते । व्यापृत, व्यापृषाताम् ॥ मृङ् प्राणोत्सर्गे ॥ **म्रियतेर्लुङ्लिङोश्चतुर्ष्वेवात् ॥** म्रियते । ममार । ममर्थ । मृषीष्ट । अमृत ॥ दृङ् आदरे । आद्रियते । आदद्रे । आदृषीष्ट । आदर्ता । आदृत ॥ धृङ् अवस्थाने ॥ ध्रियते । अध्रियत ॥ " लोपो ह्रस्वाज्झसे " ॥ अधृत ॥ इति तुदादयः ॥

अथ क्र्यादयः ।

डुक्रीञ् द्रव्यविनिमये ॥ **ना क्र्यादेः ॥** कर्तरि चतुर्षु ॥ क्रीणाति । **ई हसे ॥** ना इत्यस्याकारस्य ई ङिति हसे ॥ क्रीणीतः ॥ **नातः ॥**

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

ना इस्यस्याकारस्य लोपो ङिति स्वरे॥ क्रीणन्ति। क्रीणीते। चिक्रयिथ-चिक्रेथ। अक्रैषीत्। अक्रेष्ट। प्रीञ् तर्पणे कान्तौ च॥ पिप्रिये॥ श्रीञ् पाके॥ अश्रैषीत्॥ मीञ् हिंसायाम्॥ "मीनातिमिनोति" इत्यात्वम्। ममौ, मिम्यतुः। ममिथ—ममाथ। मासीष्ट। माता। अमासीत्॥ स्कुञ् आप्लवने॥ स्तन्भुस्तुन्भुस्कन्भुस्कुन्भुस्कुञ्भ्यो श्नुर्ना च॥ स्कुनोति, स्कुन्वन्ति। स्कुन्वीत। स्कुनुताम्। स्कुनाति। अस्कुनीत। चुस्कुविषे। अस्कौषीत्। अस्कोष्ट॥ स्तुन्भु[1] स्कन्भु[1] रोधने॥ एते परस्मैपदिनः। वेः स्तम्भादीनां सस्य षः स्यात्। विष्टभ्नोति॥ विष्टभ्नाति। व्यष्टभ्नात्। वितष्टम्भ, वितष्टम्भतुः। विष्कभ्नोति॥ हसादान हौ॥ हसान्ताद्धातोर्नास्थाने आनः स्याद्धौ परे। स्तुभान। स्कभान। अस्तभत्—अस्तम्भीत्॥ युञ् बन्धने॥ युनाति॥ योता॥ पूञ् पवने॥ प्वादेर्ह्रस्वः॥ कर्तरि चतुर्षु॥ पुनाति। अपावीत्॥ लूञ् छेदने॥ लुनाति। अलावीत्। स्तॄञ् आच्छादने। स्तृणाति। तस्तार, तस्तरतुः। स्तीर्यात्। स्तरिषीष्ट—स्तीर्षीष्ट। अस्तारीत्। अस्तारिष्ट—अस्तीर्ष्ट॥ कॄञ् हिंसायाम्। कृणाति। चकरे। कारिषीष्ट—कीर्षीष्ट। अकरिष्ट—अकरीष्ट—अकीर्ष्ट। "पे सेरिटो न दीर्घः"॥ "सीष्टादेश्च"॥ वॄञ् वरणे॥ वृणोति। वूर्यात्। वरिषीष्ट—वूर्षीष्ट अवरीष्ट—अवूर्ष्ट॥ धूञ् कम्पने॥ धुनाति। दुधविथ—दुधोथ।

---

१ 'स्तन्भु' इति पाठान्तरम्। 'स्कुन्भु' इति पाठान्तरम्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

धविता–धोता । अधावीत् । अधविष्ट–अधोष्ट ॥ ग्रह उपादाने ॥ गृह्णाति । गृहाण । जग्राह, जगृहतुः। ग्रहीषीष्ट । ग्रहीता ॥ अग्रहीत् । अग्रहीष्ट ॥ इत्यात्मे ॥

शॄ हिंसायाम् । शृणाति । शॄदॄप्रां ह्रस्वो वा लिटि किति ॥ शशरतुः–शश्रतुः । शीर्यात् । शरीता–शरिता ॥ पॄ पालनपूरणयोः ॥ पृणाति । पपरतुः । पूर्यात् ॥ वॄ वरणे ॥ वृणाति । ववरतुः ॥ वूर्यात् । भॄ भर्त्सनभरणयोः ॥ भृणाति ॥ मॄ हिंसायाम् । मृणाति ॥ दॄ विदारणे ॥ दृणाति ॥ ददरतुः–दद्रतुः ॥ जॄ वयोहानौ ॥ जृणाति ॥ नॄ नये ॥ नृणाति ॥

कॄ हिंसायाम् ॥ कृणाति । ऋ गतौ ॥ ऋणाति । अरांचकार । ईर्यात् । अरिता । अरीता । आरीत् । गॄ शब्दे ॥ गृणाति ॥ ज्या वयोहनौ ॥ "ग्रहां क्ङिति च ॥" जिनाति । जिज्यौ, जिज्यतुः । जीयात् । अज्यासीत् । री गतिरेषणयोः । रिणाति । रिर्यतुः । ली श्लेषणे ॥ लिनाति । ललौ–लिलाय, लिल्यतुः । ललिथ–ललाथ–लिलयिथ–लिलेथ । लाता–लेता । अलैषीत्–अलासीत् ॥ व्ली वरणे ॥ व्लिनाति ॥ प्ली गतौ । प्लिनाति ॥ इति प्वादयः ॥

व्री वरणे ॥ व्रीणाति ॥ भ्री भयभरणयोः ॥ भ्रीणाति ॥ क्षीष् हिंसायाम् ॥ एषां त्रयाणां वा ह्रस्वः ॥ ज्ञा अवबोधने ॥ "ज्ञाजनोर्जा" ॥ जानाति । जज्ञौ । ज्ञायात्–ज्ञेयात् । अज्ञासीत् ॥ बन्ध बन्धने ॥ बध्नाति । बबन्ध । बबन्धिथ । बन्द्धा । भन्त्स्यति । अभा-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

न्सीत् । सकारलोप आदेश इति न तु मात्रविधौ । तेन अबान्धाम् ॥ मन्थ विलोडने ॥ मथ्नाति । मथान ॥ श्रन्थ ग्रन्थ संदर्भे । श्रथ्नाति । शश्रन्थ । जग्रन्थ । श्रन्थिग्रन्थीत्यादीनां वा लिटः कित्त्वम् । शश्राथ । जग्राथ ॥ कुथ कुन्थ संश्लेषणसंक्लेशनयोः ॥ चुकोथ । चुकुन्थ । मृद मृड क्षोदे । मृदान । मृडान । गुध रोषे । गुध्नाति । कुष निष्कर्षे ॥ कुषाण ॥ निरः कुषो वसादेरनपीड्डा ॥ निष्कोषिता—निष्कोष्टा । निरकोषीत्—निरकुक्षत् ॥ क्षुभ् संचलने ॥ "क्षुभ्नादिषु न णत्वम्" । क्षुभान ॥ णभ तुभ हिंसायाम् । नभान । तुभान । क्लिश विबाधने । क्लिश्नाति । अक्लेशीत्—अक्लिक्षत् ॥ अश भोजने ॥ अश्नाति । आशीत् । उध्रस—उञ्छे ॥ ध्रस्नाति । उकारो धात्ववयव इत्येके । उध्रसांचकार । औध्रासीत्—औध्रसीत् ॥ विष विप्रयोगे ॥ विषाण ॥ वेष्टा । अवक्षित ॥ पुष पुष्टौ ॥ पोषिता ॥ मुष् स्तेये ॥ खच् खव् हिठ भूतप्रादुर्भावे ॥ खच्नाति ॥ खवो वस्य औ ने ॥ खौनाति । हिठ्णाति ॥ इति पम् ॥

वृङ् । संभक्तौ । वृणीते । वव्रे । वारिषीष्ट-वृषीष्ट । अवरिष्ट-अवृत । इति क्र्यादयः ॥

अथ चुरादयः ।

चुर स्तेये ॥ चुरादेः स्वार्थे ञिः । चोरयति । चोरयेत् । चोरयांचकार । चोर्यात् । अचूचुरत् ॥ चिति स्मृत्याम् ॥ चिन्तयति । अचिचिन्तत् । चुरादेर्णिर्वेति केचित् । चिन्तति ॥ यत्रि सङ्कोचने ॥ यन्त्रयति । अययन्त्रत् ॥ ओलडि उत्क्षेपे ॥ ओलण्डयति । ओलण्डति । ओलण्डाञ्चकार । औललण्डत् ॥ औलण्डीत् ॥ ओकार

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

इदित्येके। लण्डयति। अललण्डत्। लण्डति॥ पीड अवगाहे। पीडयति। पीडयते। पीडयांचक्रे॥ भ्राजभासभाषदीपजीवमीलपीडां वोपधाया ह्रस्वोऽङ्परे ञौ॥ अपिपीडत्--अपीपिडत्॥ प्रथ् प्रख्याने॥ प्राथयति॥ स्मृदृत्वरप्रथम्रदस्तॄस्पशां पूर्वस्यादङ्परे ञौ॥ इत्वापवादः॥ अपप्रथत्॥ पृथ प्रक्षेपे। पर्थयति॥ उपधाया ऋवर्णस्य ऋद्वाऽङ्परे ञौ॥ इररारामपवादः॥ अपीपृथत्-अपपर्थत्। भक्ष अदने॥ अबभक्षत्। श्रण दाने॥ विश्राणयति। अशिश्रणत्। अशश्राणत्॥ तड आघाते॥ अतीतडत्॥ ज्ञप ज्ञानज्ञापनयोर्मित् मितां ह्रस्वः॥ मितां धातूनामुपधाया ह्रस्वो ञौ। ज्ञपयति। अजिज्ञपत्॥ यम वेष्टने वित्॥ यमयति। अयीयमत्॥ चह चप परिकल्कने मित्। चहयति। अचीचहत्। चपयति। अचीचपत्॥ रह त्यागे मित्। रहयति। अरीरहत्॥ बल प्राणने मित्॥ बलयति अबीबलत्॥ चिञ् चयने मित्॥ चिस्फुरोर्ञौवात्वं वा॥ रातो ञौ पुक्॥ ऋधातोरादन्तस्य च पुक् ञौ॥ चपयति। अचीचपत्॥ चययति अचीचयत्। स्वार्थे ञौ ज्ञपादिभ्योऽन्ये मितो न॥ कॄत संशब्दने॥ धातोरुपधाया ऋत इर्॥ कीर्तयति। अचीकृतत्--अचिकीर्तत्॥ आकुस्मादात्मनेपादिनः॥ चित् संचेतने। चेतयते। अचीचितत॥ दांशि दशने॥ दंशयते। अददंशत। आकुस्मीयमात्मनेपदं ञिसन्नियोगेनैव। दंशति। नलोपो न, साञ्जिसाहचर्यात् भ्वादेरेव तत्र ग्रहणात्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

तत्रि कुटुम्बधारणे ॥ तन्त्रयते । कुटुम्बयते । अततन्त्रत । अचुकुटुम्बत ॥ मात्रि गुप्तभाषणे ॥ मन्त्रयते ॥ शम् लक्ष आलोचने ॥ शामयते ॥ लक्षयते । अशीशमत । अललक्षत ॥ दिवु परिकूजने ॥ देवयते ॥ गॄ विज्ञाने ॥ गारयते । अजीगरत ॥ विद चेतनाख्याननिवासेषु ॥ वेदयते । अवीविदत ॥ कुस्मनाम्नो वा ॥ कुस्मेति धातुः कुत्सितस्मयने ॥ अथवा कुस्मेति नाम । ततो णिः । कुस्मयते । अचुकुस्मत ॥ कण निमीलने ॥ काणयति । अचीकणत्-अचकाणत् ॥ नवगण्यासुक्तेभ्यो हिंसार्थेभ्यः स्वार्थे णिः ॥ हिसि हिंसायाम् ॥ हिंसयति ॥ ज्ञा नियोगे ॥ आज्ञापयति । अजिज्ञपत् ॥ भू मिश्रीकरणचिन्तनयोः ॥ भावयति । अबीभवत् ॥ लोकृ लोचृ परिभाषणे ॥ न रितः ॥ ऋदितः शासेश्चाङ्चुपधाया ह्रस्वो न ॥ अलुलोकत् । अलुलोचत् ॥ धूञ् कम्पने ॥ धूञ्प्रीञोर्नुक्णौ ॥ धूनयति । अदुधूनत् ॥ प्रीञ् तर्पणे ॥ प्रीणयति । अपिप्रीणत् ॥

अथादन्ताः ॥ कथ वाक्यप्रबन्धने ॥ "यतः" ॥ अल्लोपस्य स्थानिवत्त्वेन न वृद्धिः । कथयति ॥ अग्वृलोपिनो नाङ्कार्यम् ॥ अचकथत् ॥ वर ईप्सायाम् ॥ वरयति । अववरत् ॥ गण संख्याने ॥ गणयति । गणेः पूर्वस्य ईद्वाऽङ्परे णौ ॥ अजीगणत् ॥ स्तनगदी देवशब्दे ॥ स्तनयति । गदयति । अतस्तनत् ॥ अजगदत् ॥ पत गतौ ॥ वा ण्यन्तः । पतयति—पतति । पतयांचकार—पतयाञ्चकार । अपपतत्—अपतीत् । वाऽदन्त इत्येके । पातयति । अपीपतत् ॥ रच प्रति-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

यत्ने ॥ रचयति ॥ सूत्र वेष्टने ॥ सूत्रयति । असुसूत्रत् ॥ मूत्र प्रस्रवणे ॥ मूत्रयति ॥ कल गतौ संख्याने च ॥ कलयति ॥ स्पृह ईप्सायां च ॥ स्पृहयति । अपस्पृहत् ॥ भाम क्रोधे ॥ भामयति । अबभामत् ॥ सूच पैशुन्ये ॥ सूचयति । ऊन परिहाणौ ॥ ऊनयति । ञिनिमित्तः स्वरादेशो द्वित्वे कर्तव्ये स्थानिवत् । औननत् ॥ अर्थङ् याचने ॥ अर्थयते । आर्तथत ॥ संग्राम युद्धे ॥ अससंग्रामत ॥ अन्ध दृष्ट्युपघाते ॥ अन्धयते । अन्धयति । आन्दधत् । अङ्क अङ्ग पदे लक्षणे च आञ्चकत्–आञ्जगत् ॥ इति चुरादयः ॥

अथ ण्यन्तप्रक्रिया ।

धातोः प्रेरणे ॥ धातोः प्रयोजकव्यापारेऽर्थे ञिप्रत्ययः ॥ भवन्तं प्रेरयति भावयति । भावयते । भावयांचकार ॥ अङ्कसयोः पूर्वस्योकारस्येत्वं पवर्गयलजकारेष्ववर्णपरेषु परतः ॥ अबीभवत् ॥ मावयति । अमीमवत् ॥ यावयति । अयीयवत् ॥ अरीरवत् । लावयति । अलीलवत् । अजीजवत् ॥ स्रवतिशृणोतिद्रवतिप्लवतिप्रवतिच्यवतीनामङ्कसयोः पूर्वस्येत्वं वाऽवर्णपरे धात्वक्षरे ॥ असिस्रवत्–असुस्रवत् । अशिश्रवत्–अशुश्रवत् । अदिद्रवत्–अदुद्रवत् । अपिप्रवत्–अपुप्रवत् । अपिप्लवत्–अपुप्लवत् । अचिच्च्यवत्–अचुच्च्यवत् ॥ "न रितः ॥" अशशासत् । अडुढौकत् ॥ ण्यन्तात् ञिः ॥ चोरयति । अचूचुरत् ॥ हनो घत् ॥ हन्तेर्घदादेश इण्वर्जिते ञ्णिति॥ घातयति–अजीघतत् ॥ शदेरगतौ तो ञौ ॥ शातयति । अशी-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

शतत् । गतौ तु गाः शादयति गोविन्दः । अशीशदत् । "रातो र्णौ पुक्" ॥ पुकि गुणः ॥ अर्पयति । आर्पिपत् । दापयति । अदीदपत् । धापयति । अदीधपत् । स्थापयति । तिष्ठतेरङ्चुपधाया इत् ॥ अतिष्ठिपत् ॥ पादेर्युक् ॥ पाशोच्छोसोह्वेञ्व्येञ्वेञां युक् णौ पुकोऽपवादः ॥ पाययति ॥ पिबतेरङि पूर्वस्येकार उपधालोपश्च ॥ अपीप्यत् । शाययति । अशीशयत् । छाययति । अचिच्छयत् । साययति । असीषयत् । ह्वाययति । ह्वयतेर्ण्यन्तस्याङ्सयोः संप्रसारणं युगभावश्च ॥ अजूहवत् । अजुहावत् । व्याययति । अविव्ययत् । वाययति । अवीवयत् । पातेर्णौ लुक् ॥ पालयति । अपीपलत् ॥ प्रयोजकात्स्मये णौ स्मयतेरात्-मुं ॥ भीस्मिभ्यां ण्यन्ताभ्यामात् प्रयोजकाच्चेद्भयस्मयौ ॥ जटिलो विस्मापयते । व्यसिष्मपत् । भियः स्वरस्यात्वं वा तदभावे षुक्णौ हेतोश्चेद्भयम् ॥ मुण्डो भापयते—भीषयते । अबीभपत । अबीभिषत ॥ रुहेर्णौ पो वा ॥ रोपयति । अरूरुपत् । रोहयति । अरूरुहत् । कल्पयति । अचीक्लृपत्—अचकल्पत् । वर्तयति । अवीवृतत्—अववर्तत् । मार्जयति । अमीमृजत्—अममार्जत् ॥ इङ्क्रीजीनामात्वं णौ ॥ अध्यापयति । अध्यापिपत् ॥ अङ्सपरे णौ इङो गाङ् वा ॥ अध्यजीगपत् । क्रापयति । अचिक्रपत् । जापयति । अजीजपत् ॥ ह्रीव्लीरीक्नूयीक्ष्मायीणां णौ पुक् ॥ ह्रेपयति । अजिह्रिपत् ॥ व्लेपयति । अविव्लिपत् । रेपयति । अरी-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

रिपत् ॥ यवयोर्वसे हकारे च लोपः ॥ क्नोपयति । अचुक्नुपत् । क्ष्मापयति । अचिक्ष्मपत् ॥ दुषेर्णौ दीर्घः ॥ दूषयति । अदूदुषत् । स्फायो वो णौ ॥ स्फावयति । अपिस्फवत् ॥ अड्ड उद्यमे ॥ अड्डयति । आड्डिडत् ॥ अर्च पूजायाम् ॥ अर्चयति । आर्चिचत् ॥ उन्दी क्लेदने । उन्दयति । औन्दिदत् ॥ उब्ज आर्जवे ॥ उब्जयति । औब्जिजत् । द्रापयति । अदिद्रपत् ॥ रभिलभोः स्वरे नुम् नत्वश्लिटोः ॥ रम्भयति । अररम्भत् ॥ डुलभष् प्राप्तौ । लम्भयति । लम्भयते । अललम्भत् । हापयति । हापयते । अजीहपत् । स्मारयति । स्मारयते । असस्मरत् । दारयति । दारयते । अददरत् । वष्टिचेष्टचोः पूर्वस्यात्वं वाऽङि ॥ अविवेष्टत्–अववेष्टत् । अचिचेष्टत्–अचचेष्टत् ॥ भाजृ दीप्तौ ॥ भ्राजयति । भ्राजयते । अबिभ्रजत्–अबभ्राजत् ॥ कणरणभणश्रणलुपहेठिह्वेञ्वाणिलोटिलोठिलोपीनां वा ह्रस्वोऽङि ॥ अचीकणत्–अचकाणत् । व्यशिश्रणत् । व्यशिश्राणत् । अलूलुपत्–अलुलोपत् । अजीहिठत्–अजिहेठत् । अजूहवत्–अजुहावत् । अवीवणत्–अववाणत् । अलूलुटत्–अलुलोटत् ॥ अलूलुठत-अलुलोठत् ॥ स्वापेः संप्रसारणमाङि ॥ असूषुपत् ॥ श्वयतेर्ण्यन्तस्य संप्रसारणं वाऽङ्सयोः ॥ अशिश्वयत्, अशूशवत् ॥ जिघ्रतेरुपधाया इद्वाऽङि ॥ अजिघ्रिपत्–अजिघ्रपत् ॥ सिध्यतेरैहलौकिकेऽर्थे स्वरस्यात्वं णौ ॥ अन्नं साधयति । असीषधत् । अन्यत्र तपः सेधयति । असीषिधत् ॥ प्रजने वीयतेरात्वं

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

वा ञौ ॥ वापयति—वाययति वा गाः पुरोवातः । गर्भं ग्राहयतीत्यर्थः ॥ चित्तविरागे दुषेर्दीर्घो वा ञौ ॥ चित्तं दूषयति—दोषयति वा कामः ॥ इणो ञौ वा गमिरबोधने ॥ गमयति । अजीगमत् । आययति । आयियत् ॥ "घटादयो मितः ॥" घट चेष्टायाम् ॥ "मितां ह्रस्वः" घटयति । व्यथयति । अविव्यथत् । प्रथयति । अपप्रथत् ॥ प्रस विस्तारे ॥ प्रसयति ॥ म्रद मर्दने ॥ म्रदयति । अमम्रदत् ॥ स्खद विद्रावणे ॥ स्खदयति । अचिस्खदत् । त्वरयति । अतत्वरत् ॥ ज्वर रोगे ॥ ज्वरयति ॥ नट नृत्तौ ॥ नटयति । अनीनटत् ॥ चक तृप्तौ ॥ चकयति ॥ लगे सङ्गे ॥ लगयति ॥ ज्वल दीप्तौ ॥ प्रज्वलयति ॥ स्मृ आध्याने ॥ स्मरयति । असस्मरत् ॥ दॄ भये ॥ दरयति । अददरत् । नॄ नये ॥ नरयति । अनीनरत् ॥ श्रा पाके ॥ श्रपयति । अशिश्रपत् ॥ मारणतोषणनिशामनेषु ज्ञा ॥ ज्ञपयति ॥ कम्पने चलिः ॥ चलयति शाखां वायुः । अन्यत्र शीलं चालयति ॥ मदी हर्षदैन्ययोः ॥ मदयति । हर्षदैन्ययोः किम् । मादयति ॥ ध्वन शब्दे ॥ मित् । ध्वनयति । अदिध्वनत् ॥ जनीजॄष्क्नसुरञ्जोऽमन्ताश्च ॥ जनयति ॥ जरयति ॥ क्नसु कौटिल्ये दीप्तौ च ॥ क्नसयति ॥ रञ्जेर्णौ मृगरमणे नलोपः ॥ रजयति मृगान् । अरीरजत् । अन्यत्र वस्त्रं रञ्जयति । अररञ्जत् । शमयति । दमयति ॥ ज्वलह्वलह्मलनमामनुपसर्गाद्वा ॥ ज्वलयति—ज्वालयति ॥ ह्वल ह्मल चलने ॥ ह्वलयति—ह्वालयति । ह्मलयति—ह्मालयति । नमयति—नामयति । उपसर्गे तु

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

प्रह्ललयति ॥ ग्लास्नावनुवमां च ॥ ग्लपयति—ग्लापयति । स्नपयति-स्नापयति । वनयति-वानयति । वमयति-वामयति ॥ न कम्यमिचमाम् ॥ कामयति ॥ अम गत्याम् ॥ आमयति । आमिमत् । चामयति ॥ शाम्यतिर्दर्शने मिन्न ॥ निशामयति रूपम् ॥ यच्छतिर्भोजनतोऽन्यत्र मिन्न ॥ आयामयति । भोजने तु यमयति विप्रान् । स्खदिरवपरिभ्यां मिन्न ॥ अवस्खादयति । परिस्खादयति । ईर्ष्य अक्षान्तौ । ईर्ष्ययति ॥ ईर्ष्यतेस्तृतीयो द्विस्तृतीयो हस एकस्वरो वा ॥ ऐर्ष्यियत् । आङि तु "स्वरादेः परः" ॥ ऐर्षिष्यत् । द्वितीयपक्षे सान्ते । ईर्ष्यिषिषति । तृतीय एकस्वरपक्षे सान्ते प्रवर्त्तते । ञ्यन्ते तु तृतीय एकस्वराभावादित्यर्थः ॥ इति ञ्यन्तप्रक्रिया ॥

अथ सान्तप्रक्रिया ।

इच्छायामात्मनः सः ॥ धातोरात्मन इच्छायामर्थे सप्रत्ययो भवति द्विश्च ॥ आत्मनः भवितुमिच्छति बुभूषति । बुभूषांचकार । अबुभूषीत् ॥ वुः से ॥ उवर्णान्तादृवर्णान्ताद् ग्रहिगुहिभ्यां च परस्य सस्य नेट् ॥ नानिटि से ॥ इड्वर्जिते सप्रत्यये गुणो न ॥ "से दीर्घः" "ऋत इर्" तितीर्षति । जुघुक्षति । चिकीर्षति । चिकीषति । चिचीषति । जिगीषति । "यः से" पिपक्षति । पिपासति । मुमूर्षति ॥ रुदविदमुषग्रहिस्वपिप्रच्छिभ्यः सः कित् ॥ रुरुदिषति । विविदिषति । मुमुषिषति । "हो ढः ॥" "आदिजबानाम्" इति ॥ "षढोः कः से ॥" ग्रह उपादाने ॥ ग्रहीतुमिच्छति

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

जिघृक्षति । सुषुप्सति ॥ कॄगॄधृप्रच्छिभ्यः सस्येट् ॥ चिकरिषति । जिगरिषति—जिगलिषति । दिदरिषते । दिधरिषते । पिपृच्छिषति । अत्तुमिच्छति जिघत्सति ॥ हनिङोः से दीर्घः ॥ जिघांसति । इङः से गम् ॥ सान्तात्पूर्ववत् ॥ अधिजिगांसते ॥ गमेः सस्येड् नात्ति ॥ जिगमिषति ॥ इस्से ॥ अपिद्दाधारभलभशकपतपदमिमीमाङ्मेङां स्वरस्येस् अनिटि से परे पूर्वस्य च लोपः ॥ दित्साति । धित्साति ॥ रभ राभस्ये ॥ "स्फोराद्योश्च" ॥ "खसे चपा झसानाम्" रिप्सते । लिप्सते । शिक्षति । पित्सते ॥ पततनदरिद्राभ्यः सस्येड्वा ॥ पिपतिषति—पिपत्साति । डुमिञ् प्रक्षेपणे ॥ मित्सति । मित्सते । मीञ् हिंसायाम् । मित्साति । मित्सते ॥ मा माने ॥ मित्सति । मेङ् प्रणिदाने । माङ्मेङोः मित्सते ॥ आप्नोतेरात ईः से पूर्वलोपश्च ॥ ईप्सति । अशेरनायो वा ॥ अशेरिच्छायां वाऽनायप्रत्ययः ॥ अशनायति । अशिशिषति । तितनिषति ॥ तनेरानिटि से वा दीर्घः ॥ तितांसति ॥ तितंसति । दिदरिद्रिषति—दिदरिद्रासति ॥ दम्भिज्ञपिभ्यां सस्य वेट् ॥ दम्भु दम्भे ॥ दिदम्भिषति । जिज्ञपयिषति । ज्ञपेः स्वरस्यानिटि से ईत्पूर्वलोपश्च ॥ ज्ञीप्सति ॥ दम्भेरिच्च ॥ धिप्सति—धीप्सति ॥ इवन्तऋधभ्रस्जश्रिस्वृयूर्णुभृसनिभ्यः सस्येड्वा ॥ दिदेविषति ॥ वस्यानिटि से उः । दुद्यूषति । अर्दिधिषति ॥ ऋधेरनिटि से स्वरस्य इर्द्वित्वलोपश्च ॥ ईर्त्सति । बिभ्रजिषति—बिभ-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

र्जिषति–बिभ्रक्षति–बिभर्क्षति । शिश्रयिषति–शिश्रीषति । सिस्वरिषति–सुस्वूर्षति । यियविषति–युयूषति । ऊर्णुनुविषति–ऊर्णुनविषति । ऊर्णुनूषति । बिभरिषति–बुभूर्षति ॥ **स्तौतिण्यन्तयोरेव षे पूर्वात् सस्य षः ॥** तुष्टूषति । साधयितुमिच्छति सिषाधयिषति–सिषेधयिषति । सुष्वापयिषति । स्तौतिण्यन्तयोरिति किम् । सिसनिषति । षे इति किम् । सिषासति । तिष्ठासति ॥ **अनिटि से उपधाया नस्य लोपः ॥** तृंहू हिंसायाम् । तितृंहिषति–तितृक्षति ॥ **इणः से गमबोधने ॥** एतुमिच्छति जिगमिषति । बोधने तु प्रतीषिषति ॥ "इण्वदिकः" । अधिजिगमिषति । बोधने तु अधीषिषति ॥ **इवर्णोवर्णोपधाद्धसादे रसान्ताद्धसान्ताच्च क्त्वासौ सेटौ वा कितौ ॥** दिद्युतिषते–दिद्योतिषते । रुरुचिषते–रुरोचिषते । लिलिखिषति–लिलेखिषति । सिस्निहिषति–सिस्नेहिषति–सिस्निक्षति । **राधो हिंसायामिस् से द्वित्वलोपश्च ॥** रित्सति । अन्यत्र आरिरात्सति गुरुम् ॥ **मुचोऽकर्मकस्य गुणो वा से द्वित्वलोपश्च ॥** मोक्षते–मुमुक्षते वा वत्सः स्वयमेव । अकर्मकस्येति किम् । मुमुक्षति वत्सं कृष्णः । "वृतादिभ्यः स्यसयोर्वा पं पेऽनिट्त्वं च" विवर्तिषते–विवृत्सति । निनर्तिषति–निनृत्सति ॥ **वृङ्वृञ्ऋदन्तात्सस्येड्वा ॥** तितरिषति–तितरीषति–तितीर्षति– । विवरिषते–विवरीषते–वुवूर्षते । विवरिषति–विवरीषति–वुवूर्षति । ध्वृ कौटिल्ये । दुध्वूर्षति । **स्मिङ्पूङ्रञ्ज्वशिभ्यः सस्येट् ॥** सिस्मयिषते । पिपविषते । अरिरिषति।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

अञ्जिजिषति । अशिशिषते । उचिच्छिषति । अधिजिगापयिषति । अध्यापिपयिषति । शिश्वाययिषति । शुशावयिषति । जुहावयिषति । पुस्फारयिषति—पुस्फोरयिषति । पिपावयिषति । बिभावयिषति । यियावयिषति । रिरावयिषति । लिलावयिषति । सिस्रावयिषति । सान्तात्सो न ॥ चिकीर्षितुमिच्छति ॥ स्वार्थसान्तात्तु स्यादेव । जुगुप्सिषते ॥ इति सान्तप्रक्रिया ॥

अथ यङन्तप्रक्रिया।

अतिशये हसादेर्यङ् द्विश्च ॥ हसादेरेकस्वराद्धातोर्भृशार्थे पौनःपुन्ये च यङ्प्रत्ययो भवति द्वित्वं च ॥ यङि ॥ यङि यङ्लुकि च पूर्वस्य नामिनो गुणः ॥ "स धातुः" ॥ ङित्त्वादात् । भृशं पुनः पुनर्वा भवति बोभूयते । बोभुज्यते ॥ अनपि च हसात् ॥ हसादुत्तरस्य यस्य लोपो भवत्यनपि विषये ॥ बोभुजांचक्रे । बोभुजिता । मोमुह्यते । मोमुहांचक्रे । लेलिह्यते । जोहूयते । वेविद्यते । यलोपस्य स्थानिवत्त्वान्नोपधाया गुणः । वेविदिता । जोहूयते । आतः ॥ यङि यङ्लुकि च पूर्वस्यात आकारः ॥ पापच्यते । पापठ्यते ॥ सिचो यङि न षः ॥ सेसिच्यते ॥ सूचिसूत्रिमूत्र्यट्यर्त्यशूर्णोतिभ्यो यङ् ॥ सोसूच्यते । सोसूत्र्यते । मोमूत्र्यते ॥ यकारपररेफस्य न द्वित्वनिषेधः ॥ अरार्यते । अरारांचक्रे । अशाश्यते । ऊर्णोनूयते ॥ गत्यर्थात्कौटिल्ये एव यङ् ॥ कुटिलमटति अटाट्यते । कुटिलं व्रजति वाव्रज्यते ॥ लुपसदचरजपजभदहदंशगॄभ्यो धात्वर्थगर्हाया-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

मेव यङ् ॥ गार्हितं लुम्पति लोलुप्यते । सासद्यते ॥ ञमजपां नुक् ॥ ञमान्तस्य जपजभदहदंशभञ्जपसचरफलां च पूर्वस्यादन्तस्य नुग् यङ्लुकोः॥ चरफलोः पूर्वात्परस्यात उद्यङ्लुकोः॥ चञ्चूर्यते–चंचूर्यते। चञ्चूरांचक्रे । पम्फुल्यते । नुगित्यनेनानुस्वारो लक्ष्यते स च पदान्तवत् । जञ्जप्यते–जंजप्यते ॥ गिरते रेफस्य लत्वं याङि ॥ जेगिल्यते । यँय्यम्यते–यंयम्यते ॥ दीङ् क्षये ॥ देदीयते । ओप्यायी वृद्धौ । पेपीयते । वंव्वम्यते । चञ्चम्यते–चंचम्यते । चाखायते–चङ्खन्यते–चंखन्यते । चङ्कण्यते–चंकण्यते । तन्तन्यते–तंतन्यते । जञ्जभ्यते–जंजभ्यते । दन्दह्यते–दंदह्यते । दन्दश्यते–दंदश्यते । बम्भज्यते–बंभज्यते ॥ पस बाधनग्रन्थनयोः ॥ पम्पस्यते–पंपस्यते ॥ रीगृदुपधस्य ॥ ऋत्वतो धातोर्यङि परे पूर्वस्य रीक् ॥ नरीनृत्यते । वरीवृत्यते । जरीगृह्यते । वरीवृश्च्यते । परीपृच्छ्यते । चलीक्लृप्यते ॥ वशोर्यङि न संप्रसारणम् ॥ वावश्यते ॥ श्वयतेर्वा ॥ शोशूयते–शेश्वीयते । सास्मर्यते ॥ कवतेः पूर्वस्य न चुत्वं याङि ॥ कोकूयते ॥ वञ्चुस्रंसुध्वंसुभ्रंसुकसपतपदस्कन्दां याङि यङ्लुकि च पूर्वस्य नीक् ॥ वनीवच्यते । सनीस्रस्यते । दनीध्वस्यते । बनीभ्रस्यते । चनीकस्यते । पनीपत्यते । पनीपद्यते । चनीस्कद्यते ॥ ऋतो रिः ॥ " येऽनपि " । चेक्रीयते । जेह्रीयते । वेव्रीयते ॥ दादेरिः ॥ अपिद्दाधामागैहाकृपिबातिसोस्थामिकारः ङिति हसे अनपि ॥ देदीयते । देधीयते । मेमीयते । जेगीयते । जेहीयते । पेपी-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

यते । सेषीयते । तेष्ठीयते ॥ घ्राध्मोरीर्यङि ॥ जेघ्रीयते । देध्मीयते ॥ हन्तेर्हिंसायां घ्नी यङि ॥ जेघ्नीयते । हिंसायां किम् । जङ्घन्यते ॥ स्वपिस्यमिव्येञां यङि संप्रसारणम् ॥ सोषुप्यते । सेसिम्यते । वेवीयते ॥ चायः कीर्यङि ॥ चेकीयते । जाजायते—जञ्जन्यते । शीङोऽयङ् ये क्ङिति ॥ शाशय्यते । डोढौक्यते । तोत्रौक्यते । इति यङन्तप्रक्रिया ॥

अथ यङ्लुगन्तप्रक्रिया ।

वाऽन्यत्र ॥ ऊकप्रत्ययसंयोगं विना यङो वा लुक् ॥ यङ्लुगन्तात्पम् अदादिवत् । यङ्लुगन्तमदादौ बोध्यम् । अदादित्वादपो लुक् । यङ्लुकि सति पितः स्मो वेट् ॥ बोभवीतु—बोभोतु । अबोभवीत्—अबोभोत् । अबोभूताम् । अबोभवुः । बोभवांचकार । गुणं बाधित्वा नित्यत्वाद् वुक् । अबोभूवीत्—अबोभोत्—अबोभवुः । अबोभूवीः—अबोभोः । अबोभूवम् ॥ पापचीति—पापक्ति, पापक्तः, पापचति । अपापचीत्—अपापक्—अपापग् । अपापचुः । पापचांचकार । पापचिता । अपापाचीत्—अपापचीत् । "द्वेः स्वरेऽपि नोपधाया गुणः" ॥ बोभुजीति—बोभोक्ति, बोभुक्तः, बोभुजति । अबोभुजीत्—अबोभोक् । बोभोजिता । अबोभोजीत् । वावदीति—वावत्ति । वावदीतु—वावत्तु । वावद्धि । वावद्यात् ॥ जाघटीति—जाघट्टि । जाघटीषि । "ष्टुभिः ष्टुः" जाघट्षि । अजाघटीत् ॥ स्पर्ध संघर्षे । पास्पर्द्धीति—पास्पार्द्धि, पास्पर्द्धः । पास्पर्धति । द्धौ । पास्पार्द्धि । अपा-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

स्पर्द्धीत्—अपास्पर्त्—अपास्पर्द् । सिपि । अपास्पर्द्धीः । अपास्पाः—अपास्पर्त्—अपास्पर्द् ॥ गाधृ प्रतिष्ठालिप्सयोर्ग्रन्थे च ॥ जागाधीति-जागाद्धि, जागाद्धः । "आदिजभानाम्" इति ॥ जाघात्सि । अजागाधीत्—अजाघात् । सिपि । अजाघाः—अजाघात् । नाथृ । नानाथीति—नानात्ति, नानात्तः, नानाथति । दध । दादधीति—दादद्धि, दाधत्सि । अदादधीत्, अदादद्धाम्,अदादधुः । अदाधः—अदादधीः । दादधिता । अदादाधीत्—अदादधीत् ॥ मुद । मोमुदीति—मोमोत्ति । कुर्द खुर्द गुर्द गुद क्रीडायामेव ॥ चोकूर्दीति—चोकूर्ति, चोकूर्तः । अचोकूर्त् । सिपि । अचोकूः ॥ **ऋदन्तानामृदुपधानां च यङ्लुकि पूर्वस्य रुक्रिक्रीकः** ॥ चर्करीति—चरिकरीति—चरीकरीति, चर्कर्ति—चरिकर्ति—चरीकर्ति, चर्कृतः—चरिकृतः—चरीकृतः, चर्क्रति—चरिक्रति—चरीक्रति । अचर्करीत्—अचरिकरीत्—अचरीकरीत् । अचर्कः—अचरिकः—अचरीकः । चर्करिता । वर्वृतीति—वरिवृतीति—वरीवृतीति, वर्वर्ति—वरिवर्ति—वरीवर्ति । वर्वर्तामास । वर्वर्तिता । वर्वर्तिष्यति । अवर्वर्तिष्यत् । वनीवञ्चीषि—वनीवङ्क्षि । वनीवच्यात् । वनीवञ्चीतु—वनीवङ्क्तु—वनीवङ्क्ताम् । अवनीवञ्चीत् । "संयोगान्तस्य लोपः" । अवनीवन् ॥ जङ्गमीति—जङ्गन्ति ॥ "लोपस्त्वनुदात्ततनाम्" ॥ जङ्गतः ॥ "गमां स्वरे" ॥ जङ्ग्मति । जङ्गमीमि । जङ्गन्वः । जङ्गन्मः । जङ्गमीतु—जङ्गन्तु । हौ । जङ्गहि । अजङ्गमीत्—अजङ्गत्, अजङ्गन्ताम् ॥ "गमां स्वरे" अजङ्ग्मुः । जङ्गमिता ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

अजङ्गमीत् ॥ जङ्घनीति—जंघन्ति । हिंसायां तु—जेघ्नयीति—जेघ्नेति ॥ "लोपस्त्वनुदात्ततनाम्॥"जङ्घतः,जङ्घ्नति । अजङ्घनीत्-अजङ्घन् । आशिषि । वध्यात् । अवधिष्ट ॥ चञ्चुरीति—चञ्चूर्ति, चञ्चूर्तः, चञ्चुरति । चञ्चूर्यात् । चञ्चुरीतु—चञ्चूर्तु, चञ्चूर्तात्,चञ्चूर्ताम्, चञ्चूर्हि । अचञ्चुरीत्—अचञ्चूः । चोस्कुन्दीति—चोस्कुन्ति, चोस्कुन्तः, चोस्कुन्दति । चोस्कुन्द्यात् । चोस्कुन्दीतु—चोस्कुन्तु,चोस्कुन्ताम् । अचोस्कुन्दीत्—अचोस्कुन्, अचोस्कुन्ताम्, अचोस्कुन्दुः । सिपि । अचोस्कुन्दीः—अचोस्कुन् । चङ्खनीति—चङ्खन्ति । चङ्खातः, चङ्ख्नति । चङ्खनीषि—चङ्खसि, चङ्खाथः । चङ्खनीमि—चङ्खन्मि । चङ्खन्वः, चङ्खन्मः । चङ्खायात्—चङ्खन्यात् । चङ्खनीतु—चङ्खन्तु । चङ्खातात्, चङ्खाताम्,चङ्ख्नतु, चङ्खाहि । अचङ्खनीत—अचङ्खानीत,अचङ्खानिष्टाम् । योयवीति-योयोति, योयुतः । योयुतात् । योयवीतु—योयोतु । अयोयवीत् । नोनवीति—नोनोति, नोनुतः । नोनुयात् । नोनवीतु—नोनोतु । अनोनवीत्—अनोनोत् । सिपि । अनोनवीः—अनोनोः ॥ जाहेति-जाहाति । "द्वेस्तौ" । जाहीतः । जाहीयात् । जाहेतु—जाहातु—जाहीतात्, जाहीताम् । अजाहेत्—अजाहात् । आजाहीताम्, अजाहुः । जाहीयात् । जाहिता । "आतोऽनपि"। अजाहासीत्, अजाहासिष्टाम् । दादेति—दादाति, दात्तः, दादति, दादेषि—दादासि, दात्थः, दात्थ, दाद्वः, दाद्मः । " दां हौ " देहि । दादेयात् । " आतोऽनपि " ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

दादिता । "दादेः पे" । अदादेत्-अदादात् । अदादाताम् । एवं धेट् । दाधेति-दाधाति, दाद्धः, दाधति । दाध्यात् । धेहि । दाधेयात् । अदाधासीत् । अदाधेत्-अदाधात् । अदाधत्, अदाधताम्, अदाधन् ॥ डुधाञ् ॥ दाधेति-दाधाति, धात्तः । धात्थः । "दादेः ।" दाध्वः, दाध्मः । लङि । अदाधात्-अदाधेत् । पितोस्तु । दैप् शोधने । दाप् लवने । दादेति-दादाति, दादीतः, दादति । दादीयात् । दादेतु-दादातु-दादीतात् । दादीहि । अदादेत्-अदादात् । अदादीताम् । दादायात् । अदादासीत् । सास्वपीति-सास्वप्ति, सास्वप्तः,सास्वपति । हौ । सास्वब्धि । असास्वपीत्-असास्वप् । सासुप्यात् । असास्वापीत्-असास्वपीत् । कॄ विक्षेपे । चाकरीति-चाकर्ति, चाकीर्तः, चाकिरति । चाकरिता-चाकरीता । तातरीति-तातर्ति, तातीर्तः, तातिरति । तातरीतु-तातर्तु ॥ " ॠत इर् " तातीर्तात् । तातीर्हि । अतातरीत्-अतातः । अतातारीत्, अतातारिष्टाम् । अर्तेर्यङ्लुकि द्वित्वे पूर्वस्य'रः'इत्यत्वम्।रुग्रिग्रीकोस्तु पूर्वस्यासवर्ण इय्।अररीति-अरियरीति-अरर्ति-अरियर्ति, अर्ऋतः-अरियृतः । रुको "रिलोप" इति लोपः । आरति-अरियृरति । अर्ऋयात्-अरियृयात् । अररीतु-अरियरीतु, अरर्तु-अरियर्तु,आरतु-अरियृरतु । आररीत्-आरियरीत्। आरः-आरियः । आररुः-आरियरुः।सिपि।आररीः-आरियारीः । आरः-आरियः । लिङि यादादाविति रिङ् । आरियात्-अरियृरियात् । अररिता-अरियारिता । लुङि । आरारीत्-आरियारीत् । गॄह्ह् । जर्गृहीति

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

जरिगृहीति—जरीगृहीति—जर्गर्ढि,जर्गृढः जर्गृहति। जार्गृहीतु—जर्गढु। जर्गृढात्। हौ। जर्गृढि। अजर्गृहीत्,अजर्घर्ट्—अजर्घड्॥ ग्रह। जाग्रहीति। जाग्राढि। तसादौ ङिन्निमित्तं संप्रसारणम्। तस्य बहिरङ्गत्वेनासिद्धत्वान्न रुगादयः। जागृढः, जागृहति। जाग्रहीषि—जाग्राक्षि। जागृढि। जागृहिता। गृधु। जर्गृधीति—जर्गर्धि, जर्गृद्धः, जर्गृधति। जर्गृधीषि—जर्घर्त्सि। अजर्गृधीत्—अजर्घर्त्। सिपि। अजर्गृधीः-अजर्घाः, अजर्गर्धीत्, अजर्गर्द्धिष्टाम्। प्राप्रच्छीति—प्राप्रष्टि। तसादौ न संप्रसारणं श्तिपा निर्देशात्॥ क्विति झसे क्ङौ ञभे च छस्य शो वस्य ऊः॥ पाप्रष्टः, पाप्रच्छति। पाप्रश्मि, पाप्रच्छ्वः, पाप्रश्मः। हय् गतौ। जाहयीति। "यवयोर्वसे हकारे च लोपः"। जाहति,जाहतः, जाहयति। जाहयीषि—जाहसि। जाहामि, जाहावः, जाहामः। अजाहयीत्—अजाहत्। जाहय्यात्॥ हर्य गतिकान्त्योः। जाहर्यीति—जाहर्ति, जाहर्तः, जाहर्यति। जाहर्हि। अजाहर्यीत्—अजाहः, अजाहर्ताम्, अजाहर्युः॥ ज्वरत्वरस्रिव्यविमवामुपधावकारयोरूः॥ क्ङौ झसादौ ञमादौ हकारे च प्रत्यये परे॥ जाज्वरीति—जाजूर्ति, जाजूर्तः, जाज्वरति। जाजूर्वः, जाजूर्मः। जाज्वरीत्—अजाजूः। तात्वरीति—तातूर्ति। अतात्वरीत्—अतातूः। सेस्रिवीति—सेस्रोति। सेस्रीव्यात्। असेस्रिवीत्—असेस्रोत्। मव बन्धने। मामवीति—मामोति, मामूतः, मामवति। मामावः,मामूमः। मामूहि। मामवानि। अमामवीत्—अमामोत्। सिपि। अमामवीः—अमामोः।अमामवम्, अमामाव,

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

अमामूम । तुर्वी थुर्वी दुर्वी धुर्वी हिंसायाम् । तोतूर्वीति ॥ रेफाच्छ्वो-र्लोपः ॥ क्वौ झसादौ यमादौ हे च प्रत्यये ॥ तोतोर्ति, तोतूर्तः, तोतूर्वति, तोतूर्वीषि–तोतोर्षि, तोतूर्वः, तोतूर्मः । सिपि । अतोतूर्वीः–अतोतोः । तोथोर्ति, तोथूर्तः । दोदोर्ति । दोधोर्ति ॥ मुर्छा मोहसमुच्छ्राययोः । मोमूर्च्छीति–मोमोर्त्ति, मोमूर्त्तः, मोमूर्च्छति । मोमूर्मः । अमोमूर्च्छीत् ॥ इति यङ्लुगन्तप्रक्रिया ॥

अथ नामधातुप्रक्रिया ।

नाम्नो य ई चास्य ॥ नाम्न इच्छायामर्थे यः प्रत्ययो भवत्यवर्णस्य च ईकारः ॥ आत्मनः पुत्रमिच्छति पुत्रीयति । "क्वचित्स्वरवद्यकारः" । गामिच्छति गव्यति ॥ गव्यांचकार । नाव्यति । नाव्यांचकार। त्वामिच्छति त्वद्यति ॥ **हसाद्यस्य लोपो वाऽनपि नामधातौ ॥** त्वदांचकार–त्वद्यांचकार । मामिच्छति मद्यति । युष्मद्यति । अस्मद्यति॥ **काम्यश्च ॥** पुत्रकाम्यांचकार ॥ **धनस्य नेकारो गार्द्धे ॥** धनायति। अन्यत्र धनीयति ॥ **उदकस्योदन् पिपासायाम् ॥** उदन्यति । अन्यत्रोदकीयति । गीर्यति । गिरांचकार–गीर्यांचकार । पूर्यति । दिवमिच्छति दिव्यति । अमुमिच्छति अदस्यति ॥ ऋतो रिः" कर्त्रीयति ॥ **हसात्तद्धितयस्य लोपो ये च्वौ च ॥** गार्गीयति । वाच्यति । कवीयति । समिध्यति । समिध्यांचकार । समिधिता ॥ **मान्ताऽव्ययाभ्यां यो न ॥** किमिच्छति । इदमिच्छति । स्वरिच्छति। उच्चैरिच्छति ॥ **अश्ववृषयोर्ये सुक् मैथुनेच्छायाम् ॥** अश्वस्यति ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

वडवा । वृषस्यति गौः ॥ क्षीरलवणयोर्लालसायां सुक् ॥ क्षीरस्यति बालः । लवणस्यत्युष्ट्रः ॥ नाम्नो ये लालसायां सुगसुकौ ॥ दधिस्यति—दध्यस्यति । मधुस्यति—मध्वस्यति । यशस्काम्यति ॥ मान्ताव्ययाभ्यां काम्यः ॥ किंकाम्यति । स्वःकाम्यति ॥ उच्चैस्काम्यति ॥ करणे च नाम्नः ॥ करणेऽर्थे यः ॥ तपस्यति तपश्चरतीत्यर्थः ॥ नमसः पूजायाम् ॥ नमस्यति देवान् । पूजयतीत्यर्थः ॥ वरिवसः परिचर्यायाम् ॥ वरिवस्यति गुरुम् ॥ शुश्रूषत इत्यर्थः ॥ शब्दादिभ्यो यङ् ॥ शब्दायते । वैरायते । कलहायते । अभ्रायते । मेघायते ॥ कष्टाय क्रमणे ॥ कष्टायते ॥ ऊष्मबाष्पधूमेभ्य उद्वमने ॥ ऊष्मायते । बाष्पायते । धूमायते ॥ ञिर्डित् करणे ॥ नाम्नो ञिप्रत्ययः करणेऽर्थे स च डित् ॥ घटं करोति घटयति । घटयते । अजघटत् । पटयति । पटयते । अपपटत् । "अग्लोपिनो नाङ्कार्यम्" । महान्तं करोति माहयति । अममाहत् । युवानं करोति यवयति । अयूयवत् । कनयति । अचीकनत् ॥ ञाविष्ठवत्कार्यम् ॥ स्फिरं करोति स्फापयति । अपिस्फपत् । उरुं वरयति । अवीवरत् ॥ बहुलं बंहयति । अबबंहत् । वृद्धं वर्षयति, अववर्षत् । तृप्रं त्रपयति । अतित्रपत् । दीर्घं द्राघयति । अदद्राघत् । वृन्दारकं वृन्दयति । अववृन्दत् । अन्तिकं नेदयति । अनिनेदत् । स्थूलं स्थवयति । अतुस्थवत् । दूरं दवयति । अदूदवत् । ह्रस्वं ह्रसयति । अजह्रसत् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

क्षिप्रं क्षेपयति । अचिक्षेपत् । क्षुद्रं करोति क्षोदयति । अचुक्षोदत् । प्रियं करोति प्रापयति । अपिप्रपत् । गुरुं करोति गरयति । अजीगरत् । स्थिरं करोति स्थापयति । अतिस्थपत् । ऊढिं करोति ऊढयति । "ञेरङ् द्विश्च" "स्वरादेः परः" ॥ **अङि पूर्वढस्य जो वा** ॥ औजिढत्, औडिढत् । ऊढं करोति ऊढयति । औजढत्, औडढत् ॥ **कर्तुर्यङ्** ॥ उपमानात्कर्तुराचारार्थे यङ् ॥ श्येन इवाचरति श्येनायते काकः । पण्डितायते मूर्खः । एतायते । "यङ्मानिनोः पुंवत्" ॥ **यङि वा सलोपः** ॥ पयायते—पयस्यते वा तक्रम् । **अप्सरसोजस्सुमनसां नित्यम्** ॥ अप्सरायते । ओजायते दुर्बलः । सुमनायते । **नाम्न आचारे क्विब्वा** ॥ कृष्ण इवाचरति कृष्णति । अकृष्णत् । अ इवाचरति, अति, अतः, अन्ति । एत्, एताम्, एयुः । अतु—अतात्, अताम्, अन्तु । अतात् । आत् । आन् ॥ आः ॥ लिटि । औ, अतुः, उः । इथ । यात् । इता । आसीत्, आसिष्टाम् । मालेवाचरति मालाति । मालायात् । मालाहि । अमालात् । मालांचकार । मालिता । अमालासीत् । कविरिवाचरति कवयति । अकवयत् ॥ **नामधातोर्वृद्धिर्वा सौ** ॥ अकवायीत्—अकवयीत् । विरिवाचरति वयति । विवाय, विव्यतुः । अवायीत्—अवयीत् । श्रीरिवाचरति श्रयति । शिश्राय । शिश्रियतुः । अश्रायीत्, अश्रयीत् । पितेवाचरति पितरति । पितरांचकार । "यादादौ" इति रिङ् । पित्रियात् । भूरिवाचरति भवति । बुभाव । अभावीत् ॥ द्युरिवाचरति

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

द्रवति । अद्रावीत् ॥ ञमान्तस्योपधाया दीर्घः क्वौ झसादौ ङ्किति हे च ॥ इदमिवाचरति इदामति । राजेवाचरति राजानाति । राजायते । मन्था इवाचरति मथीनाति । ऋभुक्षा इवाचरति ऋभुक्षीणाति । द्यौरिवाचरति द्यवति । दुद्याव । द्यूयात् । द्यविता । क इवाचरति कति । चकौ । चक इत्यन्ये । स्व इवाचरति स्वति । सस्वौ । सस्व इत्यन्ये ॥ आचार उपमानात् ॥ कर्मधारयोरुपमानादाचारेऽर्थे यप्रत्ययोऽस्य चेकारः ॥ पुत्रमिवाचरति पुत्रीयति शिष्यमुपाध्यायः । प्रासाद इवाचरति प्रासादीयति कुट्यां भिक्षुः ॥ भृशादिभ्योऽभूततद्भावे यङ् अन्त्यहसलोपश्च ॥ अभृशो भृशो भवति भृशायते । अशश्वत् शश्वद्भवति शश्वायते ॥ क्विदपि ॥ भृशति । च्विरपि ॥ भृशीभवति । भृश्यभूत् । सुमनायते । उपसर्गसमानाकारं पूर्वपदं धातुसंज्ञाहेतौ प्रत्यये चिकीर्षिते पृथक् क्रियते । स्वमनायत । उदमनायत॥सुखादिभ्यो यङ् कर्तुरनुभवे ॥ सुखं वेदयते सुखायते । दुःखायते । पुच्छादुदसने व्यसने पर्यसने च ञिङ्॥ उत्पुच्छयते।उदपुपुच्छत।विपुच्छयते।परिपुच्छयते ॥ भाण्डात्समाचयने । सम्भाण्डयते । चीवरादर्जने परिधाने च ॥ चीवराणि अर्जयति परिधत्ते वा परिचीवरयते भिक्षुः । नाम्नो ञिराचष्टे अर्थवेदसत्यानामापुग् ञौ ॥ अर्थापयति । आर्तीथपत् । वेदापयति । सत्यापयति । अससत्यपत् । एतायते । ऐतत् । पृथुं प्रथयति । वृद्धौ सत्यां पूर्वं वा टिलोपः । अपप्रथत्–अपिप्रथत् । मृदुं म्रदयति ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

अमम्रदत्–अमिम्रदत् । भृशं भ्रशयति । अबभ्रशत् । कृशं क्रशयति । अचक्रशत् । दृढं द्रढयति । अदद्रढत् । परिव्रढयति । पर्यवव्रढत् । त्वादयति । अतित्वदत् । मादयति । अमीमदत् । युष्मयति । अयुयुष्मत् । अस्मयति । आसस्मत् । विद्वांसं विद्वयति । अविविद्वत् । विदावयति इत्यपरे । अविविदावत् । विदयति इत्यन्ये । अविविदत् । एवं श्वानमाचष्टे श्वयति । अशिश्वत् । शावयतीत्यपरे । अशुशावत् । शुनयतीत्यन्ये । अशूशुनत् । उदञ्चम् उदीचयति । उदैचिचत् । प्रत्यञ्चं प्रतीचयति । प्रत्यचिचत् । सम्यञ्चं समीचयति । सम्यचिचत् । तिर्यञ्चं तिराययति । अतितिरायत् । सध्र्यञ्चं सध्राययति । अससध्रायत् । अन्तिकं नेदयति । अनिनेदत् । बाढं साधयति । वृद्धं ज्यापयति । अजिज्यपत् । वृद्धं वर्षयति । स्फिरं स्फापयति । अपिस्फपत् । उरुं वरयति । बहुलं बंहयति । तृप्रं त्रपयति । दीर्घं द्राघयति । अदद्राघत् । वृन्दारकं वृन्दयति । अववृन्दत् । इति नामधातुप्रक्रिया ॥

अथ कण्ड्वादयः ।

कण्ड्वादिभ्यो धातुभ्यो यक् स्वार्थे ॥ कण्डूञ् गात्रविघर्षणे ॥ कण्डूयति । कण्डूयते । मन्तु अपराधे रोषे च ॥ मन्तूयति । ञिदित्येके । मन्तूयते ॥ वल्गु पूजामाधुर्ययोः ॥ वल्गूयति । अस् असु असूञ् उपतापे ॥ अस्यति ॥ "अनपि च हसात्" असांचकार । असूयति । असूयते ॥ लेला दीप्तौ ॥ लेलायति ॥ मेधा आशुग्रहणे ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

मेधायति ॥ सुख दुःख तत्क्रियायाम् ॥ सुख्यति । दुःख्यति ॥ सपर पूजायाम् ॥ सपर्यति । सपरांचकार । भिषज चिकित्सायाम् ॥ भिषज्यति । इषुध शरधारणे ॥ इषुध्यति । ऐषुधीत् ॥ गद्गद वाक्स्खलने॥ गद्गद्यति । एला केला खेला विलासे ॥ एलायति । केलायति । खेलायति । ह्णीङ् रोषणे लज्जायां च ॥ ह्णीयते । महीङ् पूजायाम् ॥ महीयते ॥ अगद नीरोगत्वे ॥ अगद्यति । आगदीत् ॥ इति कण्ड्वादयः ॥

अथात्मनेपदप्रक्रिया ।

नेर्विशादेः ॥ न्यादिपूर्वाद्विशादेर्धातोरात् ॥ निविशते ॥ परिव्यवेभ्यः क्रियः ॥ परिक्रीणीते । विक्रीणीते । अवक्रीणीते । विपराभ्यां जेः ॥ विजयते । व्यजेष्ट । पराजयते ॥ आङो दाञो न तु विकसने ॥ विद्यामादत्ते । आदित । विकसने तु व्याददाति मुखं कृष्णः । पराङ्कर्मकाद्भवत्येव । व्याददते पिपीलिकाः पतङ्गस्य मुखम् ॥ क्रीड आङनुसंपरिभ्यः ॥ आक्रीडते । अनुक्रीडते । परिक्रीडते ॥ समोऽकूजने ॥ संक्रीडते । कूजने तु संक्रीडति रथचक्रम् ॥ आगमेः क्षमायाम् ॥ आगमयस्व तावत् ॥ शिक्षेर्जिज्ञासायाम् ॥ धनुषि शिक्षते ॥ हरतेर्गतताच्छील्ये ॥ पैतृकमश्वा अनुहरन्ते । मातृकं गावः ॥ किरतेर्हर्षजीविकाकुलायकरणेषु ॥ अपात्किरतेः सुट् चतुष्पाच्छकुनिकर्तृके आलेखने ॥ अपस्किरते वृषो हृष्टः । कुक्कुटो भक्षार्थी श्वा आश्रयार्थी च ॥ हर्षादिष्विति किम् । अपाकिरति कुसुमं वायुः ॥ आङो नुप्रच्छोः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

आनुते । आपृच्छते ॥ शप उपालम्भे ॥ विप्राय शपते ॥ समव-प्रविभ्यः स्थः ॥ संतिष्ठते । समस्थित । अवतिष्ठते । प्रतिष्ठते । वितिष्ठते ॥ आङः प्रतिज्ञायाम् ॥ शब्दं नित्यमातिष्ठते ॥ स्वाभि-प्रायाविष्करणे निर्णेत्राख्यायां च ॥ गोपी कृष्णाय तिष्ठते । अस्थित । संशय्य कर्णादिषु तिष्ठते यः॥उदोऽनूर्ध्वकर्मणीहायाम् ॥ मुक्तावुत्तिष्ठते । "उदः स्थास्तम्भोः सलोपः" ॥ उत्थासीष्ट, उत्था-सीयास्ताम् । उदस्थास्यत । उदस्थित । अनूर्ध्वकर्मणि किम् । पीठादुत्तिष्ठति ॥ ईहायां किम् । ग्रामाच्छतमुत्तिष्ठति ॥ उपान्मन्त्र-करणदेवपूजासङ्गतिकरणमित्रकरणपथिषु ॥ आग्नेय्याग्नीध्रमुप-तिष्ठते । मन्त्रकरणे किम् । भर्तारमुपतिष्ठति यौवनेन । आदित्य-मुपतिष्ठते । गङ्गा यमुनामुपतिष्ठते । रथिकानुपतिष्ठते । स्रुघ्न-मुपतिष्ठते पन्थाः ॥ वा लिप्सायाम् ॥ भिक्षुः प्रभुमुपातिष्ठते । उपतिष्ठति वा ॥ अकर्मकाच्च ॥ ज्ञानमुपातिष्ठते ॥ उद्विभ्यां तपोऽकर्मकात्स्वांगकर्मकाच्च ॥ उत्तपते, वितपते पाणिं शिरो वा॥ स्वाङ्गकर्मकात्किम् । सुवर्णमुत्तपति ॥ आङो यमहानभ्यामकर्म-काभ्यां स्वाङ्गकर्मकाभ्यां च ॥ आयच्छते आहते पाणिं शिरो वा । आघ्नाते । आहते । अन्यत्र शत्रुमायच्छति–आहन्ति वा ॥ हनः सिः कित् ॥ वधो वाऽऽति । आहत–आवधिष्ट, आवधिषाताम्, आहसाताम् । यमः सूचने सि कित् ॥ उदायत, उदायसा-ताम् । उदायसत ॥ समो गमृच्छिप्रच्छिस्वरत्यर्तिश्रुविदि-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

इषिभ्योऽकर्मकेभ्यः॥ संगच्छते । गमेरकर्मकात् सिस्यौ कितौ वा ॥ संगसीष्ट—सगंसीष्ट । समगत—समगंस्त । समृच्छिष्यते । समानृच्छे । समार्च्छिष्ट। संस्वरते । संसस्वरे । संस्वारिषीष्ट—संस्वृषीष्ट । समस्वरिष्ट—समस्वृत।संपृच्छते । समप्रष्ट, समप्रक्षाताम् । संशृणुते । संश्रोता । समश्रोष्ट । संविंत्ते, संविदाते ॥ वेत्तेरन्तो वा रुट् ॥ संविदते—संविद्रते । संपश्यते । समदृष्ट । समियृते, समियरते।समारे । "ऋप्रोरिः पूर्वस्य" समियृरीति । समिय्रीयाताम् । "स्वरादेः"। "अइ ए" "एऐ ऐ" समैयृत, समैय्राताम् । अकर्मकात्किम् ग्रामं संगच्छति ॥ उपसर्गादस्यत्यूहोर्वा ॥ निरस्यते । निरस्यति ॥ निरास्यत । समूहति । समूहते । समुह्यात् । निसमुपविभ्यो ह्वः ॥ निह्वयते ॥ स्पर्द्धायामाङः ॥ कृष्णश्चाणूरमाह्वयते ॥ अप्रतिबन्धोत्साहस्फीततासु क्रमः॥ऋचि क्रमते बुद्धिः।अध्ययनाय क्रमते ॥ क्रमन्तेऽस्मिन् शास्त्राणि ॥ उपपराभ्याम् ॥उपक्रमते । पराक्रमते॥आङो ज्योतिरुद्गमने ॥ आक्रमते, आक्रम्यते सूर्यः ॥ वेः पादविहरणे ॥ साधु विक्रमते वाजी ॥ प्रोपाभ्यां प्रारम्भार्थाभ्याम् ॥ प्रक्रमते उपक्रमते ॥ स्नुक्रमोरात्ति नेट् ॥ प्रक्रंसीष्ट ॥ अनुपसर्गाज्ज्ञः ॥ क्रमते—क्रम्यते । क्राम्यति, क्रामति ॥ अपह्नवे ज्ञः ॥ शतमपजानीते। अकर्मकाच्च ॥ सर्पिषो जानीते । अनुपसर्गाज्ज्ञः ॥ गां जानीते ॥ सम्प्रतिभ्यामनाध्याने ॥ शतं सञ्जानीते । शतं प्रतिजानीते । अनाध्याने किम् । मातरं सञ्जानाति ॥ अनुप-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

सर्गाद्वा ॥ गां जानाति । जानीते वा ॥ वेः शब्दकर्मणः कृञः । शब्दं विकुरुते ॥ अकर्मकाच्च । विकुर्वते सैन्धवाः ॥ भासनोपसंभाषाज्ञानयत्नविमत्युपमन्त्रणेषु वदः ॥ शास्त्रे वदते । भृत्यानुपवदते । शास्त्रे वदते । क्षेत्रे वदते । गृहे विवदते । उपवदते ब्राह्मणः परदारान् ॥ मनुष्यादीनां सम्भूयोच्चारणे ॥ सम्प्रवदन्ते ब्राह्मणाः ॥ व्यक्तवाग्विषयादनुपूर्वादकर्मकात् ॥ अनुवदते कठः कलापस्य ॥ वा विरोधोक्तौ ॥ विप्रवदन्ति, विप्रवदन्ते वा वैद्याः ॥ अवाद्गिरतेः ॥ अवगिरते ॥ समः प्रतिज्ञाने ॥ शब्दं नित्यं संगिरते ॥ उदश्चरः सकर्मकात् ॥ धर्ममुच्चरते ॥ समस्तृतीयायुक्तात् ॥ रथेन सञ्चरते ॥ दाणश्च सा चेच्चतुर्थ्यर्थे ॥ दास्या संयच्छते कामुकः ॥ उपाद्यमः स्वीकारे॥भार्यामुपयच्छते ॥ यमः सिःकिद्वा विवाहे ॥ रामः सीतामुपायत—उपायंस्त वा ॥ ज्ञाश्रुस्मृदृशां सान्तानामात् ॥ जिज्ञासते । शुश्रूषते । सुस्मूर्षते । दिदृक्षते ॥ अनोर्जानातेर्न ॥ अनुजिज्ञासति पुत्रम् ॥ प्रत्याङ्भ्यां श्रुवः ॥ प्रतिशुश्रूषति । आशुश्रूषति ॥ स्वराद्यन्तोपसर्गाद्युजेरयज्ञे ॥ प्रयुङ्क्ते । उद्युङ्क्ते । अयज्ञे किम् । पात्राणि प्रयुनक्ति ॥ समः क्ष्णुवः ॥ संक्ष्णुते शस्त्रम् । भुजोऽपालने ॥ ओदनं भुङ्क्ते ॥ पालने तु महीं भुनक्ति ॥ गृधिवञ्चिभ्यां ण्यन्ताभ्यां प्रतारणे ॥ माणवकं वञ्चयते । गर्द्धयते ॥ अपाद्वदः ॥ न्यायमपवदते ॥ समुदाङ्भ्यो यमोऽग्रन्थे ॥ व्रीहीन् संयच्छते

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

धान्यानि स्वीकरोतीत्यर्थः । भारमुद्यच्छते भारं वहतीत्यर्थः । वस्त्र-मायच्छते मस्त्रमादधातीत्यर्थः । अग्रन्थे किम् । वेदमुद्यच्छति । अधि-गन्तुमुद्यमं करोतीत्यर्थः । **कर्मव्यतिहारे धातोरात्** ॥ व्यतिभवते । व्यतिराते ॥ **न गतिहिंसार्थपठजल्पहसात्** ॥ व्यतिगच्छन्ति । व्यतिपठन्ति । व्यतिघ्नन्ति । व्यतिजल्पन्ति । व्यतिहसन्ति ॥ **इतरे-तरान्योऽन्यपरस्परोपपदाच्च** ॥ इतरेतरस्य अन्योऽन्यस्य परस्परस्य वा । व्यतिलुनन्ति ॥ इत्यात्मनेपदम् ॥

अथ परस्मैपदम् ।

अनुपराभ्यां कृञः पम् ॥ अनुकरोति । पराकरोति ॥ **अभि-प्रत्यतिभ्यां क्षिपः पम्** ॥ अभिक्षिपति । प्रतिक्षिपति । अतिक्षि-पति ॥ **प्राद्वहः** ॥ प्रवहति । **परेर्मृषश्च** ॥ परिमृषति । परिवहति ॥ इति परस्मैपदम् ॥ इति पदव्यवस्था ॥

अथ भावकर्मप्रक्रिया ।

यक् चतुर्षु ॥ धातोर्भावे कर्मणि च यक्प्रत्ययस्तिबादिषु चतुर्षु परतः ॥ **आद् भुवि कर्मणि** ॥ अकर्मकाद्भावे सकर्मकाच्च कर्मण्याद्भवति ॥ भावस्यैकत्वादेकवचनमेव । युष्मदस्मदोः सामाना-धिकरण्याभावात्प्रथमः । नामाद्यविषयत्वेऽपि प्रथमातिक्रमे कारणा-भावात्प्रथमः । भूयते । भूयेत । भूयताम् । अभूयत । बभूवे ॥ **स्वरान्तानां हनग्रहदृशां च भावकर्मणोः सितासीस्यपामिड्वा स इण्वच्च** ॥ भाविषीष्ट—भविषीष्ट । भाविता—भविता । भाविष्यते-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

भविष्यते । अभाविष्यत-अभविष्यत । इण् तन्यकर्तरि ॥ धातोः तनि परे भावे कर्मणि च इण्प्रत्ययः। सेरपवादः॥ "लुक्" । अभावि । अकर्मकोऽप्युपसर्गवशात्सकर्मको भवति । सुखमनुभूयते स्वामिना ॥

लज्जासत्तास्थितिजागरणं वृद्धिक्षयभयजीवितमरणम् ।
शयनक्रीडारुचिदीप्त्यर्थं धातुगणं तमकर्मकमाहुः ॥
फलव्यापारयोरेकनिष्ठतायामकर्मकः ।
धातुस्तयोर्धर्मिभेदे सकर्मक उदाहृतः ॥
धातोरर्थान्तरे वृत्तेर्धात्वर्थेनोपसंग्रहात् ।
प्रसिद्धेरविवक्षातः कर्मणोऽकर्मिका क्रिया ॥

शीङोऽयङ् ये क्ङिति ॥ शय्यते । शिश्ये । शायिषीष्ट-शयिषीष्ट । अशायि ॥ अयकि ॥ ऋतो रिङ् भवत्यकारप्रत्यये यकि च ॥ घटः क्रियते । त्वं दुःखी क्रियसे । रागैर्विरागैः सुख्यहं क्रिये । चक्रे । भाव्यते । भावयांचक्रे । भावयामासे । भावयांबभूवे ॥ इण्वदिटि ञेर्लोपः ॥ भाविता-भावयिता । भाविष्यते-भावयिष्यते । अभावि, अभाविषाताम्-अभावयिषाताम् । सान्तात्तु बुभूष्यते । बुभूषांचक्रे । अबुभूषि । यङन्तात्तु बोभूय्यते । बोभूयांचक्रे । यङ्लुगन्तात्तु बोभूयते । बोभवांचक्रे । बोभाविषीष्ट-बोभविषीष्ट । स्तूयते विष्णुः । अस्तावि, अस्ताविषाताम्-अस्तोषाताम् । अर्यते । आरे । आरिषीष्ट-ऋषीष्ट । आरिष्ठाः-आर्थाः। स्मर्यते । स्मारिता-स्मर्ता । इज्यते । ईजे । यक्षीष्ट । यष्टा ॥ तनोतेर्वा आत्वं यकि ॥ तायते-तन्यते ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

तनिषीष्ट । अतानि । जायते-जन्यते ॥ तपो नेण् कर्मकर्तर्यनुतापे च ॥ अन्वतप्त देवदत्तः पापेन ॥ "दादेरिः" । दीयते । ददे ॥ आतो युक् ॥ इणि ञ्णिति कृति च ॥ दायिषीष्ट-दासीष्ट । अदायि, अदायिषाताम्-अदिषाताम् । धीयते । स्थीयते । अग्लायि । हन्यते ॥ "हनो घ्ने" ॥ घानिषीष्ट, वधिषीष्ट, । घानिता-हन्ता । अघानि, अघानिषाताम्-अहसाताम् । अवधि, अवधिषाताम् ॥ इण्वदिटो न दीर्घः ॥ ग्राहिता-ग्रहीता ॥ दर्शिषीष्ट-दृक्षीष्ट । दर्शिता-द्रष्टा।अदर्शि, अदर्शिषाताम्-अदृक्षाताम् । शम्यते मुनिना ॥ मान्तस्य सेटो न वृद्धिरिणि ञ्णिति कृति च न त्वाचामिकमिवमीनाम् ॥ अशमि । अदमि । आचामि । अकामि । अवामि । ञ्यन्तात्तु शम्यते मोहो मुनिना । शमयांचक्रे ॥ मितां ञ्यन्तानामिणि णमि च वा दीर्घः ॥ शामिता-शमिता । शमयिता । अशामि, अशामिषाताम्-अशमयिषाताम् । वध हिंसायाम् । वध्यते "जनिवध्योर्न वृद्धिः" ॥ अवधि ॥ भञ्जेरिणि नलोपो वा ॥ अभाजि-अभञ्जि ॥ लभेरिण्णमोर्नुम्वा ॥ अलम्भि-अलाभि ॥

गौणे कर्मणि दुह्यादेः प्रधाने नीहृकृष्वहाम् ।
बुद्धिभक्षार्थयोः शब्दकर्मकाणां निजेच्छया ।
प्रयोज्यकर्मण्यन्येषां ञ्यन्तानां लादयो मताः ॥

गौर्दुह्यते पयः । धुक्षीष्ट । अजा ग्रामं नीयते, ह्रियते, कृष्यते, उह्यते, बोध्यते माणवकं धर्मः, माणवको धर्ममिति वा । भोज्यते माण-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

वक्मोदनः, ओदनं माणवको वा । पाठ्यते माणवकं वेदः, माणवको वेदमिति वा । देवदत्तो ग्रामं गम्यते ॥ अकर्मकाणां कालादिकर्मकाणां भावे कर्मणि च लकारः ॥ मासं, मासो वाऽऽस्यते देवदत्तेन । क्रोशः, क्रोशं वाऽऽस्यते । कुरवः, कुरून् वाऽऽस्यते । गोदोहं, गोदोहो वाऽऽस्यते । ण्यन्तात्तु प्रयोज्ये प्रत्ययः । मासमास्यते माणवकः ॥ इति भावकर्मप्रक्रिया ॥

अथ कर्मकर्तृप्रक्रिया ।

यदा सौकर्यातिशयं द्योतयितुं कर्तृव्यापारो न विवक्ष्यते तदा कारकांतराण्यपि कर्तृसंज्ञां लभन्ते । साध्वासिश्छिनत्ति । काष्ठानि पचन्ति । स्थाली पचति । पच्यते ओदनेन । अपाचि । भिद्यते काष्ठेन । अभेदि । लेनोक्ते कर्मकर्तरि यगादिच्चिण्वदिटः । पच्यते ओदनः । अपाचि । भिद्यते काष्ठम् । अभेदि ॥ द्विकर्मकाणां न ॥ अजा ग्रामं नयति ॥ दुहिपच्योः सकर्मकयोर्वा ॥ दुहस्नुनमां कर्मकर्तरि यगिणौ न ॥ गौः पयो दुग्धे॥स्वरान्तानां कर्मकर्तरीण् वा तानि॥ अकारि–अकारिष्ट–अकृत कटः स्वयमेव ॥ दुहश्च ॥ अदोहि-अधुक्षत–अदुग्ध । उदुम्बरः फलं पच्यते–पचति । प्रस्नुते गौः । "स्नुक्रमोराति नेट्" प्रास्नाविष्ट–प्रास्नोष्ट । नमते दण्डः। अनंस्त ॥ सृजेः श्रद्धोपपन्ने कर्तरि वा ॥ सृज्यते स्रजं भक्तः । असर्जि ॥ युजेर्वा ॥ युज्यते ब्रह्मचारी योगं युनक्ति वा ॥ भूषावाचिनां किरादीनां सान्तानां च यगिणिण्वदिटो न ॥ अलंकुरुते

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

कन्या । अलमकृत । अवकिरते हस्ती । अवाकरीष्ट—अवाकरिष्ट—अवाकीर्ष्ट । अवगिरते पुष्पम् । अवागीर्ष्ट । आद्रियते दानम् । आदृत । ध्रियते । अधृत । पृच्छते । अपृष्ट । चिकीर्षते कटः । चिकीर्षाञ्चक्रे । चिकीर्षांबभूवे । अचिकीर्षिष्ट । णिश्रिग्रन्थिब्रूञात्मनेपदाकर्मकाणां यगिणौ न ॥ कारयते कटः स्वयमेव । कारिषीष्ट । अचीकरत । उच्छ्रयते दण्डः । उदशिश्रियत । ब्रूते कथा । अवोचत । ग्रन्थते ग्रन्थः । अग्रन्थिष्ट । विकुर्वते सैन्धवाः । व्यकारिष्ट । व्यकृत । कुषिरञ्जोः कर्मकर्तरि वा तिबादौ ॥ कुष्यति, कुष्यते वा पादः । अकोषि । रज्यति, रज्यते वा वस्त्रम् । अरञ्जि ॥ इति कर्मकर्तृप्रक्रिया ॥

अथ लकारार्थप्रक्रिया ।

स्मृतिवाचिन्युपपदे भूतानद्यतने धातोर्लृट् । लङोऽपवादः ॥ स्मरसि कृष्ण गोकुले वत्स्यामः ॥ यद्योगे उक्तं न ॥ अभिजानासि कृष्ण यद्वनेऽभुञ्ज्महि ॥ उत्तमपुरुषे चित्तविक्षेपादिना पारोक्ष्यम् सुप्तोऽहं किल विललाप ॥ अत्यन्तापह्नवे लिट् ॥ त्वं कलिङ्गेष्ववात्सीः । नाहं कलिङ्गाञ्जगाम ॥ हशश्वतोर्लङ्विषये लङ्लिटौ ॥ इति हाकरोत् चकार वा । शश्वदकरोत् चकार वा ॥ आसन्नकाले पृच्छ्यमानेऽर्थे लङ्लिटौ ॥ अगच्छत् किम् । जगाम किम् । अनासन्ने तु कंसं जघान किम् ॥ स्मे लट् ॥ लिटोऽपवादः ॥ यजति स्म युधिष्ठिरः । भूतानद्यतने लट् स्मयोगे । एवं स्म पिता ब्रवीति ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

ननौ पृष्टप्रतिवचने ॥ भूते लट् ॥ अकार्षीः किम् । ननु करोमि भोः । नन्वोर्वा ॥ अकार्षीः किम् । न करोमि । नाकार्षम् । अहं नु करोमि । अहं न्वकार्षम् ॥ पुराशब्दयोगे भूतानद्यतने वा लुङ्-लटौ न तु स्मयोगे ॥ वसन्तीह पुरा छात्राः, अवात्सुः, अवसन्, ऊषुर्वा । यजति स्म पुरा युधिष्ठिरः ॥ यावत्पुरानिपातयोर्भविष्यति लट् ॥ यावद् भुङ्क्ते । पुरा भुङ्क्ते । भोक्ष्यसे, भोक्ता वा ॥ कदाकर्ह्योर्वा भविष्यति लट् ॥ कदा कर्हि वा भुङ्क्ते, भोक्ष्यसे, भोक्ता वा ॥ वर्तमानसामीप्ये भूते भविष्यति च वर्त्तमानवद्वा ॥ कदा आगतोऽसि । अयमागच्छामि, अयमागमम् । कदा गमिष्यसि। एष गच्छामि, गमिष्यामि वा ॥ क्षिप्रवचने लृट् ॥ वृष्टिश्चेत् क्षिप्रमाशु त्वरितं वा आयास्यति तदा शीघ्रं वप्स्यामः ॥ गर्हायां लडपिजात्वोः कालत्रये ॥ अपि जायां त्यजासि जातु गणिका-माधत्से वा ॥ कथमि लिङ्लटौ गर्हायां कालत्रये ॥ कथं धर्मं त्यजेस्त्यजसि वा ॥ जातुयद्यदायदियोगे लिङ् ॥ लटोऽपवादः॥ जातु, यद्, यदा, यदि वा त्वादृशो हरिं निन्देत्, नावकल्पयामि, न मर्षयामि ॥ उताप्योर्बाढार्थयोर्लिङ् कालत्रये ॥ उत अपि वा हन्यादघं हरिः ॥ स्वाभिप्रायाविष्करणे गम्ये लिङ् कालत्रये न तु कच्चिति ॥ कामो मे भुञ्जीत भवानिति । कच्चिदिति किम् ॥ कच्चिज्जीवति मे माता ॥ हेतुहेतुमतोर्भविष्यति लिङ् वा ॥ कृष्णं भजेच्चेत्सुखं यायात् । कृष्णं नंस्यति चेत्सुखं यास्यति ॥ इच्छार्थेषु

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

लिङ्लोटौ कामप्रवेदने ॥ इच्छामि भुञ्जीत, भुङ्क्तां वा भवान् ॥ इच्छार्थेभ्यो लिङ्लटौ वर्तमानार्थे ॥ कामयेत । कामयते ॥ पौनःपुन्ये भृशार्थे च धातोर्लोट् सर्वलकारविषये तस्य हिस्वौ सर्वतुबादिविषये तध्वमोर्विषये वा क्रियासमभिहारे द्वित्वं तस्यैव धातोरनुप्रयोगश्च ॥ अनेकक्रियासमुच्चये वा लोट् तस्य हिस्वौ तध्वमोर्विषये वा ॥ समानार्थस्य धातोरनुप्रयोगोऽनुप्रयोगात्तिबादयः ॥ याहियाहीति याति । एवं यातः, यान्ति । यासि, याथः, याथ । यात यातेति यूयं याथ । यामि, यावः, यामः । याहि याहीति यास्यति । अयासीत् । अधीष्वाधीष्वेत्यधीते । एवमन्यत्रापि। ध्वंविषये प्राग्वत् । पक्षे अधीध्वमधीध्वमिति यूयमधीध्वे।सक्तून् पिब धानाः। खादेत्यभ्यवहरति । पिबत खादतेत्यभ्यवहरथ । अन्नं भुङ्क्ष्व । दाधिकमास्वादयस्वेत्यभ्यवहरते । भुङ्ग्ध्वमास्वादयध्वमित्यभ्यवहरध्वे ॥ इति लकारार्थाः ॥

इति तिङन्तप्रकरणं समाप्तम् ।

अथ पूर्वकृदन्ताः ।

कृत्कर्तरि ॥ वक्ष्यमाणाः प्रत्ययाः कृत्संज्ञकास्ते च कर्तरि भवन्ति ॥ **तृव्वुणौ** ॥ धातोः । पक्ता ॥ **कृतः** ॥ वसादेः कृत इट् ॥ कुटिता।एधते इति एधिता।गोपायिता—गोपिता-गोप्ता।सहिता—सोढा ॥ एषिता—एष्टा ॥ **युवोरनाकौ** । पाचकः । भावकः ॥ " आतो युक् "

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

दायकः । धातकः । जनकः । घटकः । दरिद्रायकः । कोटकः । शमकः । नियामकः ॥ क्रमेः कर्तर्यद्विषयात्कृत इण्न ॥ प्रक्रन्ता । नाम्युपधात्कः ॥ क्षिपः । बुधः । वृतः ॥ प्रीकृज्ञाभ्यश्च ॥ " मुधातोः "। प्रियः । किरः । ज्ञः ॥ उपसर्गे आदन्तात् ॥ प्रदः । सुज्ञः । सुग्लः । पचिनन्दिग्रहादेरयुणिनि । पचादेरः। नन्द्यादेर्युः । ग्रहादेर्णिनिः । पचः । वदः । चलः । पतः । चरः ॥ चरिचलिपतिवदीनां वा द्वित्वं पूर्वस्यागप्रत्यये ॥ चराचरः । चलाचलः । पतापतः । वदावदः ॥ हन्तेर्हस्य घत्वं च ॥ घनाघनः । पाटेर्ञ्लुक् चोक् च दीर्घश्च पूर्वस्य ॥ पाटूपटः । हनः । पाटः । नन्दनः । वामनः । क्रमणः । दूषणः । साधनः । वर्धनः । शोधनः । रोचनः । रावणः । सहनः । तपनः । दमनः । जल्पनम् । लवणम् । णत्वं निपात्यम् । कोचनः । कुच शब्दे चुरादिः । म्लेच्छ अव्यक्ते शब्दे । म्लेच्छनः । ग्राही । उत्साही । उद्भासी । स्थायी । मायी । मन्त्री । अयाची । अवाची । अपराधी । दृशादेः शः ॥ दृश्पाघ्राध्माधेड्भ्यः शः ॥ शिति चतुर्वत् ॥ चतुर्षु तिवादिषु यत्कार्यमुक्तं तच्छिति परे भवति ॥ पश्यः । धयः । धमः । जिघ्रः । पिबः । घ्रः संज्ञायां न । व्याघ्रः । अनुपसर्गेभ्यो लिम्पाविन्दधारिपारिवेद्युदेजिचेतिसातिसाहिभ्यः शः ॥ लिम्पः । विन्दः । धारयः । पारयः । वेदयः । उदेजयः । चेतयः । सातिः सुखे । सातयः ॥ साहयः ॥ नौ लिम्पेः ॥ निलिम्पा देवाः ॥ गवादिषु

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

विन्देः संज्ञायाम् ॥ गोविन्दः । अरविन्दम् ॥ दाञ्धाञोर्वा ॥ ददः। दधः ॥ ज्वालादेर्णः ॥ ज्वालः। तापः ॥ श्यादेश्च ॥ अवश्यायः। दायः ॥ धायः ॥ कार्येऽणू ॥ कर्मण्युपपदे धातोरण् ॥ कुम्भकारः ॥ ह्वावामाभ्यश्च ॥ स्वर्गह्वायः। तन्तुवायः । धान्यमायः॥ शीलिकामिभक्ष्याचरिक्षमीक्षिभ्यो णः ॥ मांसशीला । मांसकामा । मांसभक्षा । कल्याणाचारा । बहुक्षमा । सुखप्रतीक्षा ॥ आतो डः ॥ कर्मण्युपपदे आदन्ताड्डः॥ गोदः। धनदः। पार्ष्णित्रः॥ नाम्नि च ॥ नाम्न्युपपदे धातोर्डः ॥ द्विजः । द्विपः । गृहस्थः । गिरिशः । पादपः ॥ शुचः शूद्रे ॥ शुचं द्रवतीति शूद्रः ॥ उरसो लोपो मुम्वा डान्ते गमौ ॥ उरगः—उरङ्गः ॥ विहायसो विहो मुम्वा डान्ते गमौ ॥ विहगः—विहङ्गः ॥ भुजतुरयोर्मुम्वा डान्ते गमौ ॥ भुजगः—भुजङ्गः ॥ तुरगः—तुरङ्गः ॥ सम्प्रसारणिभ्यो डः ॥ कापवादः । प्रज्यः । आह्वः । प्रह्वः ॥ तुन्दशोकयोः परिमृजापनुदोरालस्यसुखाहरणयोः कः ॥ तुन्दपरिमृजोऽलसः शोकापनुदः । सुखस्याहर्ता ॥ मूलविभुजादेः कः ॥ मूलानि विभुजतीति मूलविभुजो रथः । कुध्रः । महीध्रः । गिरः । गिलः ॥ गष्टक् ॥ सामगः । सामगी स्त्री ॥ पिबतेः सुराशीध्वोः ॥ सुरापी । शीधुपी ॥ अटौ नाम्नि कार्ये च ॥ अकारटकारौ प्रत्ययौ ॥ अस्थिहरः श्वा । कवचहरः कुमारः । धनुर्धरो युवा । कुरुचरः। पुरःसरः । अग्रेसरः । पार्श्वशयः । पृष्ठशयः । शक्तिग्रहः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

पूजार्हा । स्तम्बेरमो हस्ती । कर्णेजपः सूचकः । यशस्करी विद्या । श्राद्धकरः । वचनकरः । कर्मकरः । दिवाकरः । निशाकरः ॥ **इ खखि** ॥ **नाम्नि कार्ये च** ॥ शकृत्करिः । स्तम्बकरिः । फलानि गृह्णातीति फलेग्रहिः । फलस्यैदन्तत्वं निपातनात् । दृतिहरिः । नाथहरिः । देवापिः । वातापिः । **खिति पदस्य** ॥ खिति परे अनव्ययपूर्वपदस्य मुम् ॥ सर्वंकषः । कूलंकषः । करीषंकषः ॥ **वाचंयमादयो निपात्याः** ॥ वाचंयमः । पुरन्दरः । द्विषंतपः । परंतपः । कुक्षिंभरिः । उदरंभरिः आत्मंभरिः ॥ **आशिते भुवो भावकरणयोः खः** ॥ आशितेन भूयते आशितंभवः । आशितो भवत्यनेनेति वा ॥ **एजां खश्** ॥ जनानेजयतीति जनमेजयः । आत्मानं पण्डितं मन्यते इति पण्डितंमन्यः । मुञ्जं धयतीति मुञ्जंधयः । कूलंधयः । **खशन्ते पूर्वपदस्यानव्ययस्य ह्रस्वः** ॥ मुष्टिं धमतीति मुष्टिन्धमः । नाडिंधमः । नासिकन्धयः । अनव्ययस्य किम् । दिवामन्या रात्रिः । दोषामन्यमहः । कूलमुद्रुजः । कूलमुद्वहः । अरुन्तुदः ॥ **दारावाहनोऽणन्तस्य च टः संज्ञायाम्** ॥ "हनो घत्" ॥ "उ वम्" ॥ दारु आहन्तीति दार्वाघाटः । **चारौ वा** ॥ चार्वाघाटः । चार्वाघातः । **कर्मणि सम्पूर्वाच्च** ॥ वर्णान् संहन्तीति वर्णसंघाटः—वर्णसंघातः । पदं संहन्तीति पदसंघाटः—पदसंघातः ॥ **जायापत्योष्टग्लक्षणवति कर्तरि** ॥ "गमां स्वरे" ॥ "हनो घ्ने" ॥ जायां हन्तीति जायाघ्नो ना । पतिघ्नी स्त्री ॥ **अमनुष्यकर्तृके च** ॥ पतिघ्नी

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

पाणिरेखा । जायाघ्नस्तिलकालकः ॥ पाणिघताडघौ शिल्पिनि निपात्यौ ॥ पाणिघः । ताडघः । शिल्पिनि किम् । पाणिघातः । ताडघातः ॥ राजघश्च ॥ राजानं हन्तीति राजघः ॥ भजां विण् ॥ वेः ॥ वेर्लोपः ॥ अर्द्धभाक् । सुखभाक् । तुराषाट् । भारवाट् । अभूततद्भावे कृभ्वस्तियोगे नाम्नश्च्विः ॥ च्वौ दीर्घ ई चास्य ॥ च्वौ परेऽवर्णस्य ईः इदुतोर्दीर्घः ॥ मिथुनीकरणम् । शुक्लीभावः। शुचीभवति । सहायीस्यात् । हेतूकृतम् ॥ च्वौ सलोपः॥ सुमनीभावः । अरूकरोति । चक्षूकरोति । सुचेतीभावः । विरहीभवति । विरजीकरोति ॥ क्वचिड्डा । सुखं करोतीति सुखाकरोति । दुःखाकरोति ॥ शम्बाकरोति । द्विगुणाकरोति । बीजाकरोति । अव्ययस्य च्वावीत्वं न ॥ दोषाभूतमहः । दिवाभूता रात्रिः । "हसात्परस्य यकारस्य लोपश्च्वौ" । अगार्ग्यो गार्ग्यो भवति गार्गीभवति ॥ "रीङ् ऋतः" ॥ मात्रीकरोति ॥ च्विविषये साद्वा ॥ सात्पदाद्योः ॥ सस्य षत्वं न ॥ अग्निसाद्भवति अग्नीभवति ॥ संपदा योगे च ॥ जलसात्संपद्यते ॥ अधीने च ॥ राजसात्संपद्यते ॥ देये त्रा च ॥ विप्राधीनं देयं करोति विप्रत्राकरोति । विप्रत्रासम्पद्यते । विप्रसात्करोति ॥ देवमनुष्यपुरुषपुरुमर्त्येभ्यो द्वितीयासप्तम्यन्तेभ्यो वा त्रा ॥ देवत्रा वन्दे । देवं वन्दे ॥ ख्युट् करणे ॥ आढ्यसुभगस्थूलपलितनग्नान्धप्रियेषु च्व्यर्थेषूपपदेषु कृञः करणेऽर्थे ख्युट् प्रत्ययः॥ अनाढ्यमाढ्यं करोत्यनेनाढ्यंकरणम् । सुभगंकर-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

णम् । स्थूलंकरणं दधि । पलितंकरणम् । नग्नंकरणं द्यूतम् । अन्धंकरणम् । प्रियंकरणम् ॥ भुवः खिष्णुखुकञणौ कर्तरि ॥ अनाढ्य आढ्यो भवति आढ्यंभविष्णुः। आढ्यंभावुकः ॥ आतो मनिप्क्वनिब्वनिपः ॥ नाम्न्युपपदे आदन्ताद्धातोरेते प्रत्ययाः स्युः॥ सुदामा। अश्वे तिष्ठतीति अश्वत्थामा । निपातात्सस्य तः । स्थामि ॥ तादौ किति दोसोमास्थामिर्भवति ॥ शाछोर्वा ॥ अपिद्धाधागैहाकूपिबतीनामीः ॥ किति हसे क्विपि वा न तु क्यपि ॥ सुपीवा । घृतपीवा । भूरिदीवा । अनादन्तादपि । अपिशब्दान्निरुपपदेभ्योऽपि । सुकर्मा ॥ ह्रस्वस्य पिति कृति तुक् ॥ प्रातरित्वा । वनिपि ॥ ञमस्यात्वम् ॥ विशेषेण जायते विजावा । ओणृ । ओणतीत्यवावा। पारदृश्वा । राजयुध्वा । सुत्वा । धीवा । पीवा ॥ क्विप्॥ धातोः क्विप्स्यात् ॥ कर्मकृत् ॥ "मो नो धातोः ॥" प्रशान् । प्रदान् । अग्निचित् । सोमसुत् । सोमपाः । सर्वदृक् । दिश अतिसर्जने । दिक् । क्विप् वचिप्रच्छचायतस्तुकटप्रुजुश्रीणां दीर्घोऽसंप्रसारणं च । सुवाक् । "क्ङिति झसे क्वौ ञमे छस्य शो वस्य ऊः" । तत्त्वप्राट् । तत्त्वप्राशौ । आयतस्तूः । कटप्रूः । जु गतौ । जूः । श्रीः ॥ ध्यायतेः क्विपि संप्रसारणम् ॥ सुधीः ॥ गमादीनां ञमस्य लोपः ॥ क्विपि क्यपि वा । अङ्गगत् । परीतत् । संय्यत् । सुनत् ॥ ऊङ् च ॥ अग्रेगूः । अग्रेभ्रूः । द्युतिगमिजुहोतीनां क्विपि द्वित्वम् ॥ दिद्युत् । जगत् । जुहोतेर्दीर्घः ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

जुहूः ॥ पदान्तस्यानितेर्नस्य णत्वमुपसर्गस्थान्निमित्तात् ॥ अन प्राणने । हे प्राण् । मित्राणि शास्तीति मित्रशीः ॥ आशासः क्वावुपधाया इत्वम् ॥ आशीः । गीः । पूः ॥ इस्मन्त्रन्क्विषु च्छादेर्ह्रस्वः ॥ छद अपवारणे । चुरादिः । तनुं छादयतीति तनुच्छत् । अक्षद्यूः । रेफाच्छ्वोर्लोपः ॥ क्वौ झसादौ हे च प्रत्यये ॥ मूः, मुरौ । धूः, धुरौ । दुहः क्वौ घोऽन्तादेशश्च ॥ कामदुघा ॥ दृशेष्टक्सक्वौ चोपमाने कार्ये ॥ उपमाने कर्मण्युपपदे दृशेष्टक्सक्वौ चात्क्विप् ॥ आ सर्वादेः ॥ एषु परेषु सर्वादेष्टेरात्वम् ॥ अन्यादृशः । अन्यादृक्षः। अन्यादृक् । तादृशः। तादृक्षः। तादृक् ॥ किमिदमः कीश् ॥ कीदृशः । कीदृक्षः। कीदृक् । ईदृक्षः । ईदृशः । ईदृक् । भवादृशः । भवादृक्षः । भवादृक् । यादृक् ॥ अदसोऽमूः ॥ अदसोऽमूः स्याद्दृक्दृशदृक्षेषु ॥ अमूदृक्षः । अमूदृशः । अमूदृक् । मादृशः । मादृक्षः । मादृक् । त्वादृशः । त्वादृक्षः । त्वादृक् । युष्मादृशः । युष्मादृक्षः । युष्मादृक् । अस्मादृशः "समानस्य सः" ॥ सदृशः । सदृक्षः । सदृक् ॥ णिनिरतीते ॥ धातोरतीते काले शीले च णिनिः ॥ अग्निष्टोमेनायाक्षीत् यजनशीलो वा अग्निष्टोमयाजी । पितृव्यघाती । उष्णभोजी ॥ व्रते च ॥ स्थण्डिलशायी । क्विब्वनीब्डाः ॥ धातोरतीते शीले चैते ॥ ब्रह्महा । भ्रूणहा । वृत्रहा । सुकृत् । धर्मकृत् । पापकृत् । अग्निचित् । सोमसुत् । यज्वा । सरसिजम् । सरोजम् । संस्कारजः । प्रजा । अजः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

द्विजः । परितः खाता परिखा ॥ **क्तक्तवतू** ॥ धातोरतीते काले क्तक्तवतू एतौ स्तः ॥ भावकर्मणोः क्तः ॥ स्नातम् । कृतः कटः। विष्णुर्विश्वं कृतवान्॥**गत्यर्थादकर्मकाच्च कर्तरि क्तः**।भावकर्मणोरपि। गंगां गतः । स्थितः । "ञमान्तस्योपधाया दीर्घः क्ङिति झसे क्वौ च ॥ " शान्तः । दान्तः ॥ **श्लिषशीङ्स्थाऽऽसवसजनरुहजीर्यतिभ्यश्च** ॥ रामः सीतामाश्लिष्टः । शेषमधिशयितः । स्वर्गमधिष्ठितः। हरिमुपासितः । हरिदिनमुपोषितः। तमनुजातः । वृषभमारूढः । जगदनुजीर्णः ॥ **क्तो वा सेट्** ॥ उदुपधात्सेट् क्तो वा कित् ॥ द्युतितम्–द्योतितम् । प्रमुदितः–प्रमोदितः साधुः ॥ **शीङ्स्विदिमिदिक्ष्विदिधृषमृषपूङः सेटौ क्तक्तवतू कितौ न** ॥ शयितः । शयितवान् । प्रस्वेदितः। प्रस्वेदितवान् । क्ष्वेदितः । क्ष्वेदितवान् । धर्षितः। धर्षितवान् ॥ **मृषा क्षान्तौ** ॥ मर्षितः । मर्षितवान् ॥ **पूङो वा कितस्तस्येट्** ॥ पवितः–पूतः । पवितवान्–पूतवान् ॥ **कितः** ॥ उवर्णान्तादृवर्णान्तादेकस्वरात् श्विश्रिभ्यां च परस्य कितस्तस्य इण्न॥ भूतः । वृतः । श्रितः । **श्वयतेः संप्रसारणस्य दीर्घः किति ते** ॥ शूनः । **वेञो ह्रस्वः किति ते** ॥ उतम् ॥ **आदीदितः** ॥ आदित ईदितश्च क्तक्तवत्वोर्नेट् ॥ **ञीतां तक् वर्तमानेऽपि** ॥ ञीतां धातूनां मतिबुद्धिपूजार्थानां च वर्तमानेऽपि तक् ॥ राज्ञां मतः । बुद्धः । इष्टः ॥ **दस्तस्य नो दश्च** ॥ दकारात्परस्य कितस्तस्य नत्वं दकारस्य च ॥ मेदितम्–मिन्नम् ॥ **भावे कर्तरि चादितः क्तक्तवत्वो-**

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

रिङ्ग्वा ॥ मेदितः—मिन्नः । प्रस्वेदितः—प्रस्विन्नः क्ष्वेदितः—क्ष्विण्णः ॥ अदो जघ्धुः ॥ किति तकारे ॥ जग्धम् ॥ रः ॥ रेफात्कितस्तस्य नत्वम् ॥ विकीर्णम् । जीर्णम् ॥ ल्वाद्योदितश्च ॥ ल्वादेरोदितश्च धातोः कितस्तस्य नो भवति ॥ लूनः । लूनवान् । ज्या वयोहानौ । जीनः ॥ प्यायः पीति किति ॥ पीनः ॥ भुजो कौटिल्ये । भुग्नः । हीनः । स्वादय ओदितः । पूङ् प्राणिप्रसवे । सूनः । सूनवान् । दूङ् परितापे । दूनः । गीनः । डीङ् । उड्डीनः । दीनः । लीनः । व्रीणः । रीणः । धीनः ॥ दुग्वोर्दीर्घश्च ॥ दूनः । गूनः ॥ क्षियो दीर्घः कर्तरि क्तक्तवत्वोर्नत्वं च ॥ क्षीणः । क्षीणवान् । कर्तरि किम् । क्षितम् ॥ यलसंयोगादेरादन्तात्कितस्तस्य नत्वम् ॥ द्राणः । ग्लानः । म्लानः ॥ नुदाविदोन्दत्राघ्राह्रीनिर्वाभ्यो वा ॥ त्राणः—त्रातः । घ्राणः—घ्रातः । ह्रीणः—ह्रीतः । नुत्तः—नुन्नः ॥ विद विचारणे । वित्तः—विन्नः । उन्दी क्लेदने । उत्तः—उन्नः ॥ निर्वाणो मुनिवह्न्यादौ निर्वातस्तु गतेऽनिले ॥ दो दत्ति ॥ दा इत्यस्य दथ् किति तकारे न तु पितः ॥ दत्तः । दत्तवान् ॥ स्वरात्तो वा । स्वरान्तादुपसर्गादुत्तरस्य दा इत्यस्य तो वा किति तकारे न तु पितः ॥ प्रत्तः—प्रदत्तः । अवत्तः—अवदत्तः । नाम्यन्तोपसर्गस्य दीर्घो दादेशे तकारे ॥ सुष्ठु अदायि सूत्तम् । नीत्तम् ॥ धाञो हिः किति ते ॥ निहितः ॥ ध्याख्यापॄमूर्च्छिमदिभ्यो न नत्वम् ॥ ध्यातः । ख्यातः । पूर्तः । मूर्तः । मत्तः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

यज । इष्टम् । उप्तम् । ऊढः । व्येञ् । वीतः । ह्वेञ् । हूतः । उदितः । उक्तः ॥ **वसतिक्षुधोरिट्** ॥ **क्तात्क्तवतूनाम्** ॥ उषितः । क्षुधितः । क्षुप्तः । **क्वचिद्धेटः क्तक्तवत्वोर्नेट्** ॥ व्रश्चू । वृक्णः ॥ **अञ्चेः पूजायामिट्** ॥ अञ्चितः । जातः ॥ **पचो वः** ॥ **क्तक्तवत्वोस्तस्य** ॥ पक्वः । पक्ववान् ॥ **क्षायो मः** ॥ क्षामः । क्षामवान् । **प्रस्त्यः संप्रसारणं किति तस्य मो वा** ॥ प्रस्तीमः । प्रस्तीतः । **शुषेः कः** ॥ शुष्कः । शुष्कवान् ॥ **स्फायः स्फीति किति** ॥ स्फीतः । धेट् । धितम् । गीतम् । पीतम् । दो । दितम् । सो । सितम् । मितम् । **सेटो क्तक्तवत्वोर्णिलोपः** ॥ चोरितः । चोरितवान् । पाचितः । पाचितवान् ॥ **ऊर्णोतेर्नेट्** ॥ ऊर्णुतः । **द्रवस्य काठिन्येऽस्पर्शे चार्थे श्यैङः संप्रसारणं कितस्तस्य नत्वं च न तु स्पर्शे** ॥ शीनं घृतम् । स्पर्शे तु शीतं जलम् ॥ **अञ्चेः कितस्तस्य नत्वं न त्वपादाने** ॥ समक्नः । अन्यत्रोदक्तमुदकं कूपात् ॥ **दिवोऽविजिगीषायाम्** ॥ आद्यूनः । विजिगीषायां तु द्यूतम् ॥ **अनुपसर्गात्फुल्लक्षीबकृशोल्लाघा निपात्यन्ते** ॥ फुल्लः । फुल्लवान् । क्षीव् मदे । क्षीवो मत्तः । कृशस्तनुः । लाघृ शोषणालमर्थयोः ॥ उल्लाघो नीरोगः । उपसर्गात्तु ॥ **चरफलोरत उत्ति किति** ॥ प्रफुल्तः । प्रक्षीबितः । प्रकृशितः । प्रोल्लाघितः । चर । चूर्णः ॥ **उत्फुल्लसंफुल्लौ च** ॥ **वित्तो भोगप्रतीतयोः** ॥ वित्तं धनम् । वित्तः पुरुषः । अन्यत्र विन्नः ॥ **भित्तं शकलम्** ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

भिन्नमन्यत्र ॥ ऋणमाधमर्ण्ये ॥ ऋतमन्यत्र ॥ क्षुब्धस्वान्तध्वान्तलग्नम्लिष्टविरिब्धफाण्टबाढानि मन्थमनस्तमःसक्ताविस्पष्टस्वरानायासभृशेषु ॥ क्षुब्धो मन्थः । स्वन शब्दे । स्वान्तं मनः । ध्वान्तं तमः । लगे सङ्गे । लग्नं सक्तम् । म्लिष्टमविस्पष्टम् । रेभृ शब्दे । विरिब्धः स्वरः । फाण्टमनायाससाध्यः कषायविशेषः । बाहृ प्रयत्ने । बाढम् । भृशम् । अन्यत्र तु क्षुभितम् । स्वानितम् । ध्वनितम् । लगितम् । म्लेच्छितम् । विरेभितम् । फणितम् । बाहितम् ॥ धृष्टविशस्तावविनये ॥ धृष्टः । विशस्तः । अन्यत्र धर्षितः ॥ विशसितः ॥ दृढः स्थूलबलयोः ॥ दंहितो दृहितोऽन्यः । वृह वृहि वृद्धौ ॥ प्रभौ परिवृढः ॥ परिवृंहितः—परिवृहितोऽन्यः ॥ कृच्छ्रगहनयोः कषः ॥ कष्टम् । कष्टो मोहः । कष्टं शास्त्रम् । कषितमन्यत् ॥ घुष्टोऽविशब्दने ॥ घुष्टा रज्जुः । अविशब्दने किम् । घुषितं वाक्यम् ॥ अभ्यर्णमाविदूर्ये ॥ अभ्यर्दितमन्यत् ॥ क्षीरहविषोः पाके शृतम् ॥ अन्यत्र श्राणम्—श्रपितं वा ॥ दान्तादयो वा निपात्यन्ते ॥ दान्तः—दमितः । शान्तः—शमितः । पूर्णः—पूरितः । दसु उपक्षये । दस्तः—दासितः । स्पष्टः—स्पाशितः । छन्नः—छादितः । ज्ञप्तः—ज्ञपितः । रुष्टः—रुषितः । आन्तः—अमितः । तूर्णः—त्वरितः । संघुष्टः—संघुषितः । आस्वान्तः—आस्वनितः । हृष तुष्टौ । हृष्टम्—हृषितम् । अपचायितः—अपचितः । प्यानः—पीनः । ह्लादी सुखे ॥ ह्लादेर्ह्रस्वः क्तिति ते ॥ प्रह्लन्नः ॥ निनदीभ्यां स्नातेः

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

सस्य षः कौशले ॥ निष्णातः । नदीष्णः ॥ स्थैर्यंगतिभक्षणार्थेभ्योऽधिकरणेऽपि क्तः ॥ तथा च—

मुकुन्दस्यासितमिदमिदं यातं रमापतेः ।
भुक्तमेतदनन्तस्येत्यूचुर्गोप्यो दिदृक्षवः ॥

जीर्यतेरतृ ॥ जरन्, जरन्तौ ॥ क्वसुकानौ णबेवत् ॥ धातोरतीते काले एतौ भवतः । तौ च यथाक्रमं णबेवत् । द्वित्वम् ॥ "संयोगान्तस्य लोपः ॥" चक्रवान् ॥ "वसोर्व उः ॥" चक्रुषा ॥ "वसां रसे ॥" चक्रवद्भ्याम् । चक्राणः । भेजिवान् । जजागृवान् ॥ द्वित्वे सत्येकस्वरादादन्ताद्धसेश्च वसोरिट् नान्यस्मात् ॥ गमहनविदविशदृशां वा ॥ बभूवान् ॥ "भुवो वुक् ॥" बभूवुषः । बभूवुषा । अद भक्षणे । आदिवान् । ऋ गतौ । आरिवान् । डुदाञ् दाने। ददिवान् । ददरिद्रिवान् । वस्योत्वे इडभावः । आदुषः । जज्ञिवान् ॥ जक्षिवान् । जग्मिवान्—जगन्वान् । जग्मुषः । जघ्निवान्—जघन्वान् । जघ्नुषा । विविदिवान्—विविद्वान् । विविदुषः । विविशिवान्—विविश्वान् । ददृशिवान्—ददृश्वान् । ईयिवान् । सेदिवान् । ऊषिवान् । शुश्रुवान् । शुश्रुवुषः ॥ शतृशानौ तिप्तेवत्क्रियायाम् ॥ क्रियायां गम्यमानायां धातोः शतृशानौ भवतस्तौ च तिप्तेवत् ॥ पचन्नास्ते । पठँस्तिष्ठति । गायन्नागच्छति ॥ मुगानेऽतः ॥ अकारस्थाने मुगागमः स्यात् ॥ पचमानः पठति । मन्वानः । कुर्वाणः । "दादेरिः ।" पीयमानः सोमो भवता । दीयमाना गौः ॥ आसेरान

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

ईः ॥ आसेः परस्यान ईः स्यात् ॥ आसीनः ॥ वाऽदीपोः शतुः ॥ अवर्णात्परस्य शतुर्वा नुमीकारे ईपि च परे ॥ तुदन् सः । तुदती तुदन्ती कुले स्त्री वा ॥ अप्ययोरान्नित्यम् ॥ अप्प्रत्ययप्रत्ययसंबंधिनोऽवर्णात्परस्य शतुर्नुम्नित्यमीकारे ईपि च ॥ भवन् सः । भवन्ती॥ दीव्यन्, दीव्यंन्ती।दीव्यन्त्यौ गङ्गायमुने । द्विरुक्तानां जक्षादीनां च परस्य शतुर्नुम्न शौ वा ॥ ददत् । दधत् ॥ विदेर्वा वसुः ॥ वेत्तेः परस्य शतुर्वा वसुरादेशः ॥ विद्वान् । विदन् ॥ माङ्याक्रोशे॥ मा जीवन् ॥ लक्षणहेत्वोः क्रियायाः ॥ शयाना भुञ्जते यवनाः । अर्ज प्रतियत्ने चुरादिः । अर्जयन्वसाति॥भविष्यति स्यप् शतृशानपरः ॥ " हन्नृतः स्यपाः । " करिष्यन् । करिष्यमाणः ॥ ताच्छील्यवयोवचनशक्तिष्वानश् ॥ भोगं भुञ्जानः ॥ कवचं बिभ्राणः । शत्रुं निघ्नानः ॥ इङ्धार्योरकृच्छ्रिणि कर्तरि शतृ ॥ इङ् अध्ययने । अधीयन् । धृञ् धारणे । ञ्यन्तः । धारयन् । द्विष अप्रीतौ ॥ द्विषः शत्रौ ॥ द्वेष्टीति द्विषन् ॥ अर्हः पूजायाम् ॥ अर्हन् ॥ शीले तृन् ॥ कटं कर्ता । हृञ् । हर्ता ॥ इष्णुस्नुक्नुशीले ॥ अलंकरिष्णुः । निराकरिष्णुः । जनी । प्रजनिष्णुः । जिभुवोर्नङ्गुणौ स्नौ॥ जि जये । जिष्णुः । भूष्णुः । ग्लास्नुः । त्रसी । त्रस्नुः । गृध्नुः । ञिधृषा । धृष्णुः । क्षिप । क्षिप्नुः ॥ षाकोकणः ॥ शीलार्थे षाक उ उकण् प्रत्यया भवन्ति ॥ जल्पाकः । भिक्ष याच्ञायाम् । भिक्षाकः । कुट्ट छेदे । कुट्टाकः दुष्टः । लुण्ठ चौर्ये । लुण्ठाकः । वृङ्

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

संभक्तौ। वराकः भिक्षुः। आङः शसि इच्छायाम् ॥ "इदितो नुम्॥" आशंसुः। चिकीर्षुः। लष कान्तौ। लाषुकः। पत्लृ पतने। पातुकः ॥ " आतो युक् ॥" स्थायुकः। भावुकः। वृषु सेचने। वर्षुकः। घातुकः। कामुकः। शॄवन्द्योरारुः ॥ शॄ हिंसायाम्। शरारुः। वदि। वन्दारुः ॥ स्पृहिगृहिपतिदयिनिंद्रातन्द्राश्रद्धाशीङ्भ्य आलुः ॥ स्पृहयालुः। गृह ग्रहणे चुरादिः। गृहयालुः। पतयालुः। दय दाने। दयालुः। द्रा कुत्सायाम्। निद्रालुः ॥ तदो नान्तत्वं निपात्यते ॥ तन्द्रालुः। श्रद्धालुः ॥ शीङ्। शयालुः ॥ शमादिभ्यो घिनुण् ॥ शम उपशमे। शमी। तमी। दमी। भ्रमी। क्षमी। क्लमी। श्रमी। प्रमादी ॥ चजोः कगौ घिति ॥ चकारजकारयोः ककारगकारौ घिति॥ सम्पर्की। योगी। विवेकी। त्यागी। असि उसि अन अके घिनुणि रञ्जेर्नलोपो वाच्यः ॥ रागी। भागी। विकाशी। विलासी। प्रलापी। प्रसारी। मथ हिंसायाम्। प्रमाथी। प्रवासी ॥ निन्दादेर्वुञ् ॥ निन्दकः। हिंसकः। परिक्षेपकः। परिवादकः ॥ चलनशब्दार्थादकर्मकाद्युः ॥ चुप मन्दायां गतौ। चोपनः। चलनः। कम्पनः। शब्दनः। रवणः ॥ अनुदात्तेतो हसादेरकर्मकात् ॥ वर्तनः। रमणः ॥ ज्वादेश्च ॥ जु गतौ वेगे च। जवनः। सरणः। गर्धनः। क्रोधनः। रोषणः। मण्डनः। पूषणः ॥ ज्योदेरिनिः ॥ जयी। प्रजवी। दरी। क्षयी। दादेरुः ॥ दारुः। धारुः। सेरुः ॥ सृघस्यदः क्मरः ॥ सृमरः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

घस्मरः । अद्मरः ॥ **भञ्जभासमिदो घुरः॥**भङ्गुरः । भासुरः । मेदुरः । **विदिभिदिच्छिदेः कुरः** ॥ विदुरम् । भिदुरम् । छिदुरम् ॥ **इण्नशजिसर्तिभ्यः क्वरप्** ॥ "ह्रस्वस्य पिति कृति तुक्" इत्वरः । इत्वरी । नश्वरः । जित्वरः । सृत्वरः ॥ **गमेर्लोपश्च॥**गत्वरः ॥**जागर्तेरूकः** ॥ जागरूकः ॥ **यङ ऊकः** ॥ यजजपदशवदिभ्यो यङन्तेभ्यः ऊकः शीले ॥ लुक् ॥ ऊके सति यङो लुक् । यायजूकः । जञ्जपूकः । दंदशूकः । वावदूकः । **भियः क्रुक्लुकनौ** ॥ भीरुः । भीरुकः । भीलुकः ॥ **नमादे रः** ॥ नम्रः । स्मेरः । नञ्पूर्वाज्जसेः क्रियासातत्ये । अजस्रम् । कम्रः । हिंस्रः । दीप्रः ॥ **विन्दुरिच्छुरेतौ निपात्यौ** ॥ वेत्ति तच्छीलो विन्दुः । इच्छतीतीच्छुः ॥ **स्वपितृषिधृषेर्नजिङ्** ॥ स्वप्नक् । तृष्णक् । धृष्णक् ॥ **स्थादेर्वरः** ॥ स्थावरः । ईश्वरः । भास्वरः । पेस्वरः । कस्वरः ॥ **आदृतः किर्द्वेश्च भूते** ॥ आदन्तादृदन्ताज्जनिगमिनमिभ्यो यङन्तेभ्यः सासहिवावहिचाचलिपापतिभ्यः किप्रत्ययो भूते शीले धातोश्च द्वित्वम् । किर्लिङ्वद्वाच्यः ॥

> रामः सोमं पपिर्यज्ञे ददिर्गाश्चाक्रिरद्भुतम् ।
> याजकान्वव्रिराजह्निः पौण्डरीके महाद्विजान् ॥ १॥

जज्ञिः । नेमिः । जग्मिः । सासहिः । वावहिः । चाचलिः । पापतिः । इति पूर्वकृदन्ताः ।

अथोणादयः ।

कृादेरुण् ॥ कारुः । वातीति वायुः । पायुः । जायुः । मिनो-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

तीति मायुः । स्वद आस्वादने । स्वादुः । स्वाधुः । आशुः । दीर्यते इति दारु । सानु ॥जनेर्ञुण् ॥ जानु । चारु । चाटु । किं शृणातीति किंशारुः ॥ जरामेति जरायुः ॥ त्रो रस्य लः ॥ तरन्ति वर्णा अनेनेति तालु ॥ कृके वचः कश्च ॥ कृकेन गलेन वक्तीति कृकवाकुः ॥ म्रादेरुः ॥ मरुः । शमुः।तरुः । चरुः । त्सर छद्मगतौ । त्सरुः ।तनुः। धनुः । मयुः । वटुः । कटुः । अणुः । शृणातीति शरुः । स्वरुः । त्रपुः । असवः । वसुः । हनुः । बन्धुः । मनुः । विन्दुः ॥ स्यन्देः संप्रसारणं घश्च ॥ सिन्धुः । उन्देरिच्चादेः ॥ उनत्तीति इन्दुः ॥ स्कन्देः सलोपश्च ॥ कन्दुः ॥ सृजेस्सुम् सलोपश्च ॥ रज्जुः ॥ फलेर्गुक् च ॥ फल्गुः ॥ पाटेः पटिश्च ॥ पाटयतीति पटुः समर्थः ॥ मनेर्धश्च ॥ मन ज्ञाने । मधुः ॥ जनेस्तश्च ॥ जतु । वलेर्गुक् च ॥ वल प्राणने । वल्गुः ॥ नमेर्नाकिश्च ॥ नम्यतेऽनेनेति नाकुः ॥ श्यतेः कुः सवच्च ॥ शिशुः ॥ याभ्रोर्द्विश्च ॥ ययुः । बभ्रुः ॥ व्यधेः कुः ॥ विधुः ॥ कृग्रोरुरङ् च ॥ करोतीति कुरुः । गॄ शब्दे । गृणातीति गुरुः । रपेरस्येच्च ॥ अनिष्टं रपतीति रिपुः ॥ अर्जिदृशिकम्यामिपाशिबाधामृजिपशितुग्धुग्दीर्घहकाराश्च ॥ अर्जयति गुणानिति ऋजुः । सर्वानविशेषेण पश्यतीति पशुः । कमु कान्तौ । कन्तुः । अन्धुः । पांशुः । बाधते इति बाहुः । प्रथम्रदिभ्रस्जां संप्रसारणं सलोपश्च ॥ पृथुः । मृदुः ॥ न्यङ्क्वादेः कुः ॥ न्यङ्कुः । भृज्जति तपसा इति भृगुः ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

लंघिबंह्योर्नलोपश्च ॥ लघुः । बहि गतौ । बहुः ॥ वालमूललघ्वङ्गुलीनां वा लस्य रः ॥ वालः—वारः । मूलम्—मूरम् । लघुः—रघुः । अङ्गुलिः—अङ्गुरिः । ऊर्णोतेर्नुलोपश्च ॥ ऊरुः ॥ महति ह्रस्वश्च ॥ उरु महत् ॥ आङ्परयोः खनिशृभ्यां डिच्च ॥ आखनतीत्याखुः । शॄ हिंसायाम् । परान् शृणातीति परशुः ॥ द्रोश्च ॥ द्रवति ऊर्ध्वमिति द्रुः । शतधा द्रवतीति शतद्रुः ॥ मृगय्वादयो निपात्याः ॥ मृगं यातीति मृगयुः । शङ्कुः । नीलङ्गुः । कृमिविशेषः । मन्द्यादेरुरः ॥ मदि । मन्दुरा । वाशुरा । मथे हिंसायाम् । मथुरा । चते याचने । चतुरः । अङ्कुरः ॥ मद्गुरादयो निपात्याः ॥ माद्यतीति मद्गुरः । कर्बुरः। वन्धुरः । बन्धूरः । कुक्क वृक आदाने । कुक्कुरः । कुकुरः। असुरः । आसुरः । मसुरः । मसूरः ॥ शावशेराप्तौ ॥ शु इति आश्वर्थे । शु शीघ्रमश्नुते प्राप्नोति कन्यां यस्मात्सः श्वशुरः ॥ अविमह्योरिषट् ॥ अविषः । महिषः । महिषी राजपत्नी ॥ अमेर्दीर्घश्च ॥ अम गत्याम् । आमिषम् ॥ रुहेर्वृद्धिश्च ॥ रौहिषः ॥ किलेर्बुक् च ॥ किल शौक्ल्ये । केलतीति किल्बिषम् ॥ मद्यादेः किरः ॥ मदिरा । मुदिरः । मन्दिरम् । तिमिरम् । मिहिरः । छिदिरः । रुचिरम् । रुधिरम् । वध हिंसायाम् । वधिरः । सुषिरम् ॥ अजिरादयो निपात्याः ॥ अजिरम् । शश प्लुतगतौ । शशतीति शिशिरम् । श्रथ मोचने । शिथिलम् । स्थिरम् । स्फायी । स्फिरम् । स्थविरः । खदिरः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

शीङ् । शिबिरम् । सल गतौ । सलिलम् । अनिलः । महिला । कोकिलः । कमु । कपिलः । मथ्यन्ते रिपवोऽस्यामिति मिथिला ॥ कुबेरादयोऽपि ॥ कुबि आच्छादने । कुबेरः । कबृ वर्णे । कपोतः । भातेर्डवतुः ॥ भातीति भवान् ॥ किशोरादयो निपात्यन्ते ॥ किं शृणातीति किशोरः । कठ कृच्छ्रजीवने । कठोरः । चक तृप्तौ ॥ चकोरः । कपि । कपोलः । पटोलः ॥ मीनातेरूरः ॥ मयूरः ॥ स्यन्देः संप्रसारणम् ॥ सिन्दूरम् ॥ स्यादेस्तुः ॥ सेतुः । तन्तुः ॥ ओतुः । मसी परिणामे । मस्तुः । धातुः । षच समवाये । सचति समावेशयति चात्मनि जलमिति सक्तुः । क्रोष्टा ॥ अर्तेस्तुक् ॥ ऋतुः । मन्तुः । जनी प्रादुर्भावे । जन्तुः ॥ चायः किः ॥ केतुः । वस्तु ॥ आगारे णित् ॥ वास्तुः ॥ कृञः कतुः ॥ क्रतुः ॥ जीवेरातृको वृद्धिश्च ॥ जीवयति कुमुदानीति जैवातृकः ॥ कृषादेरूः ॥ कर्षूः । खर्ज व्यथने । खर्जूः ॥ वहो धश्च ॥ वहति प्राप्नोति धनमिति वधूः ॥ कपेश्छश्च ॥ कच्छूः ॥ कास्वादयः ॥ कस्यते हन्यतेऽनया कासूः । पद्यते प्राप्यतेऽनया पादूः । लभि गतौ । अलाबूः । कशेरूः । दर्द्रूः ॥ अन्द्वादयः । अन्दूः ॥ जनेर्बूक् ॥ जम्बूः । कर्कं दधातीति कर्कन्धूः । दिधिं धैर्यं स्यति दिधिषूः ॥ मृग्रोरुतिः ॥ मरुत् । गरुत् ॥ गिरतेरुतिस्तस्य सुट् ॥ गर्मुत् । चट भेदने । चटेरुलः ॥ चटुलम् ॥ ह्रादेरितिः ॥ हरित् । सरित् । युष सौत्रो धातुः । युष भजने । योषित् ॥ ताडेर्ण्डिलुक् च ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

तडित् ॥ **शमेर्ढः** ॥ शण्ढः ॥ **कमादेरठः** ॥ कमठः । जरठः । रमेर्वृद्धिश्च । रामठम् ॥ **शमेः खः** ॥ शङ्खः । **कणेष्ठः** । कण्ठः ॥ **वृषलादयः कलप्रत्ययान्ता निपात्याः** ॥ वृषलः । शप् । शबलः । पल गतौ । पललम् । सरलम् । तरलम् । कम्बलम् । मुस खण्डने । मुसलम् ॥ लगि गतौ ॥ **लगेर्वृद्धिश्च** ॥ लाङ्गलम् । कुट्मलम् । कुड्मलम् । कश्मलम् । कोमलम् । मृजू । मलम् । चुपू । चपलम् । शकलम् । शमलम् । छगलः ॥ **अमान्ताड्डः** ॥ दण्डः । रण्डा । खण्डः । मन्यतेः मण्डः । अण्डः । चण्डः । पण्डः ॥ **कवर्गादिभ्यः किच्च** ॥ गुङ् गतौ । गुडः । **स्थादेरालः** ॥ स्थालम् । स्थाली ॥ **पतिचण्डिभ्यामालञ्** ॥ पातालम् । चडि कोपे । चाण्डालः । **तमादिभ्यः कालः** ॥ तमालः । बिड भेदने । बिडालः । मृणयति कमलानि मृणालम् । कुल संख्याने नाशने च । कोलति नष्टां करोति मृत्तिकां कुलालः । कपालम् । पल्यते त्यज्यतेऽसौ पलालः ॥ **पतादिभ्योऽङ्गः** ॥ पतङ्गः । तरङ्गः । लवङ्गम् ॥ **बिडादेः कित्** ॥ बिडङ्गः । मृद क्षोदे । मृदङ्गः ॥ **गमादेर्गः** ॥ गङ्गा । छो । छागः । खङ्गः ॥ **भृङ्गादयः** ॥ भृञ् ॥ भृङ्गः । शृङ्गम् । शार्ङ्गम् । पूगः । मोदतेः मुद्गः । **शरदादयोऽदिप्रत्ययान्ता निपात्याः** ॥ शॄ । शरत् । दृणातेः दरत् । दृषत् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

त्यजेः त्यत् । तनेः तत् । यजेः यत् । इण् । एतत् ।
भियोऽजिः षुग् ह्रस्वश्च ॥ भिषक् ॥ **युष्मसिभ्यां मदिक्** ॥
युष सौत्रः । युष्मद् । अस्मद् ॥ **स्तुवादेर्मः** । स्तोमः ॥ सोमः ।
होमः । धर्मः । क्षेमम् । भामः । वामः । यामः । पद्मम् ।
नयंतीति नेमः ॥ **जिह्मादयो निपात्यन्ते** ॥ जिह्मः । ग्रसु
ग्लसु अदने । ग्रामः । सिमः । शुष्मम् । श्यैङ् । श्यामा । धूमः।
युग्मम् । रुक्मम् । तिग्मम् । हिमम् । भीमः । भीष्मः । घृ क्षरणे
दीप्तौ च ॥ जिघर्त्यनेन घर्मः । ग्रसेः ग्रीष्मः । **प्रथेः षिवः
संप्रसारणं च** ॥ पृथिवी । **अशादेः क्वः** ॥ अश्वः । खट काङ्क्षा-
याम् । खट्वा । विश्वः । सर्वादिरयम् ॥ **स्रादेर्वः** ॥ सृतमनेन
विश्वमिति सर्वः । शर्वः । गर्वः ॥ **ग्रीवादयो वत्प्रत्ययान्ता निपा-
त्यन्ते** ॥ ग्रीवा । लिहन्त्यनयेति जिह्वा ॥ **श्वादेः कनिन्** ॥ युवा ।
वृषा । तक्ष्णोति काष्ठानि तक्षा । राजा । धवि गतौ । धन्वयति
शरानिति धन्वा । प्रतिदिवा ॥ **सप्यशूभ्यां तुट् च** ॥ षप सम-
वाये । सप्त ॥ अष्ट ॥ **नञि जहातेः** ॥ अहः ॥ **श्वादयः** ॥ श्वा ।
उक्षा । पुष्णाति कमलानीति पूषा । स्निह्यत्यस्मिन् स्नेहः । प्लेहते
प्लीहा । मुह्यन्त्यस्मिन्नाहते मूर्द्धा । मज्जत्यस्थिषु मज्जा । अर्यपूर्वो माङ्
अर्यमा । मातर्यन्तरिक्षे श्वयतीति मातारिश्वा । मह पूजायाम् । मह्यते
इति मघवा ॥ इत्युणादौ प्रथमः पादः ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

अथोणादौ द्वितीयः पादः ।

कृहृभ्योरेणुः ॥ करेणुः । हरेणुः ॥ कुशादेः क्थः॥कुष्ठम् । रथः । काशृ दीप्तौ । काष्ठम् । अवभृथः ॥ उषादेस्थः । ओष्ठः । कोष्ठम् । गाथा । अर्थः । शु गतौ । शोथः ॥ सर्तेर्णित् ॥ सार्थः॥ निशीथादयः ॥ निशीथः । तीर्थः । रिचिर् विरेचने । रिक्थम् । षिचिर् क्षरणे । सिक्थम् । पृष् सेचने । पृष्ठम् । गूथम् । यु मिश्रणे। यूथम् । प्रोथः ॥ स्फायादे रक् ॥ स्फारम् । तञ्चू संकोचने । तक्रम् । वञ्चु । वक्रम् । शक्रः । क्षिप्रम् । क्षुद्रः । चक्रम् । चदि । चन्द्रः । उन्दी । उन्द्रः । श्विता । श्वित्रम् । वृत्रः । वीरः । नीरम् । छिद्रम् । उस्रा । शुभ्रम् । आमितम्योर्दीर्घश्च ॥ आम्रः । ताम्रम् ॥ निद्रादयः ॥ णिदि । निद्रा । अर्द । आर्द्रम् । शुच् । शूद्रः । दुःखेनेयते दूरम् । कृती । कृच्छ्रम् । क्रूरः । रोदयतीति रुद्रः । ज्या वयोहानौ । जीरः ॥ स्वादेः क्रः ॥ सुरः । षूङ् प्राणिप्रसवे । सूरः । धीरः । गृध्रः ॥ शूरादयः ॥ शु सौत्रः । शूरः । षिञ् । सीरः । चिञ् । चीरम् । वाविन्धेः ॥ वीध्रम् । वृधु वर्ध्रम् । वप्रः । इन्द्रः । अगि गतौ । अग्रम् । वज्रम् । टुवप् । विप्रः । उच् समवाये। उग्रः । ञिभी भये । भेरी । शुच शोके । शुक्रः–शुक्लः । गुङ् गतौ । गौरः । इण् । इरा । माला ॥ क्वुः शिल्पिसंज्ञयोः ॥ रजकः । चष भक्षणे । चषकम् । कुह विस्मापने । कुहकम् । मुषेः किको दीर्घश्च ॥ मूषिका ॥ क्रिय इकः ॥ क्रयिकः ॥ श्यास्त्याहृञा-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

दिभ्यः इनः ॥ श्येनः । स्त्येनः । हरिणः ॥ वृजादेः किनः ॥ वृजिनम् ॥ अजेर्वी न ॥ अजिनम् । कठ कृच्छ्रजीवने । कठिनम् । नल गन्धे । नलिनम् । कुडि दाहे । कुण्डिनम् । दो । दिनम् । द्रुदाक्षिभ्यामिनः ॥ द्रविणम् । दक्ष वृद्धौ । दक्षिणः । दाक्षिणा । अर्तेः किदिर् च । इरिणम् ॥ वेपितुह्योर्ह्रस्वश्च ॥ विपिनम् । तुहिनम् ॥ तलिपुलिभ्यां च ॥ तल प्रतिष्ठायाम् । तलिनम् ॥ पुलिनम् ॥ रुहेश्च ॥ रोहिणः ॥ आप्नोतेः क्विब्ह्रस्वश्च ॥ आपः । अद्भिः ॥ ग्लानुदिभ्यां डौः । ग्लौः । नौः ॥ रातेर्डैः ॥ राः । रायौ ॥ गमेर्डोः ॥ गौः ॥ भ्रमेर्डूः ॥ भ्रूः ॥ दमेर्डोस् ॥ दोः । दोषौ ॥ पणेरिज् आदेर्वः ॥ वणिक् ॥ अशेरशादेशो युप्रत्ययः ॥ रशना ॥ उन्देर्नलोपश्च ॥ ओदनः ॥ गमेर्गान्तादेशश्च ॥ गगनम् ॥ अन्येभ्योऽपि युः ॥ स्यन्दनम् । रोचनः । रञ्जिकॄभ्यां क्युः ॥ रजनम् । कॄ । किरणः ॥ धृषेर्धिषश्च ॥ धिषणा ॥ धाञश्च ॥ निधनम् ॥ पृषदादयः ॥ पृषु सेचने । पृषत् । । पृषन्ति । वृह उद्यमे । बृहत् ॥ महान् । जगत् ॥ विपूर्वो हन् ॥ वेहत् ॥ नप्तृनेष्टृत्वष्टृक्षत्तृहोतृपोतृप्रशास्तृभ्रातृजामातृपितृदुहितृ एते निपात्यन्ते तृप्रत्ययान्ताः ॥ न पतन्त्यनेनेति नप्ता । नेष्टा । त्वेषयतीति त्वष्टा । क्षद भक्षणे ॥ क्षत्ता । होता । पोता । प्रशास्ता । भ्राता । जायां मातीति जामाता । मान पूजायाम् । माता । पातीति पिता । दुहिता ॥ सावसेर्ऋः ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

स्वसा ॥ यतेर्वृद्धिश्च ॥ याता ॥ नञि नन्देश्च ॥ न नन्दतीति ननान्दा । ननन्देत्येके ॥ दिवेर्ऋः ॥ देवा । देवरौ ॥ नयतेर्डिच्च ॥ ना । नरौ । नरः ॥ अर्त्यादेरनिः ॥ अरणिः । सरणिः । तरणिः । धमनिः । अशनिः । अवनिः । रजनिः ॥ अर्च्यादेरिस् ॥ अर्चिः । अर्चिषी । रोचिः । शोचिः । छदिः । हविः । सर्पिः ॥ द्युतेरादेर्जः ॥ ज्योतिः ॥ बृंहेर्नलोपश्च ॥ बर्हिः ॥ जनादेरुस् ॥ जनुः । ऋ । अरुः । परुः ॥ चक्षेश्शित् ॥ चक्षुः । वप् । वपुः । यजुः ॥ एतेर्णित् ॥ आयुः ॥ इत्युणादौ द्वितीयः पादः ॥

अथोणादौ तृतीयः पादः ।

धीवरादयः ष्वरप्रत्ययान्ता निपात्यन्ते ॥ धीवरः । शर्वरी । निषद्वरः । पीवरः ॥ इणादेर्नक् ॥ इनः । जिनः । दीनः । कृष्णः ॥ ब्रन्धेर्ब्रधबुधौ च ॥ ब्रध्नः । बुध्नः ॥ धादेर्नः ॥ धानाः । पर्णम् । वस्नः । श्रोणः ॥ लक्षेर्नस्याण्मुटौ ॥ लक्षणः । लक्ष्मणः ॥ रास्नादयः ॥ रासृ शब्दे । रास्ना । सास्ना । स्थूणा । वीणा । कृती । कृत्स्नम् । तिजा । तीक्ष्णम् । श्लिष । श्लक्ष्णम् ॥ मनादेर्युः ॥ मन्युः । दस्युः । जन्युः ॥ मृङस्त्युक् ॥ मृत्युः ॥ सर्तेरय्वयू ॥ सरयुः । सरयूः । पादेः पः ॥ पापम् ॥ न्यादेः कित् ॥ नीपः । सूपः । कुङ् शब्दे । कूपः ॥ शिल्पादयः ॥ शिल । शिल्पम् । शसु । शष्पम् । बाधृ । बाष्पम् । रु । रूपम् । शॄ । शूर्पम् ॥ स्तनादेर्ण्यन्तादित्नुः ॥ स्तनयित्नुः । गदयित्नुः ॥ दाभाभ्यां नुः ॥ दानुः । भानुः ॥ धेट इच्च ॥ धेनुः ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

सुवः किच्च ॥ सूनुः ॥ अजिवृभ्यां णुः ॥ वेणुः । वर्णुः ॥ स्था-रीभ्यां णुः ॥ स्थाणुः । रेणुः॥ विषेः कित् ॥ विष्णुः ॥क्रादेः कः॥ कर्कः। राका । अर्कः । कल्कः । इण् । एकः । भेकः । काकः । पाकः । निहाका॥नौ सदेर्डित् ॥ निष्कः॥शकेरुनउन्तउन्तिउनिप्रत्ययाः॥ शकुनः । शकुन्तः । शकुन्तिः ॥ शकुनिः ॥ हृश्याभ्यामितः ॥ हरितः । श्येतः । रुहेरस्य लो वा ॥ रोहितः । लोहितम् । स्वादे-राय्यः ॥ श्रवाय्यः । स्पृहयाय्यः । वृञ एण्यः ॥ वरेण्यः ॥ अर्ते-रन्यः ॥ अरण्यम् । पृषु सेचने । पृषेश्च षस्य जः ॥ पर्जन्यः ॥ वदेरान्यः ॥ वदान्यः ॥ अमादेरत्रः ॥ अमत्रम् । नक्षत्रम् । पतत्रम् । कलत्रम् । वरत्रा ॥ भ्रादेरतः ॥ भरतः । पर्व पूर्तौ । पर्वतः ॥ पृषिरञ्जिभ्यां कित् ॥ पृषतः । रजतम् ॥ शपादेरथः ॥ शपथः । शमथः । दमथः । वस । आवसथः । संवसथः ॥ रभादे-रसः ॥ रभसः ॥ वेञ आत्वाभावस्तुट् च ॥ वेतसः ॥ दिवेः कित् ॥ दिवु । दिवसः ॥ क्रादेरभः ॥ कॄ । करभः । शॄ । शरभः। शल गतौ । शलभः । कल गतौ । कलभः । गर्द कुत्सिते शब्दे । गर्दभः ॥ ऋषिवृषिभ्यां कित् ॥ ऋषभः । वृषभः ॥ रासवल्लिभ्यां च ॥ रासृ शब्दे । रासभः । वल वल्ल संवरणे । वल्लभः॥विशादेरन्तः॥ वेशन्तः । वसन्तः । जयन्तः । हन्तेर्हिंमुट् च ॥ हेमन्तः ॥ अर्त्यादेररः ॥ अररम् । भ्रमरः । चमरः । देवरः । वस निवासे ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

वासरः ॥ क्रुवः क्रिद्रुट् च ॥ कुररः ॥ अङ्ग्यादेरारः ॥ अङ्गारः ॥ मन्दारः ॥ गडेः कड च ॥ गड आसेचने । कडारः । ॥ शृंगारादयः ॥ शृङ्गारः । भृङ्गारः । मृजूष् । मार्जारः । कमु । कुमारः । तुषारः । कासारः ॥ सर्तेरपः षुक् च ॥ सर्षपः ॥ विटपादयः ॥ विट शब्दे । विटपः ॥ वृतादेस्तिकः ॥ वर्तिका ॥ कृतः कित् ॥ कृत्तिका ॥ इष्यशिभ्यां तकः ॥ इष्टका । अष्टका ॥ वीपतिभ्यां तनः ॥ वेतनम् । पत्तनम् ॥ अर्त्यादेर्भः ॥ अर्भः । दॄ भये । दर्भः । गर्भः । इणः कित् । इभः ॥ असिसञ्जिभ्यां क्थिः ॥ अस्थि । सक्थि ॥ शुषादेः क्सिः । शुक्षिः । कुष निष्कर्षे । कुक्षिः । अशू । अक्षि ॥ इष । इक्षुः ॥ अवितॄस्तॄतन्त्रिभ्य ईः ॥ अवीः । तरीः । स्तरीः । धूमः । तन्त्रीः ॥ लक्षेर्मुट् च ॥ लक्ष्मीः ॥ इत्युणादौ तृतीयः पादः ॥

अथोणादौ चतुर्थः पादः ।

वातप्रम्यादयः ॥ वातप्रमीः । यान्त्यनेनेति ययीः । पा रक्षणे । पपीः ॥ रत्न्यादयः ॥ ऋ । रत्निः । अञ्जू । अञ्जलिः । मदी । मत्स्यः । अत् । अतिथिः अगि । अङ्गुलिः । कौतेः कवचः । यु । यवासः । कृश् । कृशानुः ॥ शृः करः ॥ शर्करा ॥ पुषः कित् ॥ पुष्करः ॥ गमेरिनिर्भविष्यति ॥ गमिष्यतीति गमी ॥ परमे स्थः कित् ॥ परमेष्ठी ॥ मन्थ इनिः

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

कित् ॥ मन्थाः । मन्थानौ ॥ पतेस्थश्च ॥ पन्थाः, पन्थानौ ॥ बलाकादयः ॥ वलाका । पताका । खज मन्थे । खजाकः । पिनाकः । तड आघाते । तडाकः ॥ दूषेरीकः ॥ दूषीका ॥ अनिहृषिभ्यां किच्च ॥ अनीकम् ॥ हृषीकम् ॥ अलीकादयः ॥ अल भूषणादौ । अलीकम् । वलीकम् । पुण कर्मणि शुभे । पुण्डरीकम् । ईषिका–इषीका ॥ कॄादेरीषः ॥ करीषम् । तॄ । तरीषः ॥ श्रादेः कीषः ॥ शॄ । शिरीषः । पॄ । पुरीषम् । अजेर्ऋजः ॥ ऋजीषम् । अबि शब्दे । अम्बरीषो निपात्यः । अम्बरीषम् ॥ कॄादेरीरः ॥ करीरः । शॄ । शरीरम् । गभीरादयः ॥ गम्लृ । गभीरः । गम्भीरः । वश । उशीरम् । घस्लृ । क्षीरम् ॥ शीङो धुक्लक्वलवलञ्वालपालाः ॥ शीधु । शीलम् । शेवलः । शैवलः । शेवालम् । शेपालम् । उलूकादयः ॥ उलूकः । शमु । शम्बूकः । शल । शालूकः । मडि भूषायाम् । मण्डूकः ॥ नियो मिः ॥ नेमिः ॥ अर्तेरूच्च ॥ ऊर्मिः ॥ भुवः किच्च ॥ भूमिः ॥ अश्नोते रश्च ॥ रश्मिः ॥ सृादेर्निः कित् ॥ सृणिः । वृष्णिः ॥ अङ्गेर्नलोपश्च ॥ अग्निः ॥ वहादेर्निः ॥ वह्निः । श्रोणिः । योनिः । द्रोणिः । ग्लानिः ॥ घृण्यादयः ॥ घृणिः । स्पृश । पृष्णिः । पृष् । पार्ष्णिः ॥ पातेर्डतिः ॥ पतिः ॥ शकेर्ऋतन् ॥ शकृत् ॥ हन्तेरतिरंह च ॥ हन्ति दुरितमनया अंहतिः ॥ सूङादेः क्रिः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

सूरिः भूरिः । अद्रिः । रादेस्त्रिः ॥ रात्रिः । अत्रिः ॥ पतेरात्रिः ॥ पतत्रिः । मृङ इचिः ॥ मरीचिः ॥ वेञो डिच्च ॥ वीचिः ॥ पुरः कुषः ॥ पुर अग्रगमने । पुरुषः ॥ पॄनहिकलिभ्य उषः ॥ पुरुषम् । नहुषः । कलुषम् ॥ पीयेरूषः ॥ पीय पाने सौत्रः । पीयूषम् । पेयूषम् ॥ मस्जेर्नुम्च ॥ मञ्जूषा ॥ गण्डेश्च । गडि वदनैकदेशे ॥ गण्डूषः ॥ शकादेरटः ॥ शकटम् । ककि गतौ । कङ्कटः । कञ्जू । करटः ॥ कलिकर्द्योरमः ॥ कलमः । कर्द कुत्सिते शब्दे । कर्दमः ॥ पुलथादेः किन्दः ॥ पुलिन्दः । कुपेर्वा वः ॥ कुपिन्दः । कुविन्दः ॥ नौ षञ्जेर्घथिः ॥ निषङ्गथिः ॥ सर्तेर्णिच्च ॥ सारथिः ॥ खर्जादेरूरः । खर्जूरः। कर्पूरम् ॥ वल्लूरम् ॥ लङ्गेर्वृ-द्धिश्च ॥ लाङ्गूलम् । कुसेश्च । कुसूलम् ॥ कुवश्चट् दीर्घश्च ॥ कूची ॥ सिवेरू च ॥ सूची ॥ शमेर्बः ॥ शमु । शम्बः ॥ उल्बा-दयः ॥ उच समवाये । उल्बः । शुल्वम् । स्था । स्तम्बः । स्तबकः॥ शाशपिभ्यां दः ॥ शादः । शब्दः ॥ अब्दादयः ॥ अवती-त्यब्दः । कुन्दः ॥ वलिमलितनिभ्यः कयः ॥ वलयम् । मलयः । तनया ॥ हृञो दुक् च ॥ हरतीति हृदयम् ॥ मिनोते रुः॥ मेरुः॥ जत्र्वादयः ॥ जत्रु । अश्रु । रुरुः । शातयतीति शत्रुः ॥ कुसेरु-म्भोमेदेताः ॥ कुसुम्भम् । कुसुमम् । कुसीदम् । कुसितः ॥ तण्डु-लादयः ॥ तड आघाते । तण्डुलः । अकि लक्षणे । अङ्कुशः । चष ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

चषालः । पल्वलम् । जिधृषा । धिष्ण्यम् । शल्यम् ॥ मूङ्शक्यम्य-बिभ्यः क्लः ॥ मूलम् । शक्लः । अम्लः ।अबि शब्दे । अम्ब्लः ॥ मादेर्यः ॥ माया । छाया । शस्यम् । घुञ् । सव्यम् । जनेर्यक् ॥ जाया । जन्यम् ॥ अघ्न्यादयः ॥ हन् । अघ्न्या । कनी दीप्तौ । कन्या । वन्ध्या ॥ अत्यादेर्वन् । अर्वा । पॄ । पर्वा ॥ ध्याप्योः संप्रसारणम् । ध्यैङ् चिन्तायाम् ॥ प्यैङ् वृद्धौ । धीवा । पीवा ॥ अदेर्ध्वः ॥ अध्वा ॥ धातोरिः ॥ यजिः । वट वेष्टने । वटिः । जनिः । बोधिः । हरिः । वर्तिः ॥ नाम्युपधात्किः ॥ कृषिः । ऋषिः । शुचिः । लिपिः । तूल निष्कर्षे । तूलिः ॥ क्रमितमिशतिस्तम्भामत इच्च ॥ क्रिमिः । तिमिः । शितिः । स्तिम्भिः ॥ मनेरत उच्च ॥ मुनिः ॥ वर्णेर्बालिश्च ॥ वर्ण वर्णने सौत्रः । बलिः ॥ वपादेरिञ् ॥ वापिः । राजिः । वारिः ॥ नहो भः ॥ नाभिः । जनिः । आजिः । आतिः । अशे रुट् ॥ राशिः ॥ वातेर्डित् ॥ विः ॥ नीव्यादयः ॥ निपूर्वो व्येञ् । नीविः । प्रहिः । समानं ख्यायते जनैरिति सखा ॥ आङ्पूर्वौ श्रिहनी ॥ आश्रिः । अहिः ॥ ऋादेः किः ॥ कॄ । किरिः ॥ गॄ । गिरिः । पॄ । पुरिः ॥ मन् धातोः ॥ कर्म । चर्म । भस भर्त्सनदीप्त्योः । भस्म । जन्म । छद्म । सुत्रामा । बृंहेर्नस्य अः ॥ ब्रह्म ॥ नामादयः ॥ म्ना । नाम । षिञ् । सीमा । व्येञ् । व्योम । रु । रोम । पै शोषणे ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

पाप्मा । वेमा ॥ अतेर्मनिण् ॥ आत्मा ॥ हनिमशिभ्यां सिकः ॥ हंसिकः । मश शब्दे । मक्षिका ॥ कोररः । कवरः ॥ गिर उडः ॥ गरुडः ॥ इन्देः कमिर्नलोपश्च ॥ इदम् ॥ कायतेर्डिम् ॥ किम् ॥ धातोस्त्रः ॥ वस्त्रम् । अस्त्रम् । छत्रम् ॥ सिविमुच्योष्टेरूः ॥ षिवु । सूत्रम् । मुच्लृ । मूत्रम् ॥ अमादेः क्तः ॥ आन्त्रम् । चित्रम् । मित्रम् । वश । उष्ट्रः ॥ पूञो ह्रस्वः ॥ पुत्रः ॥ स्त्यायते-र्ड्रट् ॥ स्त्री ॥ गमेरा ॥ गात्रम् ॥ चरादेरित्रञ् ॥ चारित्रम् । वादित्रम् ॥ अशित्रादिभ्य इत्रोत्रौ ॥ अशित्रम् । वहित्रम् । धरित्री । अमित्रः । त्रैङ् । त्रोत्रम् । वरुत्रम् ॥ चितेः कणः कश्च ॥ चिक्क-णम् ॥ सूचेः स्मः ॥ सूक्ष्मम् । पातेर्डुम्सुः ॥ पुमान् ॥ भुजादेः किष्यः ॥ भुजिष्यो दासः ॥ वसादेस्तिः ॥ वस्तिः । शास्तिः । अगमस्यतीति अगस्तिः ॥ वौ तसेः ॥ तसु उपक्षये । वितस्तिः । पत्तिः ॥ दृणातेर्ह्रस्वः ॥ दृतिः ॥ कृतॄकृपिभ्यः कीटः ॥ किरी-टम् । तिरीटम् । कृपीटम् ॥ धातोरसुः ॥ चेतः । सरः । पयः ॥ अशेर्युट् स्तुतौ ॥ अश्नुते इति यशः ॥ उब्जेर्बले बलोपः ॥ ओजः ॥ श्रिञः शिरः किच्च ॥ शिरः ॥ अर्तेरुरः ॥ उरः ॥ व्याधौ शुट् ॥ अर्शः ॥ उदके नुट् ॥ अर्णः ॥ इण आगसि ॥ एनः ॥ स्रुरीभ्यां तुट् च ॥ स्रोतः । रेतः ॥ पातेरुदके थुट् ॥ पाथः ॥ अदेर्भक्त-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

धो नुम् च ॥ अन्धः ॥ आप उदके ह्रस्वो नुम्भौ ॥ अम्भः ॥ नहेर्दिवि भः ॥ नभः ॥ इण आग अपराधे ॥आगः॥ अमेर्हुक्॥ अंहः ॥ रमेश्च ॥ रंहः ॥ देशे ह च ॥ रमन्तेऽस्मिन् रहः ॥ रञ्ज्यादेः कित् ॥ रजः । भुवः ॥ वसेर्णित् ॥ वासः ॥ चन्देरादेश्च छः ॥ छन्दः ॥ वचादेः सुट् ॥ वक्षः । पक्षः । नञि हन एह च ॥ अनेहाः, अनेहसौ ॥ विधाञो वेध च ॥ वेधाः ॥ चन्द्रे माङो डित् ॥ चन्द्रमाः ॥ पुरसि धाञः ॥ पुरोधाः ॥ उषः कित् ॥ उषः ॥ दमेरुनसिः ॥ दमुनः ॥ वशेः कनसिः ॥ उशनाः ॥ अङ्गिरादयः ॥ अगि । अङ्गिराः ॥ अप्पूर्वः सर्तिः ॥ अप्सराः ॥ पुरुपूर्वो रौतिः ॥ पुरूरवाः ॥ इत्युणादौ चतुर्थः पादः ॥

अथोणादौ पञ्चमः पादः ॥

अदि भुवो डुतः॥अद्भुतम् ॥ गुधेरूमः॥गोधूमः ॥ मसेरूरः ॥ मसूरः ॥ तृहे क्नो हलोपः॥ तृणम्॥दंसेष्टो न आ च ॥ दासः ॥ दंशेश्च ॥ दाशः ॥ सौ रमेः क्तः सोर्दीर्घः ॥ सूरतः ॥ पूञो यो णुक् ह्रस्वश्च ॥ पुण्यम् ॥ स्रंसतेः शिर्यस्य कित्त्वं कुट् च ॥ शिक्यम् ॥ अर्तेः क्युरुर् च ॥ उरणः ॥ उदि दृणातेर उदो दलोपश्च ॥ उदरम् ॥ खनेर्मुट् डप्रत्ययः ॥ मुखम् ॥ अमेः सः ॥ अंसः ॥ मुहेः खो मूर्च ॥ मूर्खः ॥ नहेर्हलोपश्च ॥ नखः ॥ शीङो ह्रस्वश्च ॥ शिखा ॥ माङ ऊखो मय च ॥ मयूखः ॥ गलेः फो गस्योच्च ॥ गुल्फः ॥ स्पृशेः शुश्वणौ पृ च ॥ पर्शुः । पार्श्वः ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

श्मनि श्रिञो डुन् ॥ श्मन्शब्दो मुखवाची । श्मानं मुखं श्रयते श्मश्रु ॥ जनेरो जङ्घ च ॥ जङ्घा ॥ हन्तेः शरीरावयवे द्वे च ॥ जघनम् ॥ क्लिशेर्लस्य लोपश्च ॥ केशः ॥ फलेरितः फस्य पः ॥ पलितम् ॥ कृञादेर्वुः ॥ करकः । कटकः । कुर गतौ । कोरकः । नरकः ॥ चीकयतेराद्यन्तविपर्ययः ॥ चीक आमर्षणे । कीचकः ॥ पचिमच्योरिरतः ॥ पेचकः । मेचकः । मच शब्द ॥ जनेररष्ठ च॥ जठरम् ॥ हर्यतेः कन्यो हिर च ॥ हिरण्यम् ॥ कृञः पासः ॥ कर्पासः ॥ ऊर्णोतेर्डः ॥ ऊर्णा ॥ दधातेर्यो नुट् च ॥ धान्यम् ॥ तनोतेर्डउः सवञ्च ॥ तितउः ॥ अर्भकादयः ॥ ऋधु । अर्भकः ॥ प्रथेरुक् संप्रसारणं च ॥ प्रथ—पृथुकः ॥ पिबतेः कः ॥ पाकः ॥ वदेर्ञित् यः ॥ अवद्यम् ॥ अवतेरमो धो वा ॥ अव । अवमः । अधमः ॥क्लिशेर ईच्चोपधाया लोपश्च लो नाम् च ॥ कीनाशः ॥ चतेरुरः ॥ चत्वारः ॥ हन्तेर्घुर च ॥ घोरम् ॥ क्षमेरलोपश्च ॥ क्षमा ॥ तरतेर्ड्रिः ॥ त्रयः । त्रीन् ॥ ग्रहेरनिः ॥ ग्रहणिः॥ प्रथेरमः ॥ प्रथमः ॥ चरेश्च ॥ चरमः ॥ मंगेरलः ॥ मंगलः ॥ सदोणादयः ॥ सर्वस्मिन्काले उणादयः ॥ उणादयोऽपरिमिताः ॥ प्रयोगमनुसृत्य प्रयोक्तव्याः ॥ इत्युणादौ पञ्चमः पादः ॥ ५ ॥

अथोत्तरकृदन्ताः।

तुम् तदर्थायां भविष्यति ॥धातोर्भविष्यति काले तुम्प्रत्ययस्तद-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

र्थायां क्रियायां गम्यमानायाम् ॥ गुडं भोक्तुं व्रजति । व्याकरणं पठितुमीष्टे ॥ तुमर्थे वुण् ॥ कृष्णं दर्शको व्रजति ॥ कालसमय-वेलासु ॥ अध्येतुं कालः । स्तोतुं समयः । भोक्तुं वेला ॥ इच्छार्थे-ष्वेककर्तृकेषूपपदेषु धातोस्तुम् ॥ भोक्तुमिच्छति वष्टि वाञ्छति ॥ शकधृषज्ञाग्लाघटरभलभक्रमसहार्हास्त्यर्थेषु ॥ शक्नोति भोक्तुम्। धृष्णोति जानातीत्यादि ॥ पूर्णतावाचिषु सामर्थ्यार्थेषु ॥ पर्याप्तो भोक्तुम् प्रवीणः कुशलः समर्थः । पूर्णतेति किम् । अलं भुक्त्वा । सामर्थ्यार्थेषु किम् ॥ पर्याप्तं भुङ्क्ते ॥ घञ् भावे ॥ पाकः । त्यागः । भावः । दायः ॥संज्ञायामकर्तरि च ॥ कर्तृवर्जिते कारके भावे च घञ् संज्ञायामसंज्ञायां च ॥ कार्थं प्रत्याह्रियते यः स प्रत्याहारः । दीयतेऽस्मै दायः । विक्रियतेऽनेनेति विकारः । उपाध्यायः । घञर्थे कः ॥ घञपवादः ॥ विशेषेण हन्यते कार्यमनेनेति विघ्नः । सुघ्नः ॥ स्वरादः ॥ भावादौ । घञोऽपवादः ॥ चयनं चयः । नयनं नयः । षिञ बन्धने । विशेषेण सीयन्ते बध्यन्ते जना अनेनेति विषयः । स्तूयतेऽनेनेति स्तवः । सवनं सवः । लवनं लवः । कृञः । क्रियते कार्यमनेनेति करः । गिरत्येनेनेति गरः—गलः । द्व्याद्युपसर्गहीनस्य छादेर्ह्रस्वोऽप्रत्यये ॥ परिच्छदः छत्रम् । दन्ताश्छाद्यन्तेऽनेनेति दन्तच्छदः ओष्ठः । द्व्यादि किम् । अन्ववप्रच्छादः । समवपरिच्छादः ॥ मदामः ॥ मदादीनामप्रत्ययो भावादौ ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

मदः । पणः । प्रमदः । संमदः । शमः । आश्रमः । **मूर्तौ घनः ॥** काठिन्ये परिच्छेदे च हन्तेरप्रत्ययो घनादेशश्च । दधिघनः । सैन्धवघनः ॥ **हनो वधोऽप्रत्ययश्च** ॥ हननमिति वधः ॥ **ड्वितोऽथुः** ॥ ड्वितो धातोरथुर्भवति भावादौ ॥ टुवेपृ कम्पने । वेपनं वेपथुः । वमथुः । नन्दथुः । श्वयथुः ॥ **ड्वितस्त्रिमक् तत्कृते** ॥ ड्वितो धातोस्त्रिमक् प्रत्ययो धात्वर्थेन कृतेऽर्थे ॥ करणेन निर्वृत्तः कृत्रिमः घटः । पक्त्रिमः । **नङ्क्षी** ॥ धातोर्नङ्क्षी प्रत्ययौ भावादौ ॥ यज । इज्यन्ते देवा अनेनेति यज्ञः । याच्ञा । यती । यत्नः ॥ **प्रच्छविच्छोः शो नेऽसंप्रसारणं च** । प्रश्नः । विश्नः । रक्ष पालने । रक्ष्णः । स्वप्नः । अन्तः धीयते यः सः अन्तर्द्धिः । आधिः । विशेषेण जनेषु पीडा आधीयतेऽनेनेति व्याधिः । प्रकर्षेण दधाति रथमार्गमनेनेति प्रधिः । वारि धीयतेऽस्मिन्निति वारिधिः । पाथः धीयतेऽस्मिन्निति पाथोधिः ॥ **यट् भावे च** ॥ ज्ञानम् । करणम् । कारणम् ॥ **साधनाधारयोश्च** ॥ पच्यतेऽनेनेति पचनोऽग्निः । पच्यतेऽस्यां पचनी स्थाली ॥ **ईषद्दुःसुषु खल्यू** ॥ ईषत्पदादिषु प्रयुज्यमानेषु खल्यू एतौ भावादौ ॥ ईषद्भवः । दुर्भवः । सुकरः । दुःखेन युध्यतेऽस्मादिति दुर्योधनः । दुःखेन शिष्यते इति दुःशासनः ॥ **कर्तृकर्मणोश्च्व्यर्थयोरीषदादिषु चोपपदेषु भूकृञोः खल्** । अदुराढ्येन दुराढ्येन भूयते दुराढ्यंभवं भवता । अस्वाढ्यः स्वाढ्यः क्रियते स्वाढ्यंकरः ॥ **तव्यानीयौ** ॥ भावका-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

र्थयोः ॥ एधितव्यम् । एधनीयम् । आसितव्यम् । आसनीयम् । पातव्यम् । पानीयम् । **वसेस्तव्यः कर्तरि णिच्च** ॥ वसतीति वास्तव्यः ॥ **केलिमः** ॥ सौकर्ये धातोः केलिमः प्रत्ययो भवति । पचेलिमा माषाः । भिदेलिमाः सरलाः ॥ **स्वराद्यः** ॥ स्वरान्ताद्धातोर्यः ॥ चेयम् । जेयम् । तव्यादयोऽपि । चेतव्यः । चयनीयः । दित्स्यम् ॥ **ई चातः** ॥ आदन्ताद्धातोर्य आकारस्य च ईकारः ॥ देयम् । ग्लेयम् । गेयम् । **पुशकात्** ॥ पवर्गान्ताच्छकादेश्च यः प्रत्ययः । शप्यम् । यम्यम् । जप्यम् । शक्यम् । सह्यम् ॥ **ऋहसान्ताद् घ्यण्** ॥ ऋवर्णान्तात् हसान्ताद्धातोर्घ्यण् भावकार्ययोः ॥ कार्यम् । हार्यम् । वाह्यम् । घात्यम् । वाक्यम् । पाक्यम् । रोग्यम् । **घ्यणि क्वचित्कुत्वाभावः** ॥ याज्यम् । याच्यम् । वाच्यम् । रोच्यम् ॥ अर्च्यम् ॥ **ओरावश्यके** ॥ उवर्णान्तादावश्यकेऽर्थे घ्यण् ॥ **ओदौतोर्यः स्वरवत्** ॥ ओकारौकारयोर्निमित्तं यः प्रत्ययः स्वरवत् ॥

लुम्पेदवश्यमः कृत्ये तुम्काममनसोरपि ।
समो वा हिततयोर्मांसस्य पचि युड्घञोः ।

अवश्यं भाव्योऽवश्यभाव्यः । भोक्तुकामः । श्रोतुमनाः । संहितम् । सहितम् । संततम् । सततम् । मांसस्य पचनं मांसपचनम् । मांसपचनम् । मांसस्य पाकः मांस्पाकः । मांसपाकः ॥ **हनो वधादेशो ये** ॥ वध्यम् ॥ **ऋदुपधात्क्यप्** ॥ ऋकारोपधाद्धातोः क्यप् ॥ कृती ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

कृत्यम् । वृत्यम् ॥ कृपिचृत्योर्न ॥ कल्प्यम् ॥ चृत दीप्तौ । चर्त्यम्॥ मृजो वा ॥ मृज्यम् । मार्ग्यम् ॥ भुवो भावे ॥ नाम्न्युपपदे भुवः क्यप् ॥ ब्रह्मणो भावः ब्रह्मभूयम् । नाम्नि किम् । भव्यम् ॥ इण्स्तु-भृदवृशासुजुषखनः क्यप् च ॥ इत्यः । स्तुत्यः । दृङ् आदरे । दृत्यः । वृत्यः । "शासेरिः" शिष्यः । जुषी प्रीतिसेवनयोः । जुष्यः ॥ खन ईत्वं क्यपि ॥ खेयम् । भिद्योद्ध्यौ नदे ॥ भिनत्ति कूलमिति भिद्यः । उज्झति जलमित्युद्ध्यः ॥ कृवृषोर्वा क्यप्॥कृत्यम्। कार्यम् । वृष्यम् । वर्ष्यम्॥पुष्यसिद्ध्यौ नक्षत्रे ॥पुष्णन्ति कार्याण्यस्मि-न्निति पुष्यः । सिध्यन्ति कार्याण्यस्मिन्निति सिद्ध्यः ॥राजसूयादयः॥ राज्ञा सोतव्योऽभिषवद्वारा निष्पादयितव्यः राजसूयः । सरत्याकाशे सूर्यः ॥ तव्यादयोऽर्हेऽर्थे विधौ शक्तौ च वक्तव्याः ॥ दर्शनार्हो द्रष्टव्यः । दर्शनीयः । दृश्यः । स्वाध्यायोऽध्येतव्यः । अध्ययनीयः । अध्येयः । श्रोतव्यः । मन्तव्यः । वोढव्यः । तव्यादीनां कृत्यसंज्ञा ॥ स्त्रियां यजां भावे॥यजादेर्धातोः स्त्रियां भावे क्यप् ॥ इज्या । व्रज्या । समज्या । निषद्या । निपत्या । मन्या । विद्या । सुत्या । शय्या।भृत्या । इत्या । कृत्या । कृञो यग्वा ॥ "अयकि" । क्रिया । इषेरिच्छेति निपातः । इषेः शः । छत्वादेशः ॥ इच्छा । सर्तेर्गुणः ॥ परिसर्या । अटाट्या । आस्या । जागर्तेर्गुणः । जागर्या ॥ हनस्तः ॥ हत्या ॥ क्तिः ॥ धातोः क्तिः स्त्रियां भावे ॥ कृतिः । बुद्धिः । स्मृतिः ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

"ञमान्तस्य" दीर्घः । शान्तिः । दान्तिः । कान्तिः । क्षान्तिः ॥ ह्वेञ् । हूतिः । ऊढिः । स्फातिः॥ हवत्त्योर्नेट् ॥ संशीतिः ॥ ग्रहादीनामिट् ॥ निगृहीतिः ॥ ग्लादेर्निः ॥ ग्लानिः । म्लानिः । त्वरतेर्वस्योत्वम् । तूर्णिः ॥ ॠल्वादिभ्यः क्तेर्निः ॥ कीर्णिः । गीर्णिः । लूनिः । धूनिः ॥ संपदादेः क्विब्वा ॥ संपदनं संपत् । संपत्तिः । कर्तरि क्तिः संज्ञायाम्॥ प्रकुरुते इति प्रकृतिः ॥ षिद्भिदामङ् ॥ षितो धातोर्भिदादेश्च स्त्रियामङ् । पचा । माया ॥ॠतोऽङि गुणः ॥ जरा । भिदा । छिदा । क्षिपा । गुहा ॥ गुरोर्हसात् ॥ गुरुमतो हसान्तात्स्त्रियामङ् ॥ न क्तिः । ईहा । ऊहा । कुण्डा ॥ प्रत्ययान्तात् स्त्रियामङ् ॥ चिकीर्षा । लोलूया । कण्डूया । पुत्रकाम्या ॥ धात्वर्थनिर्देशे वुण् वक्तव्यः ॥ आशिका । शायिका ॥ इक्श्तिपौ धातुनिर्देशे ॥ पचिः । पचतिः ॥ ण्यन्तासश्रन्थघट्टिवन्दिविदीषिभ्यः स्त्रियां युः ॥ कारणा । अर्थना । आसना । श्रन्थना । घट्टना । वन्दना । वेदना । एषणा ॥ इञ् अजादिभ्यः॥ आजिः । आतिः ॥ विभाषाऽऽख्यानपरिप्रश्नयोरिञ् च ॥ आक्रोशे नञ्यनिः । अकरणिः । अजननिः ॥ इक् कृष्यादिभ्यः ॥ कृषिः । गिरिः ॥ पूर्वकाले क्त्वा ॥ धातोः समानकर्तृके धातौ प्रयुज्यमाने पूर्वकालेऽर्थे क्त्वा प्रत्ययः ॥ क्त्वा सेट् किन्न ॥ धातोः सेट् क्त्वा किन्न ॥ वर्तित्वा । शयित्वा ॥ मृडमृदगुधकुषक्लिशवदवसरुदविद-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

मृषग्रहिभ्यः कित् ॥ मृडित्वा । मृदित्वा । गुधित्वा । कुषित्वा । क्लिशित्वा । उदित्वा । उषित्वा । रुदित्वा । विदित्वा । मुषित्वा । गृहीत्वा ॥ नोपधात्थफान्ताद्वा कित् ॥ ग्रन्थित्वा । ग्रथित्वा । गुंफित्वा । गुफित्वा । अलंखल्वोः प्रतिषेधे ॥ अलंभुक्त्वा । खलुकृत्वा ॥ उदितः क्त्वो वेट् ॥ एपित्वा । इष्ट्वा । शमित्वा । शान्त्वा ॥ अदो जग्धिः ॥ जग्ध्वा ॥ समासे क्यप् ॥ समासे सति पूर्वकाले क्यप् समानकर्तृके धातौ प्रयुज्यमाने ॥ संभृत्य करोति । प्रणम्य गच्छति । अनञ्पूर्व इत्येके । अकृत्वा ॥ क्यपि लघुपूर्वात्परस्य णेरय् ॥ परिणमय्य । लघुपूर्वात्किम् । सम्प्रधार्य ॥ आप्नोतेर्वा ॥ प्रापय्य । प्राप्य ॥ क्यपीत्वाभावः ॥ प्रदाय ॥ प्रधाय । प्रस्थाय । प्रसाय । मिनोतिमीनातीत्यात्वम् । प्रमाय । निमाय । एवं लीलीङोरात्वं वेत्यादि । विलीय । विलाय ॥ तत्कालेऽपि क्वचित् ॥ नेत्रे संमील्य हसति । मुखं व्यादाय स्वपिति ॥ पौनःपुन्ये णम्पदं द्विश्च ॥ समानकर्तृकेषु धातुषु प्रयुज्यमानेषु पूर्वकाले धातोर्णम् क्त्वा च णमन्तस्य द्विर्वचनम् ॥ पायंपायं गच्छति । भोजंभोजम् । स्मारंस्मारम् । "मितां ण्यन्तानामिणि णमि च वा दीर्घः ॥" गामंगामम् । गमंगमम् । लाभंलाभम् । लम्भंलम्भम् ॥ कथमादिषु स्वार्थे कृञो णम् ॥ कथंकारम् । अन्यथाकारम् । एवंकारम् । इत्थंकारम् पठति । एवंकारं पठतीत्यर्थः ॥ अग्रेप्रथमपूर्वेषूपपदेषु क्त्वाणमौ वा ॥ अग्रेभोजं व्रजति । अग्रे भुक्त्वा । प्रथमंभोजम् । प्रथमंभुक्त्वा । पूर्वभोजम् । पूर्वभुक्त्वा । पक्षे

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

प्रत्ययाभावः । अग्रे भुङ्क्ते ततो व्रजति ॥ आभीक्ष्ण्ये तु पूर्वेण नित्यमेव णम् । अग्रे भोजंभोजं व्रजति ॥ कर्मण्याक्रोशे कृञः खमुञ् ॥ चौरंकारमाक्रोशति । चौरशब्दमुच्चार्येत्यर्थः ॥ च्व्यर्थेषु स्वाद्वर्थे ॥ कृञो णम्स्यादेककर्तृकयोः पूर्वकाले ॥ पूर्वपदस्य मान्तत्वं निपात्यते । अस्वादुं स्वादुं कृत्वा भुङ्क्ते स्वादुंकारं भुङ्क्ते । सम्पन्नंकारम् । लवणंकारम् । संपन्नलवणशब्दौ स्वादुपर्यायौ । क्त्वाऽपि । स्वादुंकृत्वा भुङ्क्ते ॥ यथातथयोरसूयाप्रतिवचने कृञः सिद्धाप्रयोगे णम् ॥ यथाकारमहं भोक्ष्ये तथाकारं भोक्ष्ये किं तवानेन । सिद्धाप्रयोगे किम् । सिद्धं कृत्वा भुङ्क्ते ॥ कर्मणि दृशिविदोः साकल्ये ॥ कन्यादर्शं वरयति। सर्वाः कन्या इत्यर्थः ॥ ब्राह्मणवेदं भोजयति यं यं ब्राह्मणं जानाति । लभते विचारयति वा तं तं सर्वं भोजयतीत्यर्थः ॥ यावति विन्दजीवोः॥ यावद्वेदं भुङ्क्ते । यावल्लभते तावदित्यर्थः । यावज्जीवमधीते विप्रः ॥ कर्मणोश्चर्मोदरयोः पूरेः ॥ चर्मपूरं स्तृणाति । उदरपूरं भुङ्क्ते ॥ कर्मण्युपपदे पूरेरूलोपश्च वा वर्षप्रमाणे गम्ये ॥ गोष्पदप्रं वृष्टो देवः । गोष्पदपूरं वा । मूषिकाविलप्रं वृष्टो देवः । मूषिकाविलपूरं वा ॥ चैलार्थेषु कर्मस्सूपपदेषु क्नोपेर्वर्षप्रमाणे ॥ चैलक्नोपं वृष्टो देवः । वस्त्रक्नोपम् । वसनक्नोपम् ॥ निमूलसमूलयोः कषः ॥ कषादिषु यथाविध्यनुप्रयोगः प्रयोक्तव्यः । अत्र प्रकरणे पूर्वकाल इति न सम्बध्यते, असंभवादप्रतीतेश्च । निमूलकाषं कषति । समूलकाषं कषति । निमूलं समूलं वा

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

कषतीत्यर्थः ॥ शुष्कचूर्णरूक्षेषु कर्मसूपपदेषु पिषः ॥ शुष्कपेषं पिनष्टि । शुष्कं पिनष्टीत्यर्थः । चूर्णपेषम् । रूक्षपेषम् ॥ समूला-कृतजीवेषु कर्मसु हन्कृञ्ग्रहां णम् ॥ समूलघातं हंति । समूलं हन्तीत्यर्थः । अकृतकारं करोति । जीवग्राहं गृह्णाति । जीवन्तं गृह्णा-तीत्यर्थः ॥ करणे हनः ॥ पादघातं हन्ति । पादेन हन्तीत्यर्थः ॥ स्नेहने पिषः ॥ उदपेषं पिनष्टि । उदकेन पिनष्टीत्यर्थः ॥ हस्तार्थे करणे वर्तिग्रहोः ॥ हस्तवर्तं वर्तयति । करवर्तम् । हस्तेन गुटिकां करोतीत्यर्थः । हस्तग्राहं गृह्णाति । करग्राहम् । पाणिग्राहम् । धनार्थे करणे पुषः ॥ धनपोषं पुष्णाति । स्वपोषम् । गोपोषम् ॥ आधारे बन्धः ॥ चक्रबन्धं बध्नाति । चक्रे बध्नातीत्यर्थः ॥ संज्ञायां बध्नातेः ॥ क्रौञ्चबन्धं बद्धः । मयूरिकाबन्धं बद्धः । अट्टालिकाबन्धं बद्धः ॥ बन्धविशेषाणां संज्ञा एताः ॥ कर्त्रोर्जीवपु-रुषयोर्नशिवहोः ॥ जीवनाशं नश्यति । जीवो नश्यतीत्यर्थः । पुरुषवाहं वहति । पुरुषो वहतीत्यर्थः ॥ ऊर्ध्वे कर्तरि शुषिपूरोः ॥ ऊर्ध्वशोषं शुष्यति । ऊर्ध्वं शुष्यतीत्यर्थः । ऊर्ध्वपूरं पूर्यते । ऊर्ध्वमुखः पूर्यत इत्यर्थः ॥ उपमाने कर्मणि कर्तरि च ॥ घृतनिधायं निहितं जलम् । घृतमिव सुरक्षितमित्यर्थः । अजनाशं नष्टः । अज इव नष्ट इत्यर्थः । कषादिषु यस्माण्णम् विहितः स एवानुप्रयोक्तव्यः । तथैवोदाहृतम्॥उपदंशस्तृतीयायाम् ॥ इतः प्रभृति पूर्वकाल इति संबध्यते । मूलकोपदंशं भुङ्क्ते मूलकेनोपदंशम् । दश्यमानस्य मूल-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

कस्य भुजिं प्रति करणत्वात्तृतीया । यद्यप्युपदंशिना सह न शाब्दः संबन्धः तथाप्यार्थोऽस्त्येव ॥ **हिंसार्थानां चानुप्रयोगधातुना समानकर्मकाणां तृतीयान्ते उपपदे** ॥ दण्डोपघातं गाः कालयति । दण्डेनोपघातम् । दण्डताडं, दण्डेन ताडं वा । समानकर्मकाणां किम् । दण्डेन चौरमाहत्य गाः कालयतीत्यर्थः ॥ **सप्तम्यां तृतीयायां चोपपदे उपपीडरुधकर्षः** ॥ पार्श्वोपपीडं शेते । पार्श्वाभ्यामुपपीडं पार्श्वयोरुपपीडं वा । व्रजोपरोधं गाः स्थापयति । व्रजेनोपरोधम् । पाण्युपकर्षं धानाः संगृह्णाति । पाणावुपकर्षं पाणिनोपकर्षम् । **तृतीयासप्तम्योरुपपदयोः संनिकर्षे धातोः** ॥ केशग्राहं युध्यन्ते । केशेषु गृहीत्वा युध्यन्त इत्यर्थः । हस्तग्राहं हस्तेन गृहीत्वा ॥ **तृतीयासप्तम्योः प्रमाणे गम्ये धातोः** ॥ द्व्यङ्गुलोत्कर्षं खण्डिकां छिनत्ति । द्व्यङ्गुले द्व्यङ्गुलेन वोत्कर्षम् ॥ **अपादाने द्वितीयायां च त्वरायां गम्यमानायां धातोः** ॥ शय्योत्थायं धावति । यष्टिग्राहं युध्यन्ते । लोष्टग्राहम् ॥ **अपगुरोर्वा णम्योतः** ॥ गुरी उद्यमे । अस्यपगारं युध्यन्ते अस्यपगोरं वा ॥ **अध्रुवे स्वांगे द्वितीयान्ते धातोः** ॥ भ्रूविक्षेपं कथयति भ्रुवं विक्षेपम् । अध्रुवे किम् । शिर उत्क्षिप्य कथयति । येन विना न जीवनं तद् ध्रुवम् ॥ **परिक्लिश्यमाने द्वितीयान्ते स्वांगे धातोः** ॥ उरःप्रतिवेषं युध्यन्ते । कृत्स्नमुरः पीडयित्वेत्यर्थः ॥ उरोविदारं प्रतिचस्करे नखैः ॥ ध्रुवार्थमिदम् ॥ **द्वितीयान्ते विशिपतिपदिस्कन्दां व्याप्यमानासेव्यमानयोः** ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

गेहादिद्रव्याणां विश्यादिक्रियाभिः साकल्येन संबन्धो व्याप्तिः । क्रियायाः पौनःपुन्यमासेवा । गेहानुप्रवेशमास्ते । गेहंगेहमनुप्रवेशम् । एवं गेहानुप्रपातम् । गेहानुप्रपादम् । गेहानुस्कन्दम् । असमासे गेहस्य णमन्तस्य च पर्यायेण द्वित्वम् । गेहंगेहमनुप्रवेशम् । गेहमनुप्रवेशमनुप्रवेशम् ॥ क्रियान्तरेषु कालेषु द्वितीयान्तेषूपपदेषु क्रियाव्यवधाने वर्तमानयोरस्यतितृषोः ॥ द्व्यहात्यासं गाः पाययति द्व्यहमत्यासम् । द्व्यहतर्षम् । अत्यसनेन तर्षणेन च गवां पानक्रिया व्यवधीयते । अद्य पाययित्वा द्व्यहमतिक्रम्य पुनः पाययतीत्यर्थः ॥ नाम्नि द्वितीयान्ते आदिशिग्रहोः ॥ नामादेशमाचष्टे । नामग्राहं कथयति ॥ अव्ययेऽयथाभिप्रेताख्याने कृञः क्त्वाणमौ वा ॥ अयथाभिप्रेताख्यानं नाम अप्रियस्योच्चैः प्रियस्य नीचैः कथनम् । उच्चैःकृत्य उच्चैःकृत्वा उच्चैःकारं वाऽप्रियमाचष्टे । नीचैःकृत्य नीचैःकृत्वा नीचैःकारं वा प्रियं ब्रूते ॥ तिर्यग्युपपदे समाप्तौ कृञः क्त्वाणमौ वा ॥ तिर्यक्कृत्य गत इति तिर्यक्कृत्वा, तिर्यक्कारम् । समाप्य गत इत्यर्थः । समाप्तौ किम् । तिर्यक्कृत्वा काष्ठं गतः ॥ स्वांगे तस्प्रत्यये कृभ्वोः ॥ मुखतःकृत्य गतः । मुखतः कृत्वा । मुखतः कारम् । मुखतोभूय गत इति । मुखतो भूत्वा । मुखतोभावम् ॥ नाधार्थप्रत्ययान्ते च्व्यर्थे कृभ्वोः क्त्वाणमौ वा ॥ अनाना नानाकृत्य नानाकृत्वा नानाकारम् । विनाकृत्य । विनाकृत्वा । विनाकारम् । नानाभूय । नानाभूत्वा । नानाभावम् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

अनेकद्रव्यमेकं कृत्वा एकधाकृत्य । एकधाकृत्वा । एकधाकारम् । एकधाभूय । एकधाभूत्वा । एकधाभावम् । प्रत्ययग्रहणं किम् । हिरुक्कृत्वा । पृथग्भूत्वा ॥ तूष्णींशब्दे भुवः क्त्वाणमौ ॥ तूष्णींभूय गतः । तूष्णीं भूत्वा । तूष्णींभावम् ॥ अन्वक्शब्दे भुवः क्त्वाणमौ वा आनुकूल्ये गम्ये ॥ अन्वग्भूयास्ते । अन्वग्भूत्वा । अन्वग्भावम् । अग्रतः पार्श्वतः पृष्ठतो वाऽनुकूलो भूत्वा आस्त इत्यर्थः । आनुकूल्ये किम् । अन्वग्भूत्वा तिष्ठति । पृष्ठतो भूत्वेत्यर्थः ॥ (वर्णात्कारः) अकारः । इकारः । वकारः । (रादिफो वा ।) रेफः । रकारः ॥ (लोकाच्छेषस्य सिद्धिर्यथा मातरादेः) ॥

इति श्रीरामाश्रमविरचितायां सिद्धान्त-
चन्द्रिकायामुत्तरार्द्धं समाप्तम् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

क्रय्य पुस्तकें (व्याकरण-ग्रन्थाः)

नाम	की. रु. आ.
अष्टाध्यायी-(पञ्चपाठी) गणपाठ, धातुपाठ, वार्तिकपाठ और लिंगानुशासन । विद्यार्थियोंको परमोपयोगी है.	०-१२
अष्टाध्यायिसूत्रपाठ-इसके पढनेसे कौमुदीका जल्दी पठन होता है.	०-६
अर्थप्रकाशिका-भाषाभाष्य । व्याकरण पढनेवालोंको अत्युपयोगी है.	०-८
कारकस्वरूपप्रकाश-भाषाटीकासहित । इसके द्वारा कालद्रव्यादिकका शीघ्र बोध होता है.	०-८
कारकवादार्थ-जयरामपंडितप्रणीत (इससे शाब्दबोध व्याकरण तथा न्यायका शब्दज्ञान होता है.)	०-३
धातुरूपावली-लघुपाठसहित । इससे धातुओंका शीघ्र बोध होता है.	०-३
पूर्वपक्षावली-(पाणिनीयव्याकरण)	०-४
तथा उत्तरपक्षावली.	०-४
बालसंस्कृतबोधिनी-भाषाटीकासहित । यह विद्यार्थियोंको अतीव उपयोगी है	०-८

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

नाम	की. रु. आ.
बालकोपदेशमालिका—रंगनाथ प्रबोधन और धर्मवाद समेत संस्कृताभ्यासियोंको संस्कृतभाषाव्युत्पत्ति तथा भगवद्भक्ति और धर्मश्रद्धा होनेका यह बहुतही उत्तम गद्यपद्य काव्य है	०-६
मध्यसिद्धांतकौमुदी—टिप्पणी सहित । यह काशी तथा पंजाबादि देशोंमें प्रथमश्रेणीमें पढायी जाती है	१—०
रूपमाला—सम्पूर्ण सन्धिभाग, अव्ययार्थभाग, प्रयोगविधि-संग्रह, (कारकसमास तद्धितादिक) क्रियाकलाप, आख्यातचंद्रिका, धातुरूपभेद और श्लोकयोजनिकोपाय, यह ग्रन्थ विद्यार्थियोंको अतीव उपयोगी है.	१—८
निम्नलिखितानुसार अलग २ भाग भी मिलते हैं:—	
रूपमाला—१—व्याकरण षड्लिंग विभाग, इससे लिंगबोध अच्छीप्रकारसे होता है.	०—८
" २—संधिविभाग—शब्दोंकी पंचसंधि समझनेका सुलभ उपाय.	०—६
" ३—अव्ययार्थभाग—इससे श्लोकादिके पदोंका अन्वय जानलेते हैं.	०—४
" ४—प्रयोगविधिसंग्रह—कारकसमासतद्धितादिक	०—२
" ५—क्रियाकलाप, धातुरूपभेद, आख्यातचंद्रिका, श्लोकयोजनिकोपाय—नामहीसे समझलेंगे.	०—८

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

नाम	की. रु. आ.
लघुत्रिमुनिकल्पतरु—इसमें पाणिनि आदिका वृत्तांत भलीप्रकार है	०—४
लघुसिद्धांतकौमुदी—टिप्पनी सहित जिल्द बँधी बडा अक्षर	१—०
लघुसिद्धान्तकौमुदी—विद्यावारिधि पंडित-ज्वालाप्रसादजी मिश्रकृत उदाहरण, स्पष्टकिरण, नियमाङ्क योजना तथा भाषाटीका सहित	३—०
लघुव्याकरण—पूर्वार्द्ध	०—४
लघुभाष्य—श्रीसरस्वतकृत । सम्पूर्ण व्याकरणसूत्र व्याख्यान सारस्वतके सूत्रोंपर महाभाष्यके अनुसार सर्वोत्तम व्याख्या है.	३—०
लिङ्गबोधव्याकरण—भाषाटीकासमेत । इसके अभ्याससे पुल्लिंग; स्त्रीलिंग, नपुंसकलिंग आदिका ज्ञान शीघ्र होता है	०—२
शब्दरूपावली—एकाक्षरीकोषसहित—शब्दज्ञान और विभक्तिकी प्रथमश्रेणीकी है.	०—२
समासकुवलयाकर—नियमोंके साथ उदाहरण त्वरासे पदोंका समास कर सकते हैं.	०—४
समासचक्र—नामहीसे ज्ञात होता है	०—१
सारस्वततीनोंवृत्ति—मूलमात्र.	१—०

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

नाम	की. रु. आ.
सारस्वतमूल–पूर्वार्द्ध ग्लेज	०–१०
" तथा रफ कागजका दाम	०–८
सारस्वतप्रसादटीका	१–०
सारस्वत सम्पूर्ण–चन्द्रकीर्तिटीकासहित ग्लेज कागज	४–०
" तथा रफ	३–८
सारस्वत–चन्द्रकीर्तिटीकासह–(पूर्वार्द्ध) ग्लेजकागज	१–८
तथा रफ	१–४
सारस्वत–चन्द्रकीर्तिटीकासह–(उत्तरार्द्ध) ग्लेजकागज	२–८
" तथा रफ	२–४
सारस्वत–सुबोधिनी भाषाटीकासहित (पूर्वार्द्ध मात्र) विद्यार्थी सुगमरीतिसे समझ सकते हैं	२–४
सारस्वत–(व्याकरण) श्रीमदनुभूतिस्वरूपाचार्यप्रणीत और पंडितवर्यमाधवविवरणोपत.	२–८

पुस्तक मिलनेका पता–

खेमराज श्रीकृष्णदास,
"श्रीवेङ्कटेश्वर" स्टीम्–प्रेस,
बम्बई.

गङ्गाविष्णु श्रीकृष्णदास,
'लक्ष्मीवेङ्कटेश्वर' स्टीम्-प्रेस,
कल्याण–बम्बई.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

"श्रीवेङ्कटेश्वर" छापखानेकी परमोपयोगी स्वच्छ, शुद्ध और सस्ती पुस्तकें ।

यह विषय आज ५०।६० वर्षसे भारतवर्षमें प्रसिद्ध है कि, इस यन्त्रालयकी छपी हुई पुस्तकें सर्वोत्तम और सुन्दर प्रतीत तथा प्रमाणित हुई हैं। इस यन्त्रालयमें प्रत्येक विषयकी पुस्तकें जैसे-वैदिक, वेदान्त, पुराण, धर्मशास्त्र, न्याय, मीमांसा, छन्द, ज्योतिष, साम्प्रदायिक, काव्य, अलंकार, चम्पू, नाटक, कोष, वैद्यक तथा स्तोत्रादि संस्कृत और हिन्दी भाषाकी प्रत्येक अवसरपर विक्रीके लिये तैयार रहती हैं। शुद्धता, स्वच्छता तथा कागजकी उत्तमता और जिल्दकी बँधाई देशभरमें विख्यात है। इतनी उत्तमता होनेपर भी दाम बहुत ही सस्ते रखे गये हैं और कमीशन भी पृथक् काट दिया जाता है, अतः संस्कृत तथा हिन्दीके रसिकोंको अवश्य अपनी अपनी आवश्यकतानुसार पुस्तकोंके मँगानेमें त्रुटि न करनी चाहिये। ऐसा उत्तम, सस्ता और शुद्ध माल दूसरी जगह मिलना असम्भव है -) का टिकट भेजकर बड़ा 'सूचीपत्र' मँगा देखें।

पुस्तक मिलनेका पता-

खेमराज श्रीकृष्णदास,
"श्रीवेङ्कटेश्वर" स्टीम्-प्रेस,
बम्बई.

गङ्गाविष्णु श्रीकृष्णदास,
"लक्ष्मीवेङ्कटेश्वर" स्टीम्-प्रेस,
कल्याण-बम्बई.

Kirtikant Sharma Collection, Najafgarh